PSVL
00985
178/XV
985

985

RC

Registered No. M 2300

Book XIX ॥ श्रीः ॥ Nos. 1 & 2

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनि सद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. १९ ] कलि- ५०४६ } पार्थिव { कन्या—साधारण सं १
तुला—शास्त्रानुबन्धः सं १
आरम्भ ,, २

# The UDYANA PATRIKA.

A

SANSKRIT MONTHLY

September } October } 1945

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण सार्कं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari*
*Panditaraja* **D. T. Tatacharya Siromani M. O. L.,**
Lecturer, Sri Venkateswara College,
TIRUPATI.

985

## विषयाः ॥

शास्त्रानुबन्धः-
कुवलयानन्दः । [बुधरञ्जनीसमेतः] १४१—१४८

1 मेनका ।
2 सुभाषितनीवी ।
3 (पत्रिका), वृद्धसेवा ।
4 मदिरेक्षणा । (4)
5 मृन्मयम् ।
6 दधिभाण्डोपाख्यानम् ।
7 पाठशुद्धिः । 1, 2

0985



व्यमिति इमां प्रार्थितवान् कः । किमिदमस्याः कर्तव्येष्वेकम् । इमाः किल रुग्णेषु तावदान्तरं प्रेम प्रदर्शयन्ति नाम । वेषधारिण्यः स्त्रिय एव मूर्तिमान् बाह्याडम्बरः । तत्रापि श्वेतजातिकन्या नाम साहसे कृतहस्ताः अग्रगण्याः कपटनाटकभूमिकाः । अहं यः कश्चन परः । सर्वथा मामज्ञातपूर्विणी इयं सहस्रवर्षपरिचयशालिमातृजायाप्रभृतिवत् किल अविशेषं समुपसृत्य परिमृशति । अस्यां वैद्यशालायां प्रत्यहमेवं एकैकं परिमृश्य स्वप्रीत्यादरसर्वव्ययं कृत्वा गृहं गच्छति चेत् ततःपरं भर्तरि कियत् प्रेम इयं दर्शयिष्यति । तस्मिन् सन्तोषं एकमपि वा वचो वक्तुं किमस्याः क्षमा भवेत् । आः ! इमां गृहिणीं प्राप्तवान् सुष्ठु नाम जीवितवान् स्यात् । ” इति बहुधा चिन्तयन् तां कन्यां अन्तरुपालभमान एव निद्रायां ममज्ज । ततो द्वित्रनाडिकाकाले गतवति प्रबुद्धः सः नेत्रे उन्मीलयेत् । जगज्ज्योतिःकल्पां स्वात्मनोऽन्यत्र अचलन्तीं तत्रैव स्थितां तां श्वेतसुन्दरीं महामायाविनीमिव मन्यमानः सः तद्दर्शनादेव बिभाय । तद्विच्छिन्नदिग्दर्शनेऽपि तस्य चक्षुषी समकुचताम् । सद्यो नयने निमीलयेत् । प्राचीनाः स्मृतयः वल्मीकादिव पक्षपुत्तिकाः मनसि उत्तिष्ठन्ति स्म । स्वगेहिन्या व्यभिचारचर्याः मायाण्डि-पिल्लै-अस्य कामलेख स्थितानि पदानि च आन्तरस्य चक्षुषः पुरस्तात् प्रादुर्भूय स्थित्वा ताण्डवमकुर्वन् । ताः स्मृतीर्धारयितुमशक्नुवन् व्यामुग्धो निष्प्रज्ञो निपतितो भवेत् । अम्लानकुसुमवत् तस्य शिरसि म्लानिं प्राप्य उपधानोपरि साचि स्थिते सा स्त्री व्यतिषङ्गेण औषधानि क्षीरं च ददती सततैकरूपेण आदरेण श्रमं विना च तस्य चिकित्सने यतमाना बभूव । तया प्रयुक्तं भेषजं तस्य दौर्बल्यमपनुद्य अङ्गानां बलं वर्धयदासीत् । प्रथमं पदे पदे जातः श्रमो निमीलनं च चिरान्तरमागन्तुमारभेताम् । परं तु तया सम्पादितं स्वास्थ्यं तेन तस्या दर्शनमात्रेण लुप्यमानमासीत् । यदा यदा स तामपश्यत् तदा तदा प्राचीनस्मृतय एव प्रादुर्भूय तं व्यथयामासुः । सर्वथैव वञ्चनशीला स्वपत्नी मेनका तञ्जापुरात् यं लेखं प्रेषयामास तस्मिन् विश्वासं कृत्वा प्राप्तां वञ्चनां स्मृत्वा स्मृत्वा स्वस्य

मौढ्यमुपालभत । शिलाप्रहारं प्राप्य अमृतां ततःपरमपि जगति जीवन्तीं तां स्मरन् उद्वेगं भजेत । कात्स्न्र्येन स्वास्थ्यं प्राप्य बहिर्गमनानन्तरं येन केनापि श्रमेण तामुपलभ्य मारयित्वा स्वस्यापि विषं पीत्वा मरणमेव श्रेय इति निश्चिकाय । सा यावज्जीवति तावत् स्वस्य स्वकुटुम्बस्य च अचञ्चलोऽवमान एव भवेदिति मत्वा तुष्यति स्म । तस्या वधानन्तरं आत्मनो जीवितस्य नास्ति प्रयोजनमिति मेने । ततःपरं स्वस्य अन्या काचन कन्या परिणेतव्या भवेदिति साऽपि मेनकावत् वेश्या भवेदित्यमन्यत । तदा चक्षुषी स्वयमेव उन्मीलेताम् । सपदि अग्रे स्थितायाः श्वेतकन्याया उपरि तदीया दृष्टिः पतेत् । महापरिशुद्धगुणशीलशालिनीं तां मूर्तां प्रीतिमिवोपविष्टां पश्येत् । तद् व्रणे क्षारस्थासकनिवेशनमिव स्यात् । 'अस्तु तव रूपमीश्वरेण अस्यै दत्तम् । अथापि निर्गन्धं स्वर्णकुसुममिव धनार्थं प्रीतिमभिनयन्ती गणिकेव च अङ्गनाजनोचितं त्रासं लज्जां च विना परस्मिन् हि मयि वर्तते । किं जन्मेदम् ।' इति बहुधा चिन्तनं श्रमेण निमीलनम् । स्वापं प्रबोधं अनङ्कुशाभिः स्मृतिभिर्यथानुभवं च व्यतिकरेण कुर्वन् आसीत् । तथा तदीये मनसि देहे च महद् युद्धं प्रवर्तमानमभूत् । उपरि च एकद्वानि दिनानि अगच्छन् ।

सा तु श्वेता धात्री विश्रमं स्वापं च विना नक्तन्दिवं तस्य समीप एव स्थित्वा जनन्या अपि श्लाघ्यतरा माता भूत्वा तस्य उचितानि कार्याणि कृत्वा प्रतिप्रयोजनानपेक्षं महोपकारं कुर्वती अवर्तत । दन्तशोधनक्षीरपायनप्रभृति तदा तदा शिथिलवस्त्रसन्धारणशरीरव्यथाकारिमाक्षिकापसरणपर्यन्तं एकैकं कार्यं निर्व्यलीकं सप्रीति च चकार । तस्य बुद्धौ उत्तरोत्तरं प्रसादं भजन्त्याम्, तया क्रियमाणायाः शुश्रूषाया विशेषः तस्य मनसि प्रतिभातुमारभत । स्त्रियो वञ्चनपरा इत्यध्यवसाये तस्य मनसि रूढमूलेऽपि तस्याः श्वेतायाः शुश्रूषाः परं अवश्यापेक्षिताः सुखकर्यश्च अभासन्त । आरम्भे तदीयाः शुश्रूषाः प्रतिग्रहीतुमेव अनिच्छन्नासीत् । कश्चित् पञ्च निमेषानपि वा आत्मानं विहाय साऽन्यतोऽपक्रामेदिति

विलोक्य रहसि तस्मै कथयामास । शिशावस्मिन् दशदिनं जीवति पितरा-वस्य सद्यो म्रियेयातामिति । श्रुत्वा च तत् बहुतरमाचिन्तयत् पिता स्वपत्न्या । 'किमस्य शिशोर्वधस्समुचितः, किं वाऽऽवयोर्मरणं श्रेय' इति । 'जीवने च नावनेके पुत्राः संभवेयुः । मरणे च शिशुरप्ययं न जीवेद्रक्षक-विरहात्' इति विचिन्त्य कस्याश्चिद्दूत्या हस्ते प्रायच्छदमुं हन्यतामसाविति । सा च तथेत्युक्त्वा स्वगृहमागत्य तत्सौलक्षण्यादिनिरीक्षणेन हन्तुमपारयन्ती स्वबन्धवे कस्मैचिदभ्यागतायासुताय प्रादात् । स च चिरं तं शिशुं परिपोष्य ज्योतिरादिशास्त्राण्यध्यापिपत् । अष्टादशवर्षश्चासौ स्वयमेव स्वचरित्रं शास्त्रमुखेन परामृश्य पोषकमपृच्छत् । उच्यतां मम जन्मवृत्तान्त इति । स चास्मै सर्वमपि वृत्तमचकथत् । त्वरितमेव स स्वपितृसमीपमागम्या-पुत्रतया हतपुत्रतया च विद्यमानयोः पित्रोः स्वात्मानं प्रकाश्य सर्वमपि वृत्त-माचख्यौ । तौ चातीव हृष्टौ पूर्वज्यौतिषिकमानाय्य जातकादिपरामर्शे त्रिंशांशप्राबल्यमवबुद्ध्य न्यग्रहीष्टां दुष्टवञ्चकमिति ।

एवमारण्यकचोरसङ्कुरतयाऽपि । तत्र परपीडार्थमिति शब्दात् 'दम्भार्थं परपीडार्थं तन्निरोधार्थमेव वा । प्रयोजनान्तरार्थं वा कैङ्कर्यं कल्क इष्यते ॥' इति श्लोकः प्रत्यभिज्ञप्यते । उक्तमेव हि प्रथमपद्धतौ यत्र पयः प्रभृतीनि श्लोकव्याख्यावसरे— 'चोरा हि केचिदरण्यैकवसतयः तत्रस्थां कांचन देवतां समाराधयन्ति स्वस्य मार्गागतपथिकनिर्मथनेन धनागमायेति । तदयमर्थः । असितात्मनः अशुद्धमनस्कस्य क्रूरप्रयोजनापेक्षित्वात् । नि-स्त्रिंशस्य घातुकस्य चोरस्य आसन्नानां मध्येमार्गं समागतानां परेषां पथि-कानां पीडार्थं हिंसापूर्वकधनग्रहणार्थं स्नेहः स्वदेवतायास्तिलाभ्यञ्जनं, शैत्यं सुशीतळतोयैरभिषेचनं, प्रसादः अन्नपानादिनिवेदनं, कोशत्यागः अरविन्द-मुकुळादिसमर्पणं च पूर्वोद्दिष्टधनादिव्ययश्च । 'कोशोऽस्त्री कुड्मले दिव्ये शास्त्रेऽर्थौघे गृहे तनौ । गुह्येऽण्डेव(खण्डे?)ष्टके पेश्यां पुत्तकासिपिधानयोः ॥'

इति वैजयन्ती । जायते सम्पद्यते । अतः परपीडार्थकैङ्कर्यमसारमित्यर्थः ।

अन्योऽप्यर्थः स्वनिष्ठाभिज्ञपरत्वपरः । तथा हि ; आसन्नाः वादार्थमभ्यागताः [परे] प्रतिकथकाः । तत्पीडार्थं तद्विजयार्थं निस्त्रिंशस्यापि 'असिना तत्त्वमसिने'त्युक्तक्रमेण परमदारण्यच्छेदननिपुणस्यापि असितात्मनः प्रतिवादिप्रमाणतर्कैरबद्धस्वरूपस्यापि स्नेहः स्वनिष्ठाभिज्ञाने सति 'विप्रं निर्जित्य वादत' इत्यादिशास्त्रपर्यालोचने सर्वमपि प्रतिवादमवधूय सर्वत्र प्रीतिरेव जायते । 'समः शत्रौ च मित्रे चे'त्युक्तेः शैत्यं सर्वत्र मार्दवं न तु पूर्ववत् परिभवोक्तिकौर्यम् । प्रसादश्च कर्मानुरूपप्रवृत्तिनिश्चयात् सर्वत्र प्रसन्नमुखता च । कोशत्यागश्च 'बहुभ्यश्च महद्भ्यश्चे'त्यादिकमवबुद्ध्य सर्वस्यापि शास्त्रग्रन्थस्य परित्यजनं च । उक्तं हि न्यायपरिशुद्धौ–"...ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः । पलालमिव धान्यार्थी त्यजेत् ग्रन्थमशेषतः ॥' इति । तत् कोशत्यागाभिप्रायम् । न हि मुक्तप्रायात्यन्तनिष्पन्नयोगस्य पुरुषस्य शास्त्रेण किमपि ज्ञातव्यमस्ति । 'साक्षात्कृतसमस्ततत्त्वार्थत्वा'दिति । इयमप्यवस्था सुव्यक्तमुक्ता सङ्कल्पसूर्योदये—'कवित्वमदकश्मल कथकदर्पतिग्मज्वरं विकत्थनमिळद्बहुपलपनाभिमानग्रहम् । परप्रतिपदर्पणप्रथनयातनां च स्वयं निवर्त्य निरवग्रहां निभृतवृत्तिमातिष्ठसि ॥' इति ।

एवं भ्रमरपरतयाऽपि कश्चिदर्थः । भ्रमरा हि रात्रौ त्रिंशन्नाडिकावधि मुकुलीभूतपङ्कजादिमध्यनिवासमनुभवन्तः प्रातस्तद्विकसने बहिर्निर्गत्य विकस्वरपुष्पेषु निष्पतन्तीति कविसमयः । तदयं वाक्यार्थः । निस्त्रिंशस्य त्रिंशन्नाडिकातो निष्क्रान्तस्य । रात्राविति यावत् । असितात्मनः अनन्तरमनिबद्धशरीरस्य अरविन्दकारागृहान्मुक्तस्येत्यर्थः । कृष्णवर्णस्य च । शसयोरभेदेन आशितात्मन इति पदच्छेदः रात्रौ सुमृष्टमकरन्दमध्यपतनेन सुतृप्तस्येति वाऽर्थः । आशितो भोजनेन तृप्त ; स्नेहः मधुमध्यशयनात् सुस्निग्धांगता शैत्यं ; अत एव शीतळता ; प्रसादः सुतृप्तता ; कोशत्यागश्च

॥ श्रीः ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पम्पातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. १९] { कलि ५०४६ पार्थिव { कन्या साधारण } सं १
तुला शास्त्रानुबन्ध } सं १

## पत्रिका ॥

एकोनविंशे वयसि क्रमादियं
विन्यस्यमाना पदमद्य पत्रिका ।
शब्दात्मकं वर्ष्म यदिन्दिरापते-
र्धत्तेऽतितर्षं बहुधाऽस्य सेवने ॥

## वृद्धसेवा ॥

उ--उद्दालकोऽहं भगवन्तमभिवादये ।

अरुणः- सौम्य, आयुष्मान् भव ।

उ- भगवत आशीः सादरं प्रतिगृह्यते । परं तु आयुषः साफल्यं न पश्यामि ।

अ- कथमङ्ग एवं ब्रवीषि । को विशेषः । परब्रह्मनिष्ठस्य नित्यप्रहर्षिण-स्तवापि कोऽयं विपर्ययः ।

उ-सत्यं भगवन् एवमासम् । अद्यापि न मां प्रति काचन चिन्ता । लोकस्य तु यथोचितोपदेशविरहात् कामक्रोधस्पर्धावशंवदस्य महती दुरवस्था । तस्याः कथं परिहारः । कः परिहर्ता । 'अयं समीचीनो

मार्गः, नायम् ; इदं कार्यं, नेदम्' इति परमहितपर्यवसायी उपदेशः सर्वेषां देशान्तराणां अनेन भरतदेशेन कर्तव्यः । अत्रापि तैः कर्तव्यः, ये शास्त्रज्ञाः ब्रह्मविदः, येषां च 'लोकाः समस्ताः सुखिनो भवन्तु' इति नित्यप्रार्थना । यैरेवंविधैर्भवितव्यम् तेषां का संप्रति स्थितिः ।

"अन्तश्छिद्राणि भूयांसि कण्टका बहवो बहिः ।
कथं कमलनालस्य मा भूवन् भङ्गुरा गुणाः ॥"

इत्येवंविधा । कथमायतौ इमे भविष्यन्ति कथं च लोक इति निरन्तरा चिन्ता मां बाधते । न पूर्ववत् बलवन्नियम्यमानमपि मनः स्वाधीनं भवति । जीवता मया न स्वात्मनः न लोकस्य किमपि सुखं भविष्यति । किमायुषा वर्धमानेनेति तर्कयामि ।

अ—अङ्ग यथाकथमपि स्थितोऽयं लोकः सर्वेश्वरस्य भगवतो विभूतिः । सर्वमिदं सृष्ट्वा विहरतस्तस्य किमिदानीमेतद्विषये औदासीन्यं विद्वेषो वा जात इति मन्यसे । अथ वा स इदानीं सुप्त इति । यदस्माकं शक्यं तद् भगवत्प्रीतये कुर्याम । अन्यत् तदायत्तमिति मुञ्चेम । न त्वात्मा कथमप्यायासयितव्यः ।

औ—वृद्धसेवाया इदं फलं यत् समये प्रतिबोधो लभ्यत इति । यतिष्ये यथा निश्चिन्तः स्याम् ।

---

# मदिरेक्षणा ॥ (4)

---

१ 'नाट्यशास्त्रानुसारी अर्थः स्वरसतम इति काममभिमन्यताम्' इत्यत्र यदि अभिमानमात्रं न तु वस्तुतत्त्वमित्यभिप्रायः स न युक्तः । अस्य शास्त्रस्य पारदृश्वा रसकवीनामग्रणीः कालिदासः नाटकस्वरूपनिरूपणैकप्रवृत्ते अस्मिन् शास्त्रे प्रसिद्धमर्थं स्वनाटके निबध्नातीत्येवं स्पष्टमवगम्यमाने अर्थान्तरस्य सहृदयैः शङ्कितुमप्यशक्यत्वात् ।

२ "सुरायामभिनिवेशः सवासनं परित्याज्यः" । 'न सुरां पिबे'दिति शास्त्रवचनस्य कस्यापि स्वरूपतः सुराया उपयोगो न कदाऽपि प्रसक्त इति तत्र वासनाया वा अभिनिवेशस्य वा कः प्रसङ्गः । तस्मादिह परित्यागोपदेशो विरुद्धः । मदिरेक्षणेत्यत्र मदिरापदार्थतया तत्परिग्रहे वासना वा अभिनिवेशो वा येषां भवति तेषां तत्परित्यागोपदेशः शास्त्रप्रतिषेधप्रदर्शनेन कर्तव्यः । किमत्र शब्दशास्त्रं निषेधकं भवति उत अर्थशास्त्रम् । इदं पुनः पुनः पृच्छयते । समाधानं तु न भवति । 'असभ्यं न रोचते' इति तु कामं उच्यताम् । तस्मादिहाप्युपदेशो विरुद्ध एव ।

३ मल्लिनाथः सुरार्थं कस्मात् त्यजति । मदिरलोचना इत्यत्र असम्भवात् । तत्र कामं मा सम्भूत् । मदिराक्षीत्यत्र तु सम्भवत्येव । अत्र एतदाश्रयणे को दोषः । नैव कश्चन दोषः । कथं तर्हि स नाश्रितः । उच्यते । वैरूप्यपरिहाराय । एकत्र अकारान्तं मदकरवाचि पूर्वपदम् । अपरत्र आकारान्तं सुरावाचि इत्येवं वैरूप्यमनिच्छन् सुरार्थं तत्याज न तु दोषं कमपि पश्यन् । अनुपलम्भात् । तेन सुरार्थो न दूषितो मल्लिनाथेन । अर्थान्तरं यत् किमपि न दूषितं तेन । ये दूषितं वदन्ति तेषामर्थान्तरत्वाविशेषात् खञ्जनार्थोऽपि दूषितो भवतीति आपत्तिः कृता । नास्मान् प्रति इयमापत्तिस्सुकरा । तेन अर्थान्तरं दूषितमित्यनभ्युपगमात् ।

वैरूप्यं सोढ्वाऽपि सम्भवस्थले प्रसिद्धार्थग्रहणाभिनिविष्टाः श्रीनिवासदीक्षितप्रभृतयः सुरार्थवादिनः । भिन्नरुचित्वाल्लोकस्य ।

४ अर्थान्तरस्यार्थान्तरादूषकत्वादिति त्रिः सत्यमिदमप्रतिक्षेप्यं वचः । सुरानुग्रहकारीति केनचन कविना भगवानभिष्टूयताम् । तत्र कश्चित् सुरेषु देवेषु अनुग्रहकारीति व्याचष्टाम् । अन्यश्च सुरायां मदिरायामनुग्रहकारीति । अत्र वस्तुतो मदिरानुग्रहकारित्वं भगवतोऽस्ति न वा । अस्तिचेत् अयमप्यर्थो ग्राह्य एव । अर्थान्तरं कथमिमनर्थं बाधितुमलम् । न चेत्, बाधितत्वादेवायमर्थः परित्यज्यते ।

नार्थान्तरस्य दूषकस्य सत्त्वेन ।

'सर्वभूतापकारिणम्' इति रावणविशेषणं कश्चित् सर्वेषां भूताना-मपकारिणामिति व्याचष्ट । अन्यः सर्वस्या भुवः तापकारिणमिति । किमत्र अर्थान्तरमर्थान्तरस्य दूषकम् ।

५ 'आप्ततमयोः प्रवचने विस्रम्भभूम्नैव अस्माभिरस्मिन्नर्थे आजगृहे' इति यदुच्यते तत् तथ्यमिति गृह्णीमः । अयमर्थः प्रथमत एव प्रकाशि-तश्चेत् उभयतः महान् श्रमो वर्जितः स्यात् । 'मदिरो मत्तखञ्जनः' इति कोशसद्भावस्य वा तत्प्रामाण्यस्य वा साधनभरो हि सम्प्रति अन्यत्र संक्रान्तः । प्रथमं शब्दकल्पद्रुमतदुदाहृतशब्दरत्नावल्योः, पश्चात् मिश्रकोशस्य, ततःपरं म. म. परवस्तु रङ्गाचार्यवर्यविरचित-कोशस्य च व्यपदेशेन चाञ्चल्यप्रदर्शनात् अनृजव इति मतिः उद्भूता दृढीकृता प्रतिष्ठिता च अभूत् ।

परेषु मिथ्यावादित्वं मुक्तकण्ठं नोद्घोषणीयमित्यभिप्रेत्य' विचारयन्तः स्मः' इति गम्भीरमलिखाम । विचारफलं तु चिरात् पूर्वमेव सम्पन्नम्– म. म. परवस्तु रङ्गाचार्यपौत्राः कृपया मातृकामात्ररूपं तं कोशं निरीक्ष्य खञ्जनार्थस्तत्र मदिराशब्दस्य नैवोक्त इति, मदिरो मत्त-खञ्ज(नः)नौ इति कोशस्तत्र नोदाहृत इति च न्यवेदयन् ।

६ "यथारुचि ते तेऽर्थं प्रयोतुं प्रभवन्ति" । अनेन अध्यवसायेन सुभा-र्थवादिष्वपि मैत्रीमेदुराः कटाक्षाः पतितुमर्हन्ति ।

७ 'कोशकारा हि न मतविशेषाभिमानिनः' इति पूर्वमुक्तम् । अमरसिंहो जैन इति विदितमेवेतीदानीमुच्यते । एवंचेत् पूर्वो निषेधः किंविषयः । 'वेदान्तिमतविषयः' इति चेत् किं वेदान्तसिद्धान्ताभिमानः शब्दार्था-वधारणे अनधिकारं तदभावोऽधिकारं च फलति । किमस्मदीयैः कृतः शब्दार्थनिर्णयः श्रद्धामात्राधीनः विवेकिनामनुपादेयः । वेदबाह्यत्वं हि वैदिकशब्दार्थनिष्कर्षे अभियोगराहित्यद्वारा विप्रतिपन्नेषु विषयेषु

अनुपादेयवचनतामापादयतीति आप्तानां निरूपणम् ।

प्राचीनतरो जैनः कश्चित् सिताम्भोजे पुण्डरीकपदं प्रयुक्तवान् । तत्साधुत्वसमर्थनसंरम्भी 'पुण्डरीकं सिताम्भोजम्' इत्यमरसिंहः कोशं जग्रन्थ । वेदार्थेषु यज्ञेषु न जैनानां विश्वासः । तस्मात् तत्कृतं विशेषमसत्कृत्य अयं पत्नीशब्दं भार्यापर्यायतया पपाठेति यथोपपत्त्यङ्गीकार्यम् । लक्षणया चात्रोपपत्तिः सुवचा । अन्यदा विस्तरः ।

८ वृषलस्य पत्नीति प्रयोगं महाभाष्यकारो दर्शयति । परं तु पत्नीव पत्नीति औपचारिकतया तं समर्थयति । तथा च पत्नीभार्याशब्दयोरपर्यायत्वमेव तेन स्थाप्यते । तदवष्टम्भेनापि च अमरसिंहो दूष्यो भवति । भाष्यकारदर्शितस्य औपचारिकप्रयोगस्य कथमपर्यायत्ववादिभिर्दूषणीयत्वं भवति । पूर्वलेख एवेदं सुव्यक्तम् । 'अर्धो वा एषः' इति श्रुतिः यज्ञसंयोगवद्गृहिणीमात्रविषया । 'त्वे राय इति यजमानाय प्रयच्छति .... तोते राय इति पत्न्यै' इत्युपक्रमात् । यत्र यज्ञसम्बन्धो न विवक्षितः तत्र पदान्तरं स्यादपि । यथा 'यज्जायाभ्योऽविन्ददि'ति । 'याज्ञवल्क्यस्य द्वे भार्ये' इति च ।

९ नाट्यशास्त्रोक्तार्थः खञ्जनार्थ इत्यस्मिन् द्वये पूर्वः श्रेयान् । साक्षात् काव्यात्मभूतरसाभिव्यञ्जकत्वात् । नोत्तरः । शरीरभूतार्थोपस्कारद्वारा व्यवधानेन रसे उपयोगात् । इति प्रत्यपादयाम । अत्र 'अलङ्कारेषु उपमायाः प्राधान्यम्' 'उपमा कालिदासस्य' इत्यादिना किमुक्तं भवतीति चिन्तनीयम् । किमत्र उपमा शरीरिणी, आत्मभावमापन्ना, भवति ; रसश्च शरीरम् ? ओमिति चेदुपपादनीयम् ।

अत्र ग्राम्यगाथापठनं न लेखस्य गौरवाय ।

एवंलेखनमार्गस्य चिराभ्यासोपपातिनः ।
परित्यागोद्यमः सद्यः कल्पेतात्पेतरश्रियै ॥

अलङ्कारशास्त्रं महत् । उत्तमं ध्वनिरूपम्, मध्यमं गुणीभूतव्यङ्ग्यं,

अधमं शब्दार्थभेदेन द्विविधं चित्रम् , इति काव्यं त्रेधा विभज्य तृतीयस्याधमस्य अर्थचित्रस्य अंशतया उपमादयोऽर्थालङ्काराः तत्र निरूप्यन्ते । ध्वनिप्रधाने कालिदासीये शाकुन्तले रसध्वनेरात्मत्वात् अलङ्काराणां तदङ्गत्वेन निवेश इति तच्छास्त्रविदो विदन्ति । सर्वमिदं मनसि निधाय परकीये

"आलङ्कारिकाणां जीवसर्वस्वमुपमैव"

इत्यस्मिन् वाक्ये आलङ्कारिकाणामिति कृत्स्नालङ्कारशास्त्रविदोऽभिप्रेता इति गृहीत्वा 'न । काव्यस्य जीवः आत्मा ध्वनिः' इति प्रत्यवोचाम । इदानीं तु

अलङ्कारशास्त्रे चोपमैव प्राथम्यमाटीकते । शतमप्यलङ्कारा उपमानुप्राणिता इति चन्द्रिकाकृतः ।

इति लेखनात् अर्थालङ्कारप्रकरणमात्रं बुद्धिस्थमिति प्रतीयते । अत्र अंशद्वयमवधेयमिति विज्ञापयामः। १) कुवलयानन्दः न कृत्स्नमलङ्कारशास्त्रम् । न कृत्स्नशास्त्रार्थविषयम् । प्रतापरुद्रीयं साहित्यदर्पणः इत्यादयो ग्रन्थास्तथाविधाः । एषु चरमे भागे निरूपितार्थालङ्कारमात्रं निरूपयितुं प्रवृत्तः कुवलयानन्दः शास्त्रस्यैकदेशः न पूर्णं शास्त्रमेव । २) अथायमेकदेश एव विवक्षित इति चेत् पूर्वोक्तरीत्या अस्मदुक्तस्य समाधानं किमपि नोक्तं स्यात् । साक्षाद्रसव्यञ्जकार्थापेक्षया उपमानिर्वाहकार्थो जघन्य इत्यस्माभिरुच्यते । अर्थालङ्कारेषु उपमैव प्रथमगणितेत्यनेन किं तस्य भवति ।

१० लक्षणा लक्षणात्वेनैव दुष्यतीत्येतन्निराकरणाय लेखिष्यमाणे ग्रन्थे 'लक्षणा जघन्यवृत्तिः' 'निषादस्थपतौ तत्पुरुषो नाङ्गीकार्यः । लक्षणापत्तेः' 'अष्टदोषदुष्टो विकल्पः' 'श्रूयमाणस्य वाक्यस्य न्यूनाधिकविकल्पने । लक्षणावाक्यभेदादिदोषः' इत्यादिग्रन्थकारव्यवहारस्वारस्यं परामर्शनीयमिति प्रार्थ्यते ।

११ पार्थश्चासौ सारथिश्चेत्येवं विग्रहमिष्ट्वा पार्थसारथिरिति प्रयोगो भवितुमर्हति नवेति प्रश्नः सुरानुग्रहकारीत्यत्रोक्तरीत्या समाहितो ज्ञेयः । अर्थस्य सम्भवे अयमेवार्थो न्याय्यः । असम्भवे एवं विग्रहो न कस्यचि-चिदिष्टः स्यात् । उत्तरगोग्रहणे बृहन्नलाया अर्जुनत्वाभिव्यक्त्यनन्तरं

पार्थसारथिनाऽनेन त्रातोऽहं महतो भयात् ।

इत्येवं उत्तर उवाचेति यदि कश्चन कवयेत् तत्र पार्थश्चासौ सारथिश्चे-त्येतं विना कोऽन्यो विग्रहो भवेत् ।

१२ 'राजा चासौ पूरुषश्चेत्येवमिच्छा न कस्यचित्' इति न । ब्रह्म चासौ लोकश्च ब्रह्मलोक इति ईदृशी विवक्षा यदि भवति राजा चासौ पुरुषश्च राजपुरुष इति विवक्षा कुतो न भवति । किं राजा न पुरुषः । किमत्र दुष्यति । षष्ठीतत्पुरुषोदाहरणतया राज्ञः पुरुषः राजपुरुष इत्यभ्यास-मात्रेण राजपुरुषपदतत्त्वं तत्रैव परिसमाप्तमिति ग्रहणं किं युक्तम् ।

'समानाधिकरणस्थले राजा पुरुषोऽस्तीत्यादौ' इति निषादस्थपत्य-धिकरणे खण्डदेवेन 'अथ राजा पुरुष इत्यादौ पदार्थोपस्थित्यादिसत्त्वेन कथं न भेदान्वयबोधः' इति व्युत्पत्तिवादे गदाधरेण च यदुक्तं तद-प्यत्र अनुसन्धेयम् ।

१३ प्रधानमप्रधानं वा सर्वथाऽनुपपत्तिमत् ।
यत् तत् कथमुपेक्ष्येत येन केनापि जानता ॥
विवादास्पदभावार्हविषयान्तरवर्जने ।
यत्नः परम आस्थेयो व्यर्थविस्तरभीरुभिः ॥

१४ पूर्वाचार्यनिबन्धेषु परिहासादि वर्तताम् ॥
'तेषां तेजोविशेषेण प्रत्यवायो न विद्यते ।'
तद्दर्शिनो वयं तद्वद् वाञ्छेम यदि वर्तितुम् ॥
महत्यनर्थे पतिताः सीदेम मितशक्तयः ॥

अनुशासनमाचार्यैः कर्तव्यं श्रुतिरादृता ।
शास्ति नो इतराणीति भाव्यं तद् भव्यबुद्धिभिः ॥

प्रामाणिकोऽर्थः प्रतिपाद्यमान-
स्तृप्तिं न यावत् तनुते परेषाम् ।
तावद्विचाराद् विततात् विरन्तुं
शक्यं नु युक्तं नु शमार्थिनोऽपि ॥

# मृन्मयम् ॥

(V. R. Srinivasa Tatacharya Siromani)

'नित्यं वृद्धशरादिभ्यः' इति पाणिनिसूत्रम्। एतत्, काशिकायां वृत्तौ 'भाषायामभक्ष्याच्छादनयोरित्येव, वृद्धेभ्यः प्रातिपदिकेभ्यः शरादिभ्यश्चाभक्ष्याच्छादनयोर्विकारावयवयोः भाषायां विषये नित्यं मयट्प्रत्ययो भवति' इति व्याख्याय शराद्यन्तर्गतमृच्छब्दस्य लौकिकं मृन्मयमित्युदाहरणमदीयत । प्रौढमनोरमायां 'अथवा नित्यं वृद्धेत्यत्र भाषाग्रहणं नानुवर्तते । अनुवृत्तावपि वा भाषायां नित्यम् अन्यत्र काचित्क इत्याश्रित्य मयट् सुसाधः' इत्यादिग्रन्थेन वेदेऽपि मृन्मयशब्दे विकारार्थे मयडसाध्यत । शब्देन्दुशेखरे भाषायामित्याद्यनुवृत्तिमभिधाय वेदे 'मोषु वरुण मृन्मयं गृहम्' इत्यादिषु प्राचुर्य एव मयट् इत्यभण्यत। काशिकाशेखरकाराशय एव 'विकारशब्दान्नेति चेन्न प्राचुर्यात्' इति ब्रह्मसूत्रस्यानुगुणः। परं तु प्राचुर्ये मयटि 'मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारः' इति छान्दोग्यवाक्यं क्लेशेन योजनीयं भवति । उक्तग्रन्थेषु मृन्मयमिति नकारघटितमेव रूपं मुद्रितं लक्ष्यते । छान्दोग्ये 'मृण्मयं विज्ञातम्' इत्यत्र 'स मृण्मये वीतहिरण्मयत्वात्' इति रघुवंशे च मृण्मयमिति णकारयुक्तं मुद्रितं दृश्यते । तत्र नकारयुक्तमेव तद्रूपं

साधु । तथा हि—मृच्छब्दतकारस्य मयटि परे ‘प्रत्यये भाषायां नित्यम्’ इति वार्तिकेन लौकिकप्रयोगे प्रत्यये विद्यमाने अनुनासिके परतः पदान्तस्य यरोऽनुनासिको नित्यं भवतीत्यर्थकेन नकारे तस्य ‘ऋवर्णान्नस्य णत्वं वाच्यम्’ इति वार्तिकेन प्राप्ते णत्वे ‘पदान्तस्य इति निषिद्धे मृन्मयमिति सिद्ध्यति । वस्तुतस्तु ‘पूर्वत्रासिद्धम्’ इत्यस्य अधिकारसूत्रत्वेन त्रिपाद्यामपि पूर्वशास्त्रं प्रति परशास्त्रमसिद्धमित्यर्थलाभेन सर्वणत्वविधिशेषभूतं ‘ऋवर्णान्नस्य णत्वं वाच्यम्’ इति वार्तिकं प्रति ‘यरोऽनुनासिकेऽनुनासिको वा’ इति परसूत्रशेषभूतस्य ‘प्रत्यये भाषायां नित्यम्’ इति वार्तिकस्य,‘अट्कुप्वाङ्नुम्व्यवायेऽपि’ इति णत्वविधायकसूत्रं प्रति ‘अनुस्वारस्य ययि परसवर्णः’ इति सूत्रस्येव असिद्धत्वात् कुर्वन्तीत्यत्रेव मृन्मयशब्दे णत्वं न भवति । ‘मृत्पिण्डेन सर्वं मृण्मयम्’ ‘स मृण्मये वीतहिरण्मयत्वात्’ इत्यत्र मृत्पिण्डेन हिरण्मयत्वादित्यनयोर्णकारस्य सत्वात् मृन्मयामित्यत्र णकारो युक्त इति मत्वा णकारो मुद्रित इति वदन्ति।

---

# दधिभाण्डोपाख्यानम् ॥

(S. N. Sriramadesika Siromani, Tirupati)

श्रीमन्निगमान्तमहादेशिकैरनुगृहीते श्रीमद्रहस्यत्रयसारग्रन्थे ‘दधिभाण्डादिवत्’ इति वाक्यखण्डो दृश्यते । दधिभाण्डोपाख्यानं श्रीभागवतविष्णुपुराणादिषु कुत्राप्युपात्तं नोपलभामहे । परं त्विदं अनेकेऽनेकधा वर्णयन्ति । इदमस्मदाचार्यपादेभ्यो दासनैवमश्रावि । तमेव प्रकारमत्र प्रकाशयितुमभिसन्दध्महे ।

अवाप्तसमस्तकामः श्रीमान्नारायणः संसारिचेतनान् गीताशास्त्रप्रदा-



TIRUPATI.

नेनोज्जिजीवयिषुः कृष्णवेषेण भुवमवतीर्य नन्दगोकुले यशोदयाऽभिवर्धितः स्वच्छपक्षशशिकलेवाभिववृधे । स बाल्ये वयसि वयस्यैर्गोपबालकैः समं बह्वयः क्रीडाः कुर्वन्नुल्ललास । स कदाचिन्निलयनक्रीडायां परैरज्ञातं क्वचित्तिरोधाय स्थातुं वेगेन धावन् बह्वीर्वीथीरतीत्य दधिभाण्डनाम्नः कस्यचित् गोपवृद्धस्य गृहद्वारमाजगाम एनमनुग्रहीतुं परया कृपया । गृहद्वारवितर्दिकायां निषण्णो धृतदण्डः अन्धः पलितशिराः स दधिभाण्डः भूषणानां निनादेन कृष्णमागतं मत्वा भृशं तुतोष । तद्दिनं सुदिनं मेने । तस्य नेत्रयोः आनन्दाश्रुप्रसरोऽनिवार्यो बभूव । किं बहुना, कृष्णागमनपरिज्ञानेन सर्वथाऽऽत्मानं कृतार्थममन्यत । श्रियःकान्ते भगवति स्वयमेव कुटीरमागते को नाम न मोदेत । इतस्ततः प्रसारितवसनः विगलिताभरणः विस्रस्तकेशः कृष्णः ससंभ्रममागत्य सत्वरं तात तात मम सुहृदः मां मृगयमाणाः पश्चादनुधावन्ति । अतो मे गुह्यं किमपि स्थलं प्रदर्शय तेष्वपश्यत्सु तत्र लीय इति वृद्धं पप्रच्छ । एवं पृष्टः सः गोपवृद्धः अयमेव समीचीनोऽवसरः अस्य रक्षणव्याजेन मुक्तिं प्राप्यात्मानमपि रक्षितुमिति मनसि कुर्वन् 'हे कृष्ण इत एहि । मन्निकटे एकं दधिभाण्डमस्ति । तस्मिन्निलीनो वर्तस्व' इति प्रतिबभाषे । कृष्णोऽपि तथैव तस्मिन् अलीयत । ततो व्रजबालकाः सर्वत्रान्विष्यन्तोऽपि कृष्णमपश्यन्तः वृद्धमुपेत्य तात ! किं कृष्णमत्रागतमद्राक्षीः ? इति सत्वरमपृच्छन् । 'हे बालकाः शृणुत । कृष्णः साक्षाच्छ्रियःपतिः अस्मदनुजिघृक्षयैव केवलं भुवमवतीर्णः । स एव तं द्रष्टुं प्रभोभवीति यस्तस्मिन्नन्यादृशीं भक्तिं वहति । अहमतीवाज्ञः । कथं स मादृशानां नयनगोचरमुपेयात् । अत्रागतमपि वा तमन्धः कथमहं जानीयाम् ? किं मां परिहसितुमेवं पृच्छथ ?' इति चतुरैर्वाक्यैः किमप्यजानन्निव स गोपवृद्धः बालकान् प्रतिनिवर्तयामास । तेऽपि कृष्णान्वेषणप्रसिताः वृद्धेनोक्तं सर्वं तथ्यमेवेति मन्वाना अन्येन पथा प्रत्याववृतिरे । कृष्णोऽपि बालकान् प्रतिनिवृत्तान् ज्ञात्वा शनैः शनैः भाण्डात्

शिर उन्नमय्य 'तात तात! अपि बालकाः प्रतिनिवृत्ताः । अवस्थेन मयोच्छ्वसितुमपि न पार्यते । अतो मां मोचये'ति सगद्गदमेनमयाचत ।

अचिरादेव कृष्णसकाशान्मुक्तिं वाञ्छतो मे समयविशेषःसमीचीनः समघटिष्टेति मत्वा वृद्धगोपः 'कृष्ण कुतस्त्वरसे । त्वं सर्वेभ्यः किमपि वितरसीति बहुभ्योऽहमश्रौषम् तन्मह्यमपि चेत् दद्याः तदा त्वं मोचितो भविष्यसि । न चेत् कस्त्वां त्यक्ष्यति' इति भर्त्सयामास । सर्वमोचकोऽपि स नन्दसूनुः वृद्धस्यानुजिघृक्षयैव केवलमेवं विडम्बयन् 'तात! अहरहः गृहाद् गृहमटित्वा गृहस्वामिष्वसन्निहितेषु नवनीतादिकं चोरयित्वाऽस्मत्सुहृद्भ्यः प्रयच्छामीति सत्यम् । तत्तुभ्यमपि दास्ये । तत्कृपया मां जहीही'ति नेत्रविकलं गोपवृद्धं प्रार्थयामास । 'कृष्ण! नाहं दधि वा नवनीतं वा कामये । शाश्वतं नित्यानन्दस्वरूपमपुनरावृत्तिलक्षणं परमं पदं मे प्रयच्छ' इति वृद्धस्य प्रार्थनां श्रुत्वा नन्दकिशोरः सस्मितं 'तात! केन चित्प्रतारकेण नूनं वञ्चितोऽसि । क्वाहं बालः ; क्व तत्परमं पदम् । गोपबालकस्य मे मुक्तिदाने का नाम शक्तिरस्ति । कुतो मां वृथा व्यथयसि । कृपया मां जहीही'ति बभाषे । कृष्णदर्शनमात्रेण सञ्जाततत्त्वज्ञानस्य वृद्धगोपस्य सर्वमिदं कृष्णस्य वचनं मृषैवाभात् । अतो नैकमपि वचो विशश्वास । 'साक्षान्नारायणः कृष्णवेषेण भुवमवतीर्य सर्वेभ्यो मुक्तिं दास्यतीति नारदमुखादश्रौषम् । न कदाचिदपि ब्रह्मर्षेर्नारदस्य वचनं अतथा भविता । अतस्त्वमेव परं ब्रह्म । त्वमेव जगत्कारणम् । त्वमेव नः परमा गतिः । त्वद्दर्शनादेव वरीवर्ति मोक्षश्रीः । मह्यं मुक्तिं अप्रयच्छन् त्वं भाण्डान्नैव मोक्ष्यसे । अवश्यः प्राणान्वा जह्याः । नैव त्वां मोचयेयम्' इति स गोपवृद्धो निरबध्नत । एवं परमभक्त इति जानन् कृष्णः तथैव ते मुक्तिं दद्यामित्येनमनुजग्राह । 'यतो भाण्डात् त्वमरक्ष्यथाः तस्य कृतेऽपि मुक्तिमनुगृहाणे'ति पुनरपि वृद्ध पृच्छति, तेनापि तथैवेत्यङ्गीचकारि । एतावताऽपि अतृप्तः सः 'हे कृष्ण! आबाल्याद्योयं दण्डोऽन्धस्य मे मार्गदर्शयित्व-

र्तिष्ट । तमेनं विहाय कथमहमेकाकी मुक्तिं प्राप्नुयाम् । ततो दण्डस्यापि मुक्तिं देही'ति पप्रच्छ । श्रियःपत्यौ भगवति कृता प्रार्थनाऽपि किन्नु विफला भवेत् । अतः परमकारुणिको भगवान् 'त्वं यद्यत्पृच्छसि तत्सर्वं तथैव ते भविते'ति जगाद । वृद्धोऽपि भाण्डेनैतदुदजीघटत् । तस्मान्मोचितः कृष्णः स्वगृहं ययौ । ततःप्रभृति एष दधिभाण्ड इति व्यपदिदिशे, यतोऽस्य मुक्तौ तदेव भाण्डं निदानमवार्तिष्ट ।

---

# पाठशुद्धिः ॥

(1)

श्रीशठकोपदिव्यगाथासहस्रव्याख्यायाः षट्त्रिंशत्सहस्रिकाया या टिप्पणी 'जीयर्-अरुम्-पदम्' इति प्रसिद्धा ॥ तत्र सर्वप्रथमगाथाविवरणावसरे

'आत्मा संरक्षितः सिंहैर्वृत्तिमाश्रित्य वैतसीम्'

इति श्लोकार्धमुदाहृतं दृश्यते । अस्मद्दृष्टेषु आन्ध्रग्रन्थद्राविडलिपिमुद्रितेषु सर्वेषु कोशेषु एवमेव पाठः । अर्धमिदं रघुवंशे चतुर्थसर्गादुद्धृतम् । तत्र 'सिंहैः' इत्यस्य स्थाने 'सुह्मैः' इति पठ्यते । मल्लिनाथव्याख्यानं च

'सुह्मैः सुह्मदेशीयैः । सुह्मादयः शब्दाः जनपदवचनाः क्षत्रियमाचक्षते ।'

इति । एवमेव तत्राऽपि युक्तं पठितुम् ।

---

(2)

अस्मदवान्तरसम्प्रदायग्रन्थस्य आचार्यहृदयस्य आन्ध्रलिपिमुद्रितस्य व्याख्याने (२६३ पु), अन्ते योजिते सारसंग्रहे च 'अविद्यास्मितरागद्वेषाभिनिवेशाः पञ्च क्लेशाः' इति, 'अविद्यास्मितरागद्वेषाभिनिवेशरूपक्लेशपञ्चकः' इति च दृश्यते । व्याख्याने उदाहृतमिदं योगसूत्रे साधनपादे तृतीयं सूत्रम् । तत्र अविद्या अस्मिता रागः द्वेषः अभिनिवेशः इति पञ्च क्लेशा निर्दिष्टा व्याख्याताश्चेति स्पष्टं पश्यामः । तदत्र शोधनं कार्यम् ।

---

१०

Registered No. M 2300.

Book XIX ॥ श्रीः ॥ Nos. 3 & 4

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. १९ | कलि- ५०४६ | पार्थिव | वृश्चिक—साधारण सं. २ धनुः—शास्त्रानुबन्धः सं. २ आहत्य ,, ४

# The UDYANA PATRIKA.

A

SANSKRIT MONTHLY

November December 1945

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription  Re. One only.
Do. With Sanskrit Supplement  Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः ॥

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण सार्कं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविडया वा न तु भाषान्तरेण) ।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari Panditaraja* **D. T. Tatacharya Siromani M. O. L.**,
Lecturer, Sri Venkateswara College,
TIRUPATI.

R S V L
00985

## विषयाः ॥

शास्त्रानुबन्धः—
कुवलयानन्दः । [बुधरञ्जनीसमेतः] १४९—१५६

1 मेनका ।
2 सुभाषितनीवी ।
3 ब्रह्मवर्चसम् ।
4 आशयविवरणम्
5 पूर्वत्रासिद्धम् ।
6 महोपकारः ।
7 पाठशुद्धिः ।
8 निन्दासुखम् ।

भगवन्तं प्रार्थयेत । सा जुगुप्सा क्रमेण जहास । तदा तदा तया कृतस्य प्रश्नस्य उत्तरं वक्तुमनिच्छन् सः मौनमालम्बत । अथापि तया धात्र्या स्वविषये क्रियमाणं महान्तं परिश्रमं दिनेषु गच्छत्सु सम्यग् बुबुधे । भृत्यर्थं कर्मकर्यपि सती सा स्वकर्म तथा निपुणं परहृदयपरितोषावहं च करोतीति पश्यन् तां प्रति कमपि सम्यञ्चं अभिप्रायमाकलयितुं कृतज्ञतां च वोढुमारभत । स्वेन तस्यां वैद्यशालायां गमयितव्यानि स्वल्पानि दिनान्यपि यदि तया सह साधारणं स्थित्वा स्वयं बहिर्गच्छेत् स्वमतस्य न काऽपि हानिरिति मेने । स्वविषये यं कमप्यपराधं अकृतवतीं उपकारानेव कृत्वा प्रत्युज्जीवयन्तीं च तां प्रति भाषणं विना वैरकरणं केवलं मृगस्वभाव इति कृतघ्नकार्यमिति च मन्यमानः शनैः तदास्थितं पार्श्वं प्रति निवृत्य तस्या मुखं समैक्षत । स स्वेन सह कमपि विषयमधिकृत्य भाषितुमिच्छतीति विदन्ती सा श्वेतशुकी 'किमपेक्षितम्' इति पप्रच्छ ।

सपदि वराहस्वामी दुर्बले स्वनौ "दिवा नक्तं च त्वमेकैव खलु अत्र वर्तसे । किं ते न विश्रमितव्यम् न स्वप्तव्यम् । अह्न एका रात्रेरेकेति संविधानं इह किं न भवति । अस्माकं स्वास्थ्यसम्पादनात् पूर्वं भवत्यो व्याधिना शयिष्यन्त इतीव हि भवति । ईदृशो महान् अक्रमः किं वर्तेत । एवमपि नु कर्म कारयेयुः" इत्यभिहितवान् तस्या मुखमैक्षत । स्वेन पृष्टस्य प्रश्नस्य सा किमपि उद्धतमुत्तरं किन्नु दद्यादिति चकितोऽभूत् । तदाकर्णितवती सा भामिनी कञ्चित्क्लेशं प्राप्ता अपरतःस्थितं किमपि वस्तु अवदधतीव अन्यत्र पश्यन्ती 'अल्पेतराणि वेतनान्यादाय दत्वा किमस्मान् सुखमुपवेशयेयुः। इत्थमापत्काले नक्तन्दिवमुपविश्य उपचरितुमेव अस्मभ्यमभ्यधिकं वेतनं ददाति । स्वस्थदेहाश्चेत्त परिश्राम्येयुः रुग्णाः कथं जीवेयुः । एकस्य कष्टे सत्येव अपरस्य सुखं भवति । वयमेवं कृत्वा कृत्वा अभ्यासवत्यः । नैवायं क्लेश इत्यस्माकं भाति । प्रथमतस्तावदयमस्माकं धर्मः । द्वितीयतः परोपकाररूपमिदं कार्यम् । परान् दुःखितान् दृष्ट्वा ये नानुकम्पन्ते न ते मनुष्या भवन्ति । तृतीयतः इदं कर्म स्त्रीणां साहजिकम् । गृहेषु भर्तृपुत्रप्रभृतयो यदि

व्याधिपीडिता भवेयुः तैः सह स्थित्वा दुःखमनुभवन्त्यः स्त्रिय एव । अतो मम मनसो रुचितमेव कर्म भवति । नात्र कश्चिद्भ्रमः" इत्याह स्म ।

तस्या भाषितं सुखावहमवर्तत । कर्मणा वाचा च पुरुषान् क्षणेन मोहयितुं क्षमा महातन्त्रिणी सेति स मेने । परमार्थतस्तस्या गुणः कीदृशो नु इति सन्देहस्तस्य मनसि प्रादुरभूत् । तां प्रति काचन जुगुप्सा प्रीतिश्च युगपदुदिते तस्य मनोऽव्यथयताम् । स्वकृतस्य प्रश्नस्य उद्धतमुत्तरमनुक्त्वा स्त्रीत्वोचितं यदभाषत तत्र कापि तृप्तिश्चाजायत । स्वकीये चक्षुषी निमील्य क्षणं मौनी बभूव । ततश्चक्षुषी उन्मील्य "अत्र आगतस्य मम कति दिनानि' इत्यपृच्छत् ।

श्वेता—द्वादश दिनानि भवन्ति ।

वराहस्वामी—किं मम बन्धवः ये केचन इह मां दृष्ट्वा अगच्छन् ।

श्वेता—युष्माकमग्रजा श्यामार्य इत्यन्यःकोऽपि मनुष्यश्च तदा तदा आगच्छन्तौ गच्छन्तौ वर्तेते । युष्माकमत्र आगमनादनन्तरदिने युष्माकं श्वशुरः तस्य माता श्यामार्यश्च आगच्छन् ।

इदमाकर्ण्य वराहस्वामी तयोरागमने किं वृत्तमिति जिज्ञासमानः 'तौ आगत्य किमकुर्वाताम् । तावपि किं प्रतिदिनं आगच्छन्तौ वर्तेते' इत्यपृच्छत् ।

श्वेता "तौ तस्मिन्नेव दिने केवलमागच्छताम् । अत्र आगमनानुपदं युष्मदीयां परितापकरीं स्थितिं कृत्स्ने शरीरे व्याप्तान् व्रणांश्च दृष्ट्वा उभावपि आर्तौ अरुदताम् । अश्रूणि विमुच्य आक्रोशताम् । श्यामार्ये युष्मदीयकञ्चुकभस्त्रिकायां स्थितौ द्वौ लेखौ आदाय दत्तवति तौ तत्रत्यान् विषयान् ज्ञात्वा अतीव अमर्षमाप्नुताम् । ताभ्यां पञ्चदशनिमेषावकाशो दत्त आसीत् । तस्य समाप्त्यात् सपदि तौ वयं बहिरगमयाम । ततःपरं तौ अद्यापि नागमताम्" इत्यवादीत् ।

तदाकर्णितवान् वराहस्वामी कामपि जुगुप्सामभजत । मेनकायां तस्य स्थिता ईर्ष्या तयोरप्युपरि प्रासरत् । तेषां दुष्प्रकृति-

तन्मुकुळपरित्यागश्च जायते । किमर्थं तत्प्रत्यासन्नविकस्वरकुसुमान्तरेषु निपत्य तद्दळभ्रंशनादिपीडाजननार्थमेव । अतः कारागृहमुकुळबन्धनमेवास्य श्रेय इति भावः ।

एवं करिकळभपरतयाऽपि अर्थः । तथा हि । निस्त्रिंशस्य त्रिंशवयसो निर्गतस्य । 'त्रिंशद्वर्षस्तु कळभ' इत्युक्त्या तदानीं मदविकारारम्भदशा द्योत्यते । तत्पूर्वं शैशवावस्थासम्मिळनान्न तादृशो मदविकार इति भावः । असितात्मनः नीलवर्णस्य बद्धुमशक्यस्य वा । स्नेहः तैलाभ्यञ्जनं मस्तकोपरि । शैत्यं यथेच्छं जलावगाहनम् । प्रसादः सुमृष्टभोजनात्सन्तोषातिशयः । कोशत्यागः जलमज्जनादिकाले कमलमुकुळादिविधूननं दन्तकोशादिभञ्जनं वा जायते । आसन्नाः स्वसमीपस्था वृक्षाः पर्वताः पथिकाश्च । तत्पीडार्थमेव । मदोद्धतस्यानिबद्धस्य पथिकजनवृक्षपर्वतादिभेदनं स्वदन्तकोशभञ्जनञ्च सुप्रसिद्धमेव । अत एव वक्ष्यतेऽत्रैव—भजतु च तटक्रीडां पीडाभिसन्धिरसौ चिरमिति । त्रिंशान्निष्क्रान्तस्येत्यनेन तदधिकसंख्यातोऽनिष्क्रान्तस्येति द्योत्यते । अन्यथा तदुक्तिवैयर्थ्यात् । तथा च गजानां शतविंशतिरित्युक्तविशिष्टायुष्पादपरिनिष्पत्तिमत इति विशिष्टार्थः ॥ ३ ॥

---

**जनित्वाऽपि महावंशे निम्नगा वक्रचेष्टिनाः ।**
**वैपरीत्यं वितन्वन्ति समेषु विषमेषु च ॥ ४ ॥**

उक्तश्लोकैः खलानां जन्मसिद्धः स्वाभाविकाकार उक्तः । इदानीं सुकृतविशेषात् ब्राह्मणाद्युत्कृष्टवंशे जातानामपि दुर्जनसङ्गात् तदीयदुश्चरित्रसंक्रम इत्याह (जनित्वेति) । महावंशे 'जनित्वाऽहं वंशे महति जगति ख्यातयशसां' इत्यादि[षु] उक्ते महाशिष्टवंशे जनित्वाऽपि 'शुचीनां श्रीमतां

गेहे योगभ्रष्टोऽभिजायते । अथ वा योगिनामेव कुले भवति धीमताम् ॥' 'महता पुण्यपण्येन क्रीतेयं कायनौस्त्वया ।' इत्यादिप्रमाणगणात् बहुजन्मार्जितसुकृतकूटप्रतिफलतयाऽवतरणं लब्ध्वाऽपि । अनेन सुकृतभागविनाश उक्तः । निम्नगाः परिशिष्टदुष्कृतप्राबल्येन नीचजनमाश्रिताः । वक्रचेष्टिताः 'संसर्गजा दोषगुणा भवन्ति' इति न्यायेनात्यन्तदौर्जन्यं सम्पाद्य तदुचितविरुद्धाचरणप्रवृत्तिशीलाः । समेषु स्वस्मिन् हितपरेषु साधुषु । विषमेषु अहितपरेषु दुर्हृत्सु च । वैपरीत्यं विपरीताचरणम् । वितन्वन्ति विस्तारयन्ति । 'तनु' विस्तारे । विषमेषु दौर्जन्यं सहजम् । समेषु तु तद्दोषायेति भावः । विषमेषु यद्दौर्जन्यं करणीयं तत्समेष्वपि कुर्वन्तीति दृष्टान्तद्योतनाय विषमशब्दः । अनेन दौर्जन्याचरणस्य स्वस्वभावकौटिल्यमेव हेतुः । न तु परस्वभाव इति फलितम् । 'विषमेष्वपि भाववन् स्वमर्थ'मिति वक्ष्यमाणक्रमेण अहितेष्वपि हितपरत्वरूपमहापुरुषलक्षणप्रत्यनीकतया हितपरेष्वप्यहितत्वरूपं दुर्जनलक्षणमिहोच्यत इति ध्येयम् । समेषु वैषम्यं विषमेषु समत्वं च भजन्तीत्यप्यर्थः । हितमहितत्वेनाहितं हितत्वेन च बुद्ध्वा तदुचितकर्म कुर्वन्तीत्यर्थः । 'उष्णे शीतलतामुपेत्य शिशिरे प्राप्ते भजन्त्युष्णता'मिति हि वक्ष्यते । स्वापेक्षयाऽधिकबले भयादनुकूलाचरणं न्यूनबले स्वाभाविकविरोधाचरणञ्च कुर्वन्तीति वा । उक्तार्थद्वयेऽपि दृष्टान्तोऽर्थान्तरेषु स्पष्टः । उच्यते हि—'अहो प्रकृतिसादृश्यं श्लेष्मणो दुर्जनस्य च । मधुरैः कोपमायाति कटुकैरेव शाम्यति ॥' इति । तत्र द्वैतीयीकार्थे महानदीदृष्टान्तः । महान् वंशो वेणुकुञ्जो यस्येति विग्रहात् महावंशशब्दः पर्वतविशेषपरः । पर्वत एव वेणुगणप्राचुर्यं लोकवेदयोः प्रसिद्धम् । यथा श्रूयते —'ऊर्ध्वमेनामुच्छ्रयतात्, वेणुभारं गिराविवे'ति । 'गुञ्जत्कुञ्जकुटीरकौशिकघटाघूत्कारवत्कीचकस्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चावतोऽयं गिरिः' इति च । तत्र जनित्वाऽपि तमारभ्य प्रवोढुं प्रवृत्ता अपि निम्नगाः अधोऽधःप्रदेशत एव निर्गच्छन्त्यः ।

॥ श्रीः ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. १९] कलि ५०४६ पार्थिव { वृश्चिक साधारण } सं २
{ धनुः शास्त्रानुबन्ध } सं २

## ब्रह्मवर्चसम् ॥

पुरुषायुषजीविन्यो निरातङ्का निरीतयः ।
यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसम् ॥

इति रघुवंशे दिलीपस्य वसिष्ठं प्रति वचनम् । अत्र प्रतिपादिते कार्यकारणभावे वैदिकस्य यस्य कस्यापि न विप्रतिपत्तिलेशोऽपि भवितुमर्हति । एवं चेत् कारणस्य ब्रह्मवर्चसस्य विरहात् सम्प्रति सर्वविधा अनर्था जनान् बाधन्त इति वक्तव्यम् ।

किं तद् ब्रह्मवर्चसं नाम । कथं सम्पाद्यम् ? कैः सम्पाद्यम् ? कथमिदानीं तन्नास्ति । कथं नष्टम् । किं इतःपरं कथमपि कैश्चित् सम्पादयितुं शक्यम, अथवा अत्यन्तमेव तिरोभूतम् ।

पुरुषायुषजीवित्वादिकं प्रजानां यथा सम्पद्येत तथा संविधानं चिन्तनं वा कस्येदानीं प्राप्तम । ये वयं वैदिकाः शास्त्रज्ञा धर्मज्ञा उपदेष्टारः तेषामस्य विषयस्य च कश्चन सम्बन्धोऽस्ति न वा ।

इमाश्चिन्ताः सर्वदा अस्मान् बाधन्ते । यदि अन्येऽपि ये केचित् एवं चिन्तानिरन्तरचेतसः सन्ति तान् वयं जिज्ञासामहे । तैः समानसुखदुःखा भवितुमिच्छामः ।

# आशयविवरणम् ॥

## (१) पूर्वाभ्यधिकः ॥

रघुवंशे चतुर्थे सर्गे दिलीपानन्तरश्लोकव्याख्याने (लब्धबहुलप्रचारे निर्णयसागरमुद्रणे )

पूर्वेभ्योऽधिकसन्तापोऽभूदित्यर्थः

इति स्थितं अविज्ञेयार्थमिति चिरात्पूर्वमवोचाम । तदानीमेव केचित् 'कुतो ऽविज्ञेयार्थम् । पूर्वेभ्यः सन्तापेभ्योऽधिकः सन्तापः रघुकुलेऽभूदित्यर्थो हि सुवचः' इत्यलिखन् । अत्र तत्त्वजिज्ञासया अस्मान् पृष्टवतः प्रति वक्तव्यं तदैवोक्त्वा शान्तिकामाः पत्रिकायां किमप्यलिखितवन्तोऽभूम । इदानीं तु निर्बन्धात् स्वाशयं विवृणुमः ।

महाभाष्यकारप्रभृतयः अपार्थोदाहरणतया 'दश दाडिमानि' इत्याद्युदाहरन्ति । अत्र सर्वाणि संस्कृतपदानि । नासाधु किमपि पदम् । प्रतिपदमर्थोऽप्यस्ति । किं कश्चन वाक्यार्थः कल्पयितुं न शक्यते । अथापि सङ्गतस्य कस्यचिदर्थस्य विरहमपेक्ष्य अपार्थत्वमाहुः । एवं अस्य यथास्थितस्य व्याख्यानवाक्यस्य प्रकृतसङ्गतोऽर्थः कश्चिद्दुर्वच इत्याशयेन अविज्ञेयार्थत्वमब्रूम ।

अथाद्य परोक्तोऽर्थः सङ्गतो न वेति चिन्तनीयम् । 'पूर्वं प्रधूमितोऽग्निरिदानीमुत्थितः' इति मूलम् । 'दिलीपकाले प्रधूमितोऽग्निः सन्तापाग्निः प्रज्वलित इव' इति व्याख्याने प्रकृतात् पूर्वं वाक्यम् । अत्र सावधानमिदं द्रष्टव्यम् । सन्तापाग्निरेकः । स दिलीपकाल एवोत्पन्न प्रकर्षेण धूमितत्वावस्थां प्राप्त आसीत् । रघुराज्यप्राप्तौ ज्वलितत्वरूपमुद्रिक्तमवस्थान्तरमभजदिति अवस्थाद्वयं तस्य एकस्य मूलव्याख्यानाभ्यामुभाभ्यां प्रतिपाद्यत इति ।

'पूर्वं प्रधूमितो योऽग्निः स इदानीं उत्थित इव' इत्युद्देश्यविधेयभावो विवेक्तव्यः । अत्र पूर्वमिति क्रियाविशेषणम् । पूर्वस्मिन् काल इत्यर्थः । पूर्वमग्निरासीत् स च प्रधूमित आसीत् । एतावानर्थो ज्ञातः उद्देश्यः । तमनूद्य प्रज्वलितत्वरूपो गुणो विधीयते । अग्नेस्तु न विधानम् । एवमक्षरतः प्रज्वलितत्वस्य विधेयत्वे प्रतीते प्रकृतरघुवर्णनोपयोगितया फलितमर्थं विशिष्टविधिन्यायेनाह व्याख्याता 'पूर्वाभ्यधिकः सन्तापोऽभूदित्यर्थः ।' इति । पूर्वात् पूर्वकालात् अभ्यधिकः पूर्वाभ्यधिक इति विग्रहोऽर्थश्च । पूर्वं पूर्वस्मिन् काले यावान् ततोऽधिकः पूर्वं यावदार्तिकरत्वमसह्यत्वं वा ततोऽधिकेन आर्तिकरत्वेनासह्यत्वेन वा विशिष्टः सन्ताप इति पर्यवस्यति । तथा चात्रापि अनुवर्तमानस्य एकस्य सन्तापाग्नेः अधिकत्वावस्थाभेदमात्रं पूर्ववाक्यानुगुणं प्रतिपादितं भवतीति सामञ्जस्यात् इमं 'पूर्वाभ्यधिकः' इति पाठमाद्रियामहे । एवं सङ्गतः समञ्जसोऽर्थः 'पूर्वेभ्योऽधिकः' इत्यत्र न भवति । तथा हि । (1) सन्तापानेकत्वेऽत्र न किञ्चित् प्रमाणम् । (2) यः पूर्वं प्रधूमितः स इदानीं प्रज्वलित इति एकत्वप्रतीतिः तदनेकत्वे बाधकं प्रमाणम् । (3) पूर्वमिति कालवाचि क्रियाविशेषणं तद्व्याख्याने पूर्वपदस्य सन्तापरूपार्थान्तरवाचकत्वे बाधकं प्रमाणम् । (4) पितुः पट्टाभिषेककाले उत्पन्नः सन्ताप एक एवाविच्छिन्नश्चिरादन्ववर्तत । "अयं तावन्म्रियताम् । अस्य पुत्रो यदा राजा भवति तदा वयं तं जयेम" इति मनोरथं कुर्वाणा आसन् दिलीपजये निराशाः सन्तप्ता राजानः । ततः इन्द्रमप्यभियुद्ध्य ख्यातकीर्तिं रघुं राज्ये प्रतिष्ठितं श्रुतवतां राज्ञां स सन्तापः न परं शशाम । प्रत्युत ववृधे इति राज्ञां उत्तरोत्तराभिवृद्धनिरन्तरचिन्तासन्तानदायितया महापराक्रमशालित्वं रघुकुलस्याभिव्यञ्जयदिदं सन्तापस्यैकत्वमत्यर्थं प्रयोजनवत् रसपरिपोषकारि । एतद्विपरीतं बहुत्वम् । कदाचित् उत्पन्नः सन्तापस्तदानीमेव वा किञ्चित्कालानन्तरं वा नष्टः । राजानो निश्चिन्ताः निः-

KENDRIYA SANSKRIT VIDYAPEETHA TIRUPATI.

सन्तापाः कञ्चन कालमासन् । पुनः कदाचिदेवम् । पुनः कदाचिदेव-मिति रघूणां विक्रमोत्कर्षप्रतीतिप्रतिरोधात् । तथा च रसविरोधोऽपि सन्तापानेकत्वे बाधकं प्रमाणमिति स्थितम् । 'ज्ञानवैराग्यराशये' इत्यत्र राशिपदसमभिव्याहारो ज्ञानवैराग्यानेकत्वे साधकं प्रमाणम् । न च किञ्चि-द्बाधकमिति विशेषः ।

एवं चास्यार्थस्य सङ्गत्यभावात् अर्थान्तरानुपपत्तेश्च अविज्ञयार्थ-त्वमस्य पाठस्य अस्माभिरुक्तपूर्वं न विदुषां वैमनस्यकारि भवितुमर्हति ।

---

## (२) विद्यमानयोः ।

अत्र प्रकाश्यमाने सुभाषितनीवीव्याख्याने अतीतसाञ्चिकायां ५१ पुटे

अपुत्रतया हतपुत्रतया च विद्यमानयोः पित्रोः

इति दृश्यते । अत्र 'खिद्यमानयोः' इति भाव्यमिति यः कोऽपि जानीयात् । तद्वयं न व्यजानीमिति केचिदुपहसन्ति । सत्यमेतद् व्याख्यानं यदि प्रकाश-नाय हस्तान्तरगतमभविष्यत् अत्रैवं विपरिवर्तनदशामन्वभविष्यत् । प्रौढानां व्याख्यातॄणां मुखात् साक्षादागतोऽयं रसवान् पाठश्च अपुनरुपलम्भं विनष्टोऽभविष्यत् । यतस्तु

मत्तःस्मृतिर्ज्ञानमपोहनं चेत्याह स्म यः पार्थरथोपविष्टः ।
स देशिकात्मा हृदि मे विदीप्ता बुधेन्द्रबुद्धौ स्थितमर्थमाह ॥

ततः आपाततः प्रतिभातमन्यथाभावं विमृश्य बुद्धिपूर्वमुपेक्ष्य यथामातृक-मिदमुद्यत । नेमे हेतौ तृतीये अपुत्रतया हतपुत्रतयाचेति । अपुत्रत्व-हतपुत्रत्वरूपहेत्वोरभावात् । वस्तुतस्तयोर्जीवत्पुत्रत्वात् । विमृश्य स्वमरणं माभूदिति स्वयं स्वपुत्रं हननाय दत्तवतोः पित्रोः अष्टादशवर्षानन्तरं खेदवर्त-मानताकथनस्यानतिप्रयोजनत्वाच्च । किन्तु उपलक्षणार्थे तृतीये । अपुत्र-

स्वहतपुत्रत्वोपलक्षितसत्ताकयोरित्यर्थः । अविद्यमानमुपलक्षणमिह विवक्षितम् । चोरत्वेन गृहीते स्थाणौ अयं चोरत्वेन स्थितः इतिवत् । अपुत्रं हतपुत्रं चात्मानं मत्वा स्थितयोरिति पर्यवसानं बोध्यम् । उपरि प्रतिपाद्यमानो हर्षः प्रियातिथिसमागमजनितहर्षवत् अचिन्तितधनाद्यागमजनितहर्षवच्च न पूर्वं खेदवचनमपेक्षते । ननु वर्षगणेऽप्यतीते पित्रोः पुत्रखेदः किं न स्यात् । क आह नेति । एवमर्थशक्त्या ध्वनिरस्तु खेदस्य । कण्ठोक्तिः किमर्था ।

---

## (३) तथ्यम् ।

(1) मन्दिरेक्षणालेखेषु यावत्कोशावष्टम्भेन पक्ष्यर्थस्थापनवैयग्र्यं परैः प्रादर्शि तावद् वयं तैरुक्तं उपाध्यायोक्तिविश्वासं नागणयाम । अन्ते ते 'द्वयोः पण्डितप्रकाण्डयोर्विस्रम्भादेव आजगृहे' इत्यवोचन् । 'तद्विस्रम्भमात्राधीन आग्रहः । न प्रमाणावष्टम्भाधीनः । प्रमाणं प्रति न वयमुपरोद्धव्याः' इत्यभिप्रायोऽत्र स्फुटः । एवं विस्रम्भमात्राधीनत्वं यदभिनिवेशस्य तद्वास्तवमिति गृह्णन्तो वयं 'तत् तथ्यमिति गृह्णीमः' इत्यलिखाम । अनेन प्रकृतविचारस्य न किमपि भवति । तद्वयं तत्रैव अनुपदं स्फुटीकुर्वन्तः स्मः 'कोशसद्भावस्य वा तत्प्रामाण्यस्य वा साधनभरो हि सम्प्रति अन्यत्र संक्रान्तः' इति वदन्तः ।

आदावेव 'विस्रम्भमात्रावलम्बी अस्मत्पक्ष' इति प्रकाशने चिकीर्षिते कोशान्वेषणप्रयासः परेषां तत्स्वरूपप्रामाण्यविमर्शोऽस्माकं च अनपेक्षितोऽकर्तव्योऽभविष्यदित्येतत्स्पष्टमेव ।

(2) "महत्यनर्थे पतिताः सीदेम" इत्यवोचाम । शास्त्रप्रमाणकानामस्माकं अर्थानर्थौ शास्त्रावसेयौ ।

नानेन अर्धेन अवसितो मदिरेक्षणालेखः । अपि तु 'भाव्यं तद् भव्यबुद्धिभिः' इत्यनेन अवसितः । अस्मात् श्लोकात् पूर्वं स्थिता रेखा मुद्रणे स्खालित्यादिति अर्थपर्यालोचनया ज्ञातुं शक्यम् ।

---

(3) **म, म. परवस्तु रङ्गाचार्यपौत्राणां लेखोऽयं प्रकाश्यते ।**

6—9—45

*Dear Sir,*

Yesterday afternoon I received a letter from my brother in reply to your note about *Madira* I am quoting what he wrote:

'Your letter of the 28th instant to hand as also the note of your Curator. I made a search in the bundles of grandfather and Kosas also. **रामायण** bundles and **निघण्टु** bundles do not contain the word **मदिर** or **मदिरा**. **नामपाठ** bundles and **शब्दार्थ** bundles contain the word **मदिरा** only in the sense of '*liquor*' only. I searched about 30 **निघण्टु कोशाः** of our library but none contains '**मदिरो मत्तखञ्जनः**' .......

*Yours sincerely,*

**P. V. Ramanujaswami.**

---

(४) **न (प्र)** ।

बुधरञ्जन्यां (१४६ पुटे) 'न(प्र) भश्यति' इत्यादौ किमपि वदन्ति । अत्र तत्त्वं अत्रैवान्यत्र स्थिते 'महोपकार'लेखे द्रष्टव्यम् ।

---

(५) **विमुञ्चथ** ।

'अन्या वाचो विमुञ्चथ' इत्युपनिषद्वाक्यम् । किमत्रान्यथाकरणं युक्तम् । अत्रान्यथाकरणविरहः किमस्माकमाग्रहमात्राधीनः ।

---

(६) वैदिकम् ।

वैदिकपदविचारे अस्मान् प्रति किमप्युक्तमिति न वयं स्मरामः । आवश्यकत्वे तत्राप्यस्मदीयमभिप्रायं स्फुटतरमावेदयिष्यामः ।

---

मूढो भवानि विपरीतमतिर्भवानि
भ्रान्तो भवानि सहजा हि नरस्य दोषाः ।
एष स्थितोऽस्मि तु यथाशकनं चिरत्न-
सूक्त्यर्थनाशननिरोधनिरूढभावः ॥

---

# पूर्वत्रासिद्धम् ॥

(V. R. Srinivasa Tatacharya Siromani)

अत्र कौमुदी—‘अधिकारोऽयं, तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्’ इति वर्तते । इह अस्यार्थोऽधिकारत्वे फलं शास्त्रासिद्धत्वपक्षश्च प्रत्यपाद्यत । अत्र परस्यासिद्धत्वं किं पूर्वत्र कर्तव्ये उत ‘नमुने’ इतिवत् पूर्वत्रेत्यस्य विषयसप्तमीत्वाश्रयणेन पूर्वशास्त्रविषये इत्यर्थ-लाभात् तस्मिन् कर्तव्ये कृते चेति शङ्का भवति । अत्र उत्तरपक्ष एव बहुग्रन्थादृतः । तथा हि— मनोरमायां अच्सन्धिप्रकरणे ‘न विसर्गं’ इति प्रतीकं धृत्वा ‘अत्र च (सुखार्तः, प्रार्छतीत्यनयोः) कार्यकालपक्षे बहिरङ्गत्वादसिद्धत्वमपि बोध्यम्’ इत्यभण्यत । अत्र शेखरे निर्देशादिति प्रतीकमुपादाय कर्तरि चर्षीत्यादौ पदद्वय-संबन्धिवर्णद्वयाश्रितत्वेन परनिमित्तकत्वेन च बहिरङ्गस्य गुणस्य अन्तरङ्गे विसर्गे कर्तव्ये असिद्धत्वाद्रेफाभावेन न विसर्ग इति मनो-

---

पूर्वसञ्चिकोपपादितमृन्मयशब्दे, छन्दसि ‘यरोऽनुनासिकेऽनुनासिको वा’ इति, लोके ‘प्रत्यये भाषायां नित्यम्’ इति नकार इत्यनुसन्धेयम् ।

रमोक्तरीत्या आशङ्क्य विसर्गस्यापि उक्तहेतुभ्यां बहिरङ्गत्वमुपपाद्य त्रिपादीस्थेऽन्तरङ्गे कार्यकालपक्षेऽप्यन्तरङ्गपरिभाषाया अनुपस्थितिरेवोचितेति महाभाष्योक्तहेतुपुरस्सरमभ्यधायि । तदुक्तहेतूपन्यासस‌ङ्ग्रहस्त्वेवम्—'खरवसानयोर्विसर्जनीय' इति सूत्रे भाष्ये 'नार्कुटो', 'नार्पत्य' इत्यत्र रेफस्य विसर्ग 'विसर्जनीयोऽनुत्तरपदे' इति वार्तिकेन 'उरण्रपर' इति सूत्रस्थवार्तिके 'विसर्जनीयप्रतिषेधः' इत्यर्थत उपात्तेन वारयित्वा एतन्न वा वक्तव्यम् अन्तरङ्गपरिभाषया बहिरङ्गवृद्धेरसिद्धत्वात् रेफस्यान्तरङ्गो विसर्गो न भविष्यतीत्याशयकं 'न वा बहिरङ्गलक्षणत्वात्' इति वार्तिकमुपन्यस्य नैष युक्तः परिहारः कार्यकालपक्षे त्रिपाद्यां तदुपस्थितावपि पूर्वत्रासिद्धम् इति पूर्वं प्रति परस्यासिद्धत्वात् अन्तरङ्गाभावेन पूर्वस्यान्तरङ्गनिरूपितबहिरङ्गत्वाभावाच्चया तस्यासिद्धत्वप्रतिपादनासम्भवात् । न चानया पूर्वस्यासिद्धत्वात्तदभावेन तं प्रति परासिद्धत्वं पूर्वत्रेत्यनेन वक्तुमशक्यमिति वाच्यम् । एवं हि विनिगमनाविरहादुभयोरप्यप्रवृत्तौ विसर्गो दुर्वार इत्युक्त्वा अतोऽयुक्तोऽयं परिहारो न वा बहिरङ्गलक्षणत्वादितीति न्यगम्यत । किं च पूर्वत्रेत्यस्य प्रत्यक्षसिद्धत्वेन आनुमानिकया अस्या बाध एवोचितः । एवं च त्रैपादिकेऽन्तरङ्गेऽन्तरङ्गपरिभाषाया अप्रवृत्त्या तत्प्रवृत्तिसाध्यफलसिद्धये तत्र तत्र वचनान्येव कार्याणि ज्ञापकानुसरणं वा कर्तव्यं झल इत्यपकर्षो वा कार्यः । अत एव निगाल्यते, चक्रयत्र, माषवपनीत्यत्र वैकल्पिकलत्वप्रवृत्तिः संयोगादिलोपलत्वाप्रवृत्तिश्चान्तरङ्गपरिभाषां विहाय 'तस्य दोषः संयोगादिलोपलत्वणत्वेषु' इति वचनेनैवासाध्यतेति । परिभाषेन्दुशेखरेऽन्तरङ्गपरिभाषाविवरणेऽप्ययमर्थः स्पष्टः । अत्र कर्तरि चर्षि, नार्कुट इत्यादिषु बहिरङ्गगुणवृद्ध्यादिषु कृतेषु प्रवर्तमानस्यान्तरङ्गस्य विसर्गादेः पूर्वत्रासिद्धमित्यनेनासिद्धत्वादन्तरङ्गपरिभाषाया अप्रवृत्तिरित्युक्त्या पूर्वत्र कृते परमसिद्धमित्यर्थोऽवास्तीति ज्ञायते । अत्र भस्य कुर्छुरोश्चोपधाया दीर्घो न स्यादित्यर्थके 'नभकुर्छुराम्' इति सूत्रे कुर्ग्रहणं ज्ञापकम् ।

(अनुवर्ति)

# महोपकारः॥

विचित्रो भगवत्सङ्कल्पः । अन्यत् किमप्युद्दिश्य किञ्चित् क्रियते अप्रतीक्षितं किमपि महत् फलं लभ्यते ।

ग्रन्थानां लेखनं शोधनं मुद्रणमिति कष्टतममिदं कार्यम् । समर्थस्यापि एकस्य असहायस्य बुद्धिरत्र सर्वथा अपर्याप्ता । किं पुनः भ्रमप्रमादाशक्तिनिधीनामस्मादृशाम् । यदा यदा किञ्चिदस्माभिर्लिख्यते प्रकाश्यते वा तदा तदा तत् विद्वद्भ्यः प्रदर्श्यैव प्रकाश्यमिति वयं कृतसङ्कल्पाः । यत् तैः शोधनं क्रियते तत्सादरं स्वीकृत्य कृतज्ञा भवामः । परं तु बहुभिः कारणैः इदं साहाय्यं दुर्लभं भवतीति विषण्णा अभूम ।

अद्यत्वे दैवात् कांचित् अस्यां पत्रिकायां प्रकाश्यमानानां ग्रन्थानां प्रत्यवेक्षणे शोधने च श्रद्धालवः संवृत्ता इति जानन्तः सन्तुष्यामस्तमाम् । यदि आरम्भात्प्रभृति सादरमवलोक्य शोधनीयानि स्थलानि ज्ञापयेयुः महानयमुपकारः स्यात् । ग्रन्थावसाने शोधनिकायां यथोचितं तानि अन्तर्भावयेम । उपोद्घाते उपकारस्मृतिं च कुर्याम । एवमस्मदुपचिकीर्षया प्रवर्तमानैः अत्रत्याः केचन सङ्केता ज्ञातव्या इति तान् तेभ्यो निवेदयामः ।

'उभयतः देवताद्वयतः च्यवते न(प्र)भ्रश्यति'

इति बुधरञ्जन्यां (१४६ पुटे) मुद्रितम् । अत्र 'नभ्रश्यति' इति मातृकायां स्थितम् । अत्र नकारोऽनन्वितः । तस्मात् 'न' स्थाने 'प्र' इति भाव्यम् इत्येवं ज्ञापनाय 'न(प्र)' इति वक्ररेखाद्वयसम्पुटित'प्र'शिरस्को नकारो निवेशितः । एवं

'ननु तर्हि का तावन्निजदेवता'

इति मातृकायां स्थितम् । तत्र 'तावत्' इति अनतिप्रयोजनम् । 'अस्माकम्' इत्यपेक्षितम् । तस्मात् तावदित्यस्य स्थाने 'अस्माकं' इति युक्तमित्यभात् ।

परं तु न दृढो निश्चयः । अतः प्रश्नचिह्नमपि घटयित्वा

ननु तर्हि का ताव(ऽस्माक ?)न्निजदेवता

इति न्यवेशयाम । अस्मिन्नेव पुटे

रूप (पोऽपि) ; प्रेर(क्ष)णात्

इत्यादिपर्यालोचनया एवंविधः कश्चन सङ्केतोऽस्तीति शक्यं ज्ञातुम् । [ ] इति यत्र सम्पुटो भवति तत्र अस्थितवर्णोपक्षेपः न तु स्थितवर्णपरिष्कार इति भाव्यम् । सर्वमिदमुपोद्घाते स्पष्टीकरिष्यते ।

यत्र व्याख्याने पाठान्तरमादृतं तन्मूले सम्पुटीकृत्य निवेशयन्तः स्मः । "सदै(दे)वतकाः" इति इह भाव्यम् । शोधनिकायामिदं दर्शयिष्यते ।

श्री. उ. वे. इलङ्गाडु विद्वद्-रङ्गाचार्यस्वामिनां सविधे विशिष्य प्रार्थितवन्तः स्मः-सुभाषितनीवीव्याख्यां परिशील्य अन्ते अशुद्धिस्थलानि सर्वाणि प्रति बोधनानुग्रहः कार्य इति । इमां प्रार्थनामद्य सर्वेषु सर्वविषये कुर्मः ।

---

# पाठशुद्धिः ॥

पूर्वस्यां सञ्चिकायां योगसूत्रानुसारेण 'अस्मिता' इति शोधनीयमित्यवोचाम । अस्माकं सुलभे एकस्मिन्नेव प्राचीने मुद्रणे स्थितेयमशुद्धिः । पश्चात् शुद्धमेव मुद्रणद्वयं दृतमिति ससन्तोषमावेदयामः ।

तत्तद्ग्रन्थावलोकनसमये भ्रान्त्यः प्राचीनग्रन्थाशुद्धयः तदा तदा ज्ञाप्यन्ते--यस्य कस्यापि यदा कदाऽपि यः कोऽप्युपकारलवो वा भविष्यतीति। अत्र आशयदोषकल्पनं सर्वथा अस्थाने । शुद्धं मुद्रितमित्येवं निवेदनमात्रेण विषयस्य विश्रान्तिर्भवति ।

---

# निन्दासुखम् ॥

1 लोकेन शास्त्रनिचयेन च निर्मलेन
नानाविधं समधिगम्य सुखं मनुष्याः ।
तत्प्राप्तये धृतधियो बहुधा यतन्ते
निन्दासुखस्य तु न कोऽपि जनोऽस्त्यभिज्ञः ॥

2 अज्ञं वदन्तु परितोऽपि कुतूहलेन
भ्रान्तं च किञ्च विपरीतमतिं मुहुर्माम् ।
सम्पद्यते परमसौख्यविधायि तन्मे
किं कारणं न खलु वेदितुमीश्वरोऽहम् ॥

3 वेद्यं भवेद्यदनुकूलतया सुखं तत्
प्राहुः पदार्थपरमार्थविदो महान्तः ।
निन्दाश्रुतिः सततमेव ममानुकूलां
दत्ते धियं तदिह लक्ष्म समन्वितं हि ॥

4 अज्ञानमस्ति मम यावदघं च सर्वं
तत्संविदन् जगति कोऽपि यदीह निन्देत् ।
तन्मे भविष्यति सुखाय महत्तराय
हा सर्ववेदनपटुर्न किलास्ति कोऽपि ॥

5 धिङ् मामघोरमनृजुं जड सार्वभौमं
योऽहं स्वदोषमखिलं विदितं विधाय ।
अल्पोपकारकरणेऽप्यलसोऽस्म्यनल्प-
निन्दोपकारकरणे नियतास्थितीनाम् ॥

6 मिथ्यास्तवेन विपुलेन विवर्ध्य दर्पं
गर्ते न सन्ति विनिपातयितुं कियन्तः ।
निन्दाभरं स्वयमुदुह्य निजस्वरूपे
ये स्थापयन्ति भुवि नस्त इमे हि मृग्याः ॥

7 दैवान्न बिभ्यति न बिभ्यति लोकवादाद्
दिव्यान्न बिभ्यति हि देशिकवर्गतोऽपि ।
मत्पापसंहतिनिबर्हणबद्धभावा
निन्दापरा बत परार्थपरत्वमेषाम् ॥

8 पुण्ड्रान् धरन्ति विपुलान् घनलेपदीप्रान्
भक्तिं परां भगवति प्रथयन्त्यजस्रम् ।
दिव्यप्रबन्धनिचये रसिका विभान्ति
निन्दन्ति मां च नियतं मम भूरि भाग्यम् ॥

9 हस्तीश रङ्गनृपते वृषशैलनाथ
विज्ञापनं शृणुत मे विनयानतस्य ।
धैर्येण सन्तु मम केचन दोषघोष-
दक्षक्षणा न हि भवत्स्मृतिरन्यथा मे ॥

10 हा हन्त हन्त किमहं कृतवान् दुरात्मा
स्वार्थैकनिष्ठितमनाः परहानिमिच्छन् ।
यद्वा जनस्य भुवि जन्मजुषो दुरापं
तद्यत् सुखं परहितानुपमर्दहृद्यम् ॥

11 रामानुजस्य चरणौ शरणं प्रपन्नाः
काङ्क्षन्ति ये कमललोचनकिङ्करत्वम् ।
स्वच्छन्दहासविषयीकरणेन ते मां
प्रीताः पुनन्ति किमतोऽस्तिममार्थनीयम् ॥

12 उत्कृष्टवाङ् निकृष्टे भवति हि लोके प्रशंसार्था ।
तच्छुनकादपि नीचे शुनकत्वोक्तिः स्तुतिर्भवति ॥

13 शुनकत्वादप्यवरं कमप्युपाधिं समालम्ब्य ।
निन्द्येय निपुणमतिभिर्यदा तदा स्यात् कृतार्थत्वम् ॥

14 घ्नन्तु शपन्त्वतिपरुषं वदन्तु सर्वत्र मामधिकृद्धाः ।
श्रीवैष्णवो न वेत्ति हि परीक्षितोऽहं ततो भविष्यामि ॥

15 निन्दासुखमुदीर्यैवं नीरजाक्षकटाक्षतः ।
वाचमाचकलत् सार्थां ग्रामसिंहावरः कविः ॥

16 हरिपदमकरन्दास्वादिनो मे महान्तो
ददति बहुगभीरं ग्रामसिंहाभिधानम् ।
न खलु तदहमर्हाम्युत्सहे नापि हातुं
तदवरपदयोगाद् ग्रामसिंहावरोऽस्मि ॥

...NDRIYA SANSKRIT VIDYA PEETHA TIRUPATI.

Registered No. M 2300.

Book XIX ॥ श्रीः ॥ Nos. 5 & 6

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥


पु. १९] कलि- ५०४६ } पार्थिव { मकर—साधारण सं ३
कुम्भ-शास्त्रानुबन्धः सं ३
आहत्य ,, ६


# The UDYANA PATRIKA.

## A SANSKRIT MONTHLY

January February } 1946

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. **One only.**
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava, Mimamsakesari Panditaraja* **D. T. Tatacharya Siromani M. O. L.,**
Lecturer, Sri Venkateswara College,
TIRUPATI.

SANSKRIT VIDYA PEETHA, TIRUPATI. LIBRARY.

## विषयाः ॥

शास्त्रानुबन्धः—
कुवलयानन्दः । [बुधरञ्जनीसमेतः] १५७—१६४

1 मेनका ।
2 सुभाषितनीवी ।
3 गुणसागरः ।
4 सर्वावस्था ।
5 पूर्वत्रासिद्धम् ।
6 रामस्य प्रेष्ठः सुहृत् कः ।
7 प्रकीर्णकम् ।
8 पुस्तकपरामर्शः ।

त्वात् तत्रापुरे तैः स्वच्छन्दं नाटकप्रेक्षणाय मेनकाया अनुमतिकरणाच्च मेनका तथा पलायितेति, स्वेषामुत्पन्नस्य सकलस्यावमानस्य त एव कारणमिति च मत्वा सः अतिमात्रं अमर्षमभजत। तस्यां कन्यायां किं वाच्यं किमवाच्यमित्यप्यनालोच्य तान् परिभाषितुमारभत । "तेषां तद्व्यसनं तेन एकेन दिनेन शान्तमिव । सर्वः कन्यार्थं कृतो वेषः। जामातरं प्रति श्वशुराणां आन्तरोऽभिमानः कुतः । कन्या वर्तत इति मत्वा प्रथमं नाटितकं कृतवन्त इव । गता कन्येत्यवगमानुपदं इतःपरं जामातुर्दया किमर्थेति गता अभवन् । ततः कथं ते आगच्छेयुः।" इति परुषं अतृप्तिभूयिष्ठमुवाच । तदाकर्णितवत्याः तस्याः श्वेतकन्याया मुखं कञ्चन विकारमभजत । स्वमुखं परावर्त्य सा अन्यत् किमप्यवदधतीव स्थित्वा पुनः अनादरेण मुखं तं प्रति निवर्त्य 'तेषां किल काऽपि काऽपि आपदापातिता। तस्मात् किल ते सद्यः पुरमगच्छन् । श्यामार्य इत्ययं किल भिषजो हूण्याः सकाशे अवोचत्' इत्यवदत् । तदाकर्णितवान् वराहस्वामी मनाक् सम्भ्रान्तः "का किल तेषां आपदापातिता । तं विवरं किं श्यामार्यो नावोचत् ?" इति सोपहासमपृच्छत् ।

श्वेता—सर्वं किलावोचत् । तेषु भवद्दर्शनाय तत्रागच्छत्सु मार्गे पालकाः युष्मच्छ्वशुरं स्थानकस्य अन्तर्नीत्वा तत्रामाण्डलिकेन कृतं तस्य स्थानाङ्कुशनादेशं तन्त्र्या प्रेषितं अदुः किल ।

वराहस्वामी—(अतिविस्मितः) किमाश्चर्यं कुतः किल उद्योगात् भ्रंशयामासुः।

श्वेता—स किल विरामानुमतिं विना इदं नगरमागत्य स्वकीयां कन्यामादायागच्छत् तदर्थं कैश्चित्कारणान्तरैश्च किल उद्योगान्निवर्तयन्ति स्म ।

तदाकर्णितवान् वराहस्वामी अतीव विस्मयं प्राप। श्वशुरः मद्रमागत्य कन्यामादायाऽगच्छदित्येतदेव मिथ्या। तथा स्वयं स्वसहोदर्यौ श्यामार्यश्च मनितवन्तः। मायाण्डिपिल्लै, अस्य लेखप्राप्त्यनन्तरं सममतिः न्यवर्तत। तथा सति स मद्रमागच्छदिति मिथ्याप्रवादोऽयं कथं तत्रामाण्डलिकस्य सकाशं प्रापदिति स पर्यालोचयति

स्म । स्वेन प्रेषिता तन्वी जातु माण्डलिकस्य सकाशं किन्तु गता स्यादिति मेने । कस्यापि कारणान्तरस्य अप्रतिभानात् विषयेण तथैव भवितव्यमिति दृढं मत्वा एकद्वान् निमेषान् मौनमवालम्बत । 'अपरं किं किल विपदन्तरं आगच्छत्' इति प्रपच्छ ।

श्वेता—तेषां तत्रातः प्रस्थानदिन एव रात्रौ तेषां गृहे चोराः प्रविश्य न परं सर्वं स्वं जहुः अपि तु युष्माकं श्वश्रूं अतिगाढं किल प्राहरन् । साऽपि किल वार्ता सपदि तन्वीद्वारा प्राप्ता । युष्माकं श्वश्रूः न जीविष्यतीति वार्ताश्रवणसमनन्तरमेव किल ते अगच्छन् ।

तं महादुःखकरं विषयं वक्तुमशक्नुवती दयागुणशालिनी सा श्वेतकन्या अतीव क्लिष्टा तमवदत् । तस्याश्चक्षुषोश्च अश्रु अस्रवत् । परावृत्य तन्ममार्ज । तं वृत्तान्तं श्रुतवतो वराहस्वामिनो मनः कथमपि कलुषीबभूव । बुद्धिश्च अवससाद । स सपदि स्वनेत्रे निमील्य पादनाडीकालं सुप्त्वा ततः प्रबुबुधे । तदानीं तस्य औषधक्षीरदानकालस्यागतत्वात् शुश्रूषाकारिणी भृशं प्रेम्णा औषधमन्तर्गमयामास । यतः तदौषधं उदरं विपर्यवर्तयत् । ततः सः वमितुं प्रावर्तत । सा तस्य समीपे खट्वायामुपविष्टा सती "मा स्म वान्ति कुरुत आत्मानं पर्यवस्थापयत ।" इति वदन्ती तस्य वक्षः अनुममर्श । तस्याः स्वसमीपे उपवेशनात् सः असह्यं कमपि क्लेशं अभजत । सपदि वमनं मनाक् बहिरागच्छत् । सा कन्या ईषदपि जुगुप्सां विना तत् स्वकरेण गृहीत्वा अपरतः स्थिते पात्रे क्षिप्त्वा शोधितहस्ता आगत्य तदीयं मुखादिकं स्वक्षौमखण्डेन प्रमृज्य उपोपविष्टा पुनरपि वक्षोऽनुममर्श । तस्य वमनं तावता अतिष्ठत् । सा कन्या खट्वां विहाय कदा चतुष्पद्यां उपविशेदिति सः अचिन्तयत् । यद्यपि सा लोकोत्तरापूर्वसौन्दर्यशालिनी षोडशवर्षा युवतिर्ललनामणिः । यद्यपि च महाभाग्यशालिन एव सुलभा देवलोकरम्भाप्रतिमा सा बभूव । तथाऽपि सा अन्या वनितेति मत्वा तत्स्पर्शादपि बिभेति स्म । तया प्रीत्या स्वस्य कृतान् उपचारान् प्रति कृतज्ञभावभरितमना अपि सन् सर्वथा लज्जां विना स्वयं अन्यस्त्री

वक्रचेष्टिताः निम्नस्थललाभानुगुण्येन कुटिलतरगतयः महानद्यः समेषु स्थानेषु वैषम्यं विषमेषु समत्वञ्च स्वप्रवाहवेगपरिणामेन कुर्वन्तीत्यर्थः । उच्यते हि—'पुरा यत्र स्रोतः पुलिनमधुना तत्र सरिता'मिति ।

एवमेव मेघपरत्वेऽपि । तत्र महावंशः 'जातं वंशे भुवनविदिते पुष्कलावर्तकानां' इत्युक्तो महामेघवंशः । तत्रावतीर्यापि समुद्रजलपानार्थं निम्नस्थलेऽवतीर्णाः तिर्यगूर्ध्वमितस्ततः पलायनपरतया वक्रचेष्टिताः वृष्ट्यादिभिरभिषिच्य निम्नस्थलं गाधत्वेन गाधं निम्नत्वेन च कुर्वन्तीत्यर्थः ।

एवं दुर्योधनपरतयापि । महावंशे व्यासभीष्माद्यवतरणपवित्रिते कुरुवंशे जनित्वाऽपि निम्नगाः कर्णशकुन्याद्यल्पजनसक्ताः अत एव वक्रचेष्टिताः वस्त्रापहरणादिकुटिलव्यापारनिरताः दुर्योधनादयः, सामान्योक्तेर्बहुवचनम्, समेषु विषमेषु च युधिष्ठिरराजसूयप्रकरणे समविषमस्थलेषु वैपरीत्यं वितन्वन्ति, समस्थलं विषमत्वेन विषमस्थलं समत्वेन च संभाव्य पादस्खलनमनुभूय परिहासपदं भवन्ति ।

एवं रावणपरत्वे पुलस्त्यपुलहादिमहायोगिवंशे जनित्वाऽपि नीचपरस्त्रीचौर्यादिवृत्तिमाश्रिताः कुटिलव्यापाररताश्च तत्परित्यागादिरूपहितवक्तृषु विभीषणादिषु अहितत्वबुध्या तिरस्करणं वास्तवाहितवक्तृषु प्रहस्तादिषु हितत्वबुद्धिं च कुर्वन्तीत्यर्थः ।

प्राथमिकार्थे (अन्येऽप्यर्थः) श्रीरामपरो बोध(ध्य): । महावंशे—'वंशे जातस्सवितुरनघे मानयन् मानुषत्व'मि'त्युक्ते जनित्वाऽपि निम्नगाः राज्यादिकमवधूय अरण्यवासाद्यल्पवृत्तिमाश्रिताः वक्रचेष्टिताः मृगपृष्ठानुधावनादिकुटिलवृत्तिसक्ताः, स्त्रीवाक्यनिर्बन्धेनानावश्यककार्यप्रवृत्तिरेव बुद्धिकौटिल्यमिति भावः । अथ च महानर्थे स भ(सम्भ)वति कोपवेगवशाखिलजगद्विध्वक्षादीक्षिताः समेषु विषमेषु वास्तवानपराधिषु अपराधिषु च वैपरीत्यं विनाशनोद्योगरूपं वितन्वन्ति । उच्यते हि—'नैव देवा न दैतेया न पिशाचा न

राक्षसाः । भविष्यन्ति मम क्रोधात् त्रैलोक्ये विप्रणाशिते ॥ निर्मर्यादानिमान् लोकान् करिष्याम्यद्य सायकैः । स देवगन्धर्वमनुष्यपन्नगं जगत् सशैलं परिवर्तयाम्यहम् ॥' इति । स्वयं कुटिलकार्यं कृत्वा निखिलजगद्विमथनमचतुरकृत्यमिति भावः । उक्तं हि—"मदस्त्रजनिते स्थितः क्वचन लाघवे राघव" इति ।

एवं सर्पपरोऽपि कश्चिद्वाक्यार्थः । महावंशे कश्यपमहायोगिकुले जनित्वाऽपि प्रथममुत्पद्यापि निम्नगाः देवलोकं हित्वा पाताळमाश्रिताः वक्रचेष्टिताः कुटिलतरगमनाः भुजगगतेर्वक्रतास्वाभाव्यात्, समेषु धातुसाम्यवत्सु-नीरोगशरीरेष्वपि वैपरीत्यं वितन्वन्ति । दंशनमात्रेण दर्शनमात्रेण वा सद्यो मरणपर्यन्तां व्यथामुत्पादयन्ति । तत्र हेतुमाह—(विषमेषु चेति) । एषु च सर्वेषु विषमस्तीत्यर्थः । दृष्टिविषाणां दृष्टौ अन्येषां दन्ते चेति यावत् ।

अन्योऽपि वेणुपरतया । महान्तो वंशाः वेणवो यस्मिन् कुञ्जे स महावंशः कीचकनिबिडः कुञ्जविशेषः, तन्मध्ये जनित्वाऽपि केचिद्वेणवः निम्नगाः ऊर्ध्वप्ररोहमन्तरेण तिर्यक्प्रसारमाश्रिताः । वेणुकुञ्जेषु मध्यस्थवेणव एव ऋजुतया ऊर्ध्वमारोहन्ति । पार्श्वस्थाः पुनः ऋजुमार्गालाभात् तिर्यक्प्रसृता भवन्तीति प्रत्यक्षसिद्धम् । अत एव वक्रचेष्टिताः ऋजुमार्गविरहात् मध्ये मध्ये भुग्नशरीराश्च सन्तः, समेषु विषमेषु च स्थलेषु भुग्नेष्वभुग्नेषु च प्रदेशेषु सर्वत्र वैपरीत्यं, विभिः पक्षिभिः परीतः विपरीतः तस्य भावं अनुभवन्ति । तिर्यग्गामिवेणूनां परस्परसंश्लिष्टानां कायमानादिवत् निबिडतमच्छायतया परस्परविरुद्धा अपि पक्षिणस्तत्र नीडादिनिर्माणेन नित्यवासमनुभवन्तीति प्रसिद्धिः । यथोक्तम्—'गुञ्जत्कुञ्जकुटीरे'ति' काकोलूकसाहित्यम् । यद्वा वैपरीत्यं वेणूनां परस्परसंघर्षजनितज्वलनवशेन सर्ववननाशं कुर्वन्ति । ऋजुगतीनां संघर्षविरहेण न दावोत्पादकता । वक्रगतीनामेव परस्पर-

॥ श्रीः ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. १९] कलि ५०४६ पार्थिव { मकर साधारण } सं २
{ कुम्भ शास्त्रानुबन्ध } सं ३

## गुणसागरः ॥

श्रीमद्भाष्ये द्वितीयाध्यायारम्भे—

.... अपरिमितोदारगुणसागरं निखिलजगदेककारणं सर्वात्मभूतं परं ब्रह्म वेदान्तवेद्यमित्युक्तम् ।

इति स्थितम् । अत्र विवरणम्—

सागरशब्देन समूहो विवक्षितः । अपरिमितः उदारगुणसागरो यस्येति बहुव्रीहिः ।

इति । सागरशब्दः पुलिङ्गः । 'अपरिमितोदारगुणसागरः' इति पाठेन भाव्यम् । विवरणकारैर्दृष्टः पाठः '.... सागरम्' इति । तदेव समर्थयद्भिरेतैः बहुव्रीहिर्दर्शित इति भायात् । सागर इत्यस्य स्थाने कथं सागरमित्यापतितमिति विमर्शे श्रीभाष्यकारे दाक्षिण्यं दर्शयद्भिः लेखकानामयं प्रमाद इति वक्तव्यं भवति । अन्यथा तस्यैवायं दोष इति निश्शङ्कमुच्येत । प्रतिपत्तिविशेषेणैव हि प्राय इदानीं गुणदोषव्यवस्थापनं भवति; न तु परमार्थगवेषणया ।

इयं पुनरत्र वस्तुस्थितिः । नेदमेकं स्थलं यत्रैवं अपरिमितोदारगुणसागरमिति प्रथमान्तं विशेषणं दृश्यते । किन्तु श्रीमद्भाष्य एव आत्माधिकरणान्ते—

असाकं तु स्थूलसूक्ष्मावस्थचिदचिद्वस्तुशरीरं ब्रह्म कार्यकारणोभयाव-
स्थावस्थितमपि सर्वदा निरस्तनिखिलदोषगन्धं सत्यसङ्कल्पत्वाद्यपरिमिता-
दारगुणसागरमवतिष्ठते

इत्यस्ति । श्रीमद्वेदार्थसंग्रहे (आन्ध्रलिपिमुद्रिते)

'स्वाभाविकापरिमितोदारगुणसागरं ब्रह्मैव'

इति (२० पुटे)

'सार्वज्ञ्यसत्यकामत्वसत्यसङ्कल्पत्वाद्यपरिमितोदारगुणसागरं किं ब्रह्मापि त्वया श्रुतम्'

इति (३० पुटे) च दृश्यते । अत्र आद्यस्थले

'तादृशः गुणसागरः गुणगणः यस्येति बहुव्रीहिः'

इति विवरणम् । तेन चिरन्तनोऽयं पाठ इति सुनिश्चितम् । एवं ब्रह्म-विशेष्यकत्वे सर्वत्र नियमेन क्लीबत्वे स्थिते पुल्लिङ्गशब्दान्तरविशेष्यकत्वे पुल्लिङ्गप्रयोगो दृश्यते—

'अपरिमितोदारगुणसागरः निरतिशयाश्चर्यभूतः स्थितः अहमित्यर्थः'

इति श्रीमद्वेदार्थसंग्रह एव (२०१ पु)। एवमन्वयव्यतिरेकाभ्यां भगवद्भाष्यकारैर्जागरूकतमैः साभिसन्धि एवं प्रयुज्यत इत्यवगम्यते। आपातदृष्टिभिः तत्स्थलमात्रदर्शनेन 'त्वमसि स्वभावतः समस्तकल्याणगुणामृतोदधिः' इत्यादिवत् सागरत्वं ब्रह्मण एवेति कृत्वा पुल्लिङ्गानुपपत्तिशङ्का वा पाठविपर्यसनं वा मा कारीति तत्प्रतिबोधने बद्धादरैर्विवरणकारैः 'अपरिमितो गुणसागरो यस्ये'ति विग्रहप्रदर्शनेनैव बहुव्रीहित्वे सुगमेऽपि बहुव्रीहिरिति पुनः कण्ठोक्तिः कृता । गुणा आधेयाः । ब्रह्म आधारः । गुणानां सागर इत्यत्र सागरपदेन आधारस्य ब्रह्मणो विवक्षायां तत्पुरुष एव समास इति क्लीबत्वानुपपत्तिः स्यात् । आधेयभूतं गुणसमूहं तु तेन भगवद्भाष्यकारा विवक्षन्ति । तथा च बहुव्रीहिः समासः । अन्यपदार्थो ब्रह्मेति तदनुरोधात् क्लीबत्वमिति नात्र काप्यनुपपत्तिः । इत्यभिप्रायः ।

अत्र पृच्छ्येत तत्पुरुषेणैवोपपत्तौ किमित्येवं बहुव्रीह्याश्रयणक्लेश इति । तत्र ब्रूमः । गुणाश्रये भगवति वा गुण एव वा समुद्रत्वं कृत्वा यथेच्छं व्यवहारो दृश्यते । 'दयासिन्धो बन्धो निरवधिकवात्सल्यजलधे' इति पूर्वः प्रकारः । 'श्रीनिवासदयाम्भोधि' 'दिव्ये दयाजलनिधौ दिविषन्नियन्तुः' इति पश्चिमः । अत्र आद्ये प्रकारे आधारवैपुल्यं साक्षात् प्रतीतं आधेयगुणवैपुल्यं गमयति । पश्चिमे तु साक्षादेव आधेयगुणवैपुल्यं प्रतीयते । अयमेवंविधो द्वितीयः प्रकार एव भगवद्भिः भाष्यकारैः आश्रयितुमिष्यते । उपनिषत्सु तत्र तत्र प्रतिपादितानां विशिष्टानां गुणानां सम्यङ्निरूपणेन हि 'एवंविधा एते गुणाः प्रधाने वा जीवे वा न सम्भवन्ति । अत एतदाश्रयतया अतिरिक्तः कश्चन परमात्मा नाम आश्रणीयः' इति सिद्धान्तः क्रियते । अतोऽत्र गुणस्वरूपयाथात्म्यावगमः प्राथमिकः । तेन गुणानामेव वैशिष्ट्यं सागरत्वारोपेण प्रत्याययितुमिष्यते । गुणगणसागर इति रूपकं स्यात् । ततोऽप्यतिशयितचमत्कारकारिणी रूपकातिशयोक्तिराश्रिता गुणसागर इति । गुणगणोऽतिविपुल इति व्यज्यते । एवं च वेदान्तप्रतिपाद्यसत्यसङ्कल्पत्वाद्यतिविलक्षणगुणगणाश्रयतया स्वेतरसमस्तचेतनाचेतनातिरेकेण सिद्धं ब्रह्मेति इह सर्वत्र विवक्षितोऽर्थः । नचायमर्थस्तत्पुरुषेण लभ्यत इति बहुव्रीह्याश्रयणम् ।

शाण्डिल्यविद्यायां जीवो वा परमात्मा वा प्रतिपाद्य इति विचारे 'त एते विवक्षिता गुणाः परमात्मन्येवोपपद्यन्ते' इति पूर्वमुक्त्वा अनन्तरं 'अनुपपत्तेस्तु न शारीरः' 'एतेषां गुणानां जीवेऽनुपपत्तेः नात्र जीवः प्रतिपाद्यः' इत्येतदुपपादनाय 'तमिमं गुणसागरं पर्यालोचयताम्' इत्यादि भाष्यं प्रवृत्तम् । अत्र गुणसागरमिति परमात्मनो ग्रहणं न सम्भवति । एषां गुणानामाश्रयः क इति इदानीमेव चिन्त्यमानत्वेन तदाश्रयतया अनिश्चितस्य तस्य 'पर्यालोचयताम्' इत्यनुवादायोगात् । सूत्रे तदुपादाना-

भावात् । अनपेक्षितत्वात् । पूर्वत्र गुणानामेव प्राधान्येन निर्दिष्टतया तेषामेव तमिममिति परामर्शाच्च । तथा च तमिमं गुणसागरं 'तमिमं गुणगणम्' इत्येवार्थो वाच्य इति स्थलान्तरेष्वपि गुणगणस्यैव सागरत्वं भगवद्भाष्यकाराभिमतमिति स्फुटमेवावगम्यते। एतेन उदाहृतपूर्वे श्रीवेदार्थसंग्रहस्थे पुलिङ्गविशेषणस्थले "…. अपरिमितोदारगुणसागरं पुरुषोत्तमं प्रतिपाद्य …." इति श्रीमद्भाष्ये फलाधिकरणावसानस्थे च तत्पुरुषसम्भवेऽपि बहुव्रीहिरेव भगवद्भाष्यकारहृदयानुरोधप्रसितैरादरणीयः। आहृतश्च (107 पुटे) श्रीवेदार्थसंग्रहे द्वितीयान्तब्रह्मविशेषणतया प्रयोगस्थलेऽपि विवरणकारैरीति ।

---

# सर्वावस्था ॥

"गीताभाष्यतात्पर्यचन्द्रिकायां (४. ६) '**न कस्यचिदपि स्वभावलेशस्य हानिरिति भावः।**' इति सूक्तिरस्ति । अत्र 'स्वभावलेशस्येत्यस्य स्थाने स्वभावविशेषस्येति वा स्वभावस्य लेशतोऽपि इति वा पाठो युक्त इति विमृश्यते' इति लिखन्त्यमी यतिवराः । सामान्यप्रज्ञानामेष विमर्शो नैव जायेत । कस्यचिदपि स्वभावलेशस्येति वाक्यं वस्तुतोऽशोभनमेव लोकगत्यापि । काखिदशोभनता ? इत्येव परे पुनः पुनः प्रत्यवतिष्ठेरन् । अमीषां यतीनां मतिरगृह्णादलत्यामशोभनतामिति सन्तुष्यामः । परं तु किं क्रियताम् ? सैषा श्रीसूक्तिस्तथैवावतीर्णा श्रीदेशिकलेखनीतो नान्यथेति सुदृढं ब्रूमः । अस्वारस्यं सोढव्यमेव मनाक् । दशावतारस्तोत्रे 'सर्वावस्थसकृत्प्रपन्नजनतासंरक्षणैकव्रती' इतीयं सूक्तिरिहानुसन्धेया । यां काञ्चिद-

वस्थां गतोऽपि वेति वक्तव्ये 'सर्वावस्थां गतोऽपि वे'ति केचित्प्राञ्च आहुः । तत्प्रयोगानुधावनं नात्यावश्यकम् । अथापि तदनुधावनाभिनिवेशत एवाचार्यचरणाः सर्वावस्थेति जनताविशेषणत्वेन प्रायुञ्जत । अत्रास्वारस्यं निरूपकाणां धियमधिरोहेत् । दुर्घटपाठविपर्यये तत्र या समाहितिः सा तत्सहोदरी वा अत्रापि भवितुमलम् । न तत्र काचिदशोभनतेति चेत् नात्रापि सेति प्रतिपत्तुं योग्यम् । 'नानाविधानामगतिः कलाना'मिति हयग्रीवस्तोत्रसूक्तिमपीह स्मारयितुमिच्छामः । नानाविधासु कलासु नैकामपि कलामहं पर्यचैषमिति हि विवक्षितमत्र । आस्तां चैतत् । निर्दिष्टतात्पर्यचन्द्रिकासूक्त्यचारुताग्रहणममीषां विवेचनकुशलतां व्यनक्तीति एतावन्मात्रमिह सन्तोषास्पदं नः ।"

इति केचित् लिखन्ति । अत्र सारांशा इमे—

1 तात्पर्यचन्द्रिकाश्रीसूक्तौ अस्वारस्यं, अशोभनत्वं, अचारुत्वं, अस्ति ।

2 इयमेवानुपूर्वी श्रीदेशिकमुखादागता ।

3 अन्यत्रापि एवमस्वरसं प्रयोगं श्रीदेशिकचरणाः कुर्वन्ति । दशावतारस्तोत्रे हयग्रीवस्तोत्रे च । तस्मादिहापि तादृश एव प्रयोगः तैः कृत इति निश्चीयते ।

इति । अत्र ब्रूमः ।

'कस्यचिदपि स्वभावक्लेशस्य' इत्येवंविध एव प्रयोगोऽन्यत्र यदि दृश्येत तर्हि एवं प्रयोक्तुमेषां शीलमिति कामं गृह्येत । न ह्येवंविधं स्थलं सर्वावस्थेति नानाविधानामिति च । सर्वथा यत्किमादिशब्दरहितं स्थलं हीदम् । एतदनुरोधेन यत्किञ्चिदिति प्रयोक्तव्ये सर्वशब्दादिप्रयोगः श्रीदेशिकचरणानां स्वाभाविक इति स्यान्नाम । यत्किञ्चिदादिघटितवाक्यस्य अस्वरसस्यैव ते प्रयोक्तार इति कथमितः सिद्ध्येत् । अथेमं विशेषं परित्यज्य क्वचिदस्वरसप्रयोगदर्शनादपरत्रापि तथैव भवितुमर्हतीति कृत्वा तथा निश्चय-

इति चेत् तर्हि क्वचिदपि पाठचिन्ता न कार्या । अस्वरसस्यैव स्वाभाविकत्व-निश्चयात् ।

न च सर्वावस्थेत्यत्र वस्तुतः किञ्चिदस्वारस्यमस्ति । यत्किञ्चिदवस्थ सर्वावस्थेत्यनयोरेकार्थपर्यवसायित्वात् । यः कोऽपि इदं करिष्यति सर्व इदं करिष्यति इत्यत्र किं कश्चन विशेषोऽस्ति उत न । अस्ति चेदुपपादनीयः । नास्ति चेत् सर्वावस्थेत्यत्र किमस्वारस्यम् । श्रीवेदार्थसङ्ग्रहे या

'ईश्वरप्रकारभूतसर्वावस्थप्रकृतिपुरुषवाचिनः शब्दाः तत्प्रकारविशिष्टतया ऽवस्थिते परमात्मनि मुख्यतया वर्तन्ते ।'

इति भगवद्भाष्यकारश्रीसूक्तिः तदनुरोधिनीयं श्रीदेशिकश्रीसूक्तिरित्यास्तां तावत् । यच्च नानाविधानामगतिः कलानामित्यत्र किञ्चिद्विवक्षितत्वेनो च्यते तत्र श्रीदेशिकानां विवक्षितम् । अखिलतमःकर्शनस्यासद्दर्शनस्य परिपालनाय यादृशं पाण्डित्यमपेक्षितं तस्य तादृशस्य भगवति प्रार्थना-प्रकरणं ह्येतत् । 'जिगीषतो मे कवितार्किकेन्द्रान्' 'समेधिषीय स्वच्छन्द-वादाहववद्धशूरः' इति पूर्वं स्थितेः । 'एतदर्थं नानाविधाः कला अपेक्षिताः । ता मयि न सन्ति । तदधिगमोचितमहत्तमाचार्यपर्युपासनमपि मम न घटते । तस्मात् त्वमेव दयस्व ।' इति ह्यत्र विवक्षितम् । अत्र यां काञ्चिदेकामपि न पर्यचैषमिति केवलनैच्यानुसन्धानप्रकरणोचितायाः विवक्षायाः का प्रसक्तिः ? यद्यपि यया कयाचिदपि कलया वर्जितः सर्वकलावर्जित इत्येकार्थत्वमेवेति पूर्ववत् सुवचं तथापि प्रकरणानुरोधात् सङ्गततरोऽर्थ उक्त इति ज्ञेयम् ।

अथ तात्पर्यचन्द्रिकाश्रीसूक्तिं पश्येम । तत्र प्रसङ्गात् प्रथमं पाठचिन्ता काचन कर्तव्या भवति। अत्र भाष्यम्—

अजत्वाव्ययत्वसर्वेश्वरत्वादि सर्वं पारमेश्वरं प्रकारमजहदेव

इति पठ्यते । प्रकारमिति पुलिङ्गे विशेष्ये आदीति क्लीबं विशेषणं कथम्

'-आदिम्' इति वा

'-त्वादिसर्वपारमेश्वरप्रकारमजहदेव'

इति आन्ध्रग्रन्थाक्षरकोशानुरोधेन समस्ततया वा पठितुं युक्तम् । समस्त-पाठे 'सर्वामिति' इति तात्पर्यचन्द्रिकायां प्रतीकधारणमशुद्धमिति वाच्यम् । 'सर्वेति' इत्येव भाव्यम् । समासे असमासे वा "परमेश्वरसम्बन्धि पारमेश्वरं परमेश्वरत्वप्रयुक्तमित्यर्थः ।" इति तात्पर्यचन्द्रिकायां नपुंसकदर्शनमयुक्तम् । 'परमेश्वरसम्बन्धिनम्' इति युक्तम् । एवमत्र बहुपर्यालोचनीयमस्ति । अस्तु ।

न कस्यचिदपि स्वभावलेशस्य हानिः ।

इत्यत्र पाठान्तरमुत्प्रेक्षमाणानां 'यतिवराणां' स्वामिपादानामयमभिप्रायः । अजत्वाव्ययत्वादयो बहवः स्वभावा मूले उक्ताः । न तु स्वभावले-शाः । एवं 'सर्वान् स्वभावानजहत्' इति मूलार्थे स्थिते एतद्विवरणार्थ-प्रवृत्तेन ग्रन्थेन 'न कस्यचिदपि स्वभावस्य हानिः' इत्येवंपरेणैव भाव्य-मिति । एवं श्रीदेशिकब्रह्मवादित्वादेषां स्वामिनां स्वरसेन पाठान्तरेण युक्तं भवितुमिति मतिर्भवति । श्रीदेशिके विपरीतप्रतिपत्तिमत्त्वेन तु परेषां अस्वरसत्वादेव अयमेव तन्मुखोद्भूतः पाठ इति दृढो निश्चयो भव-ति । कामं भवतु ।

इदं पुनरत्र अस्माकं भाति । अजत्वाव्ययत्वसर्वेश्वरत्वेति बहून् कल्याणगुणानुपाददानेनापि भगवता भाष्यकृता 'प्रकारं (स्वभावं) अज-हदेव' इति एकवचनमेवगते प्रयुञ्जानेन 'पारमेश्वरः स्वभावः अखण्ड एकः एकरूपः । तस्य लेशा एव अजत्वाव्ययत्वादयः कल्याणगुणा इत्ययमभिप्रायो व्यञ्जित इति सुसूक्ष्मं दृष्टवता श्रीदेशिकेन 'न कस्यचि-दपि स्वभावलेशस्य' इत्यनुगृहीतमिति यथास्थितमपि स्वरसमिति किं न स्यादिति ।

---

SANSKRIT VIDYA PEETHA ... NDRIYA
TIRUPATI.

# पूर्वत्रासिद्धम् ॥

(V. R. Srinivasa Tatacharya Siromani

(अनुवृत्तम्)

यदि कृतेऽसिद्धमित्यर्थो न स्यात् कुर्वन्तीत्यत्र 'अत उत्सार्वधातुके' इत्युत्वे कृते तपरत्वसामर्थ्यात्सापादिकगुणस्यैव त्रैपादिकस्य हलि चेत्यस्यासिद्धत्वाभावेन तद्विहितदीर्घस्यापि व्यावृत्तिः स्यादिति कुर्ग्रहणं व्यर्थं स्यात् । कृत इत्यर्थसत्वे तु उत्वे कृतेऽपि दीर्घस्यासिद्धत्वेन तपरत्वसामर्थ्याद्व्यावृत्तिर्न संभवतीति कुर्ग्रहणं सार्थकं भवति । पूर्वत्र कर्तव्ये परमसिद्धमित्यर्थोऽप्याश्रयणीयः । अत एव मनोरथ इत्यादौ 'हशि च' इत्यादौ कर्तव्ये 'रोरि' इत्यादेरासिद्धत्वादुत्वादिकं भवति । शास्त्रासिद्धत्वपक्षे संप्रति शास्त्रस्य कर्तव्यत्वं कार्यद्वारकं स्वीकार्यम् । तस्मात्कृते कर्तव्ये इत्यर्थद्वयक्रोडीकाराय पूर्वत्रेत्यस्य पूर्वशास्त्रदृष्ट्येति पूर्वशास्त्रविषय इति वाऽर्थोऽवर्ण्यत । यद्यपि हलन्तशेखरे अष्टानामित्यत्र 'पूर्वत्र कर्तव्ये नलोपासिद्धत्वेऽपि तत्र कृतेऽसिद्धत्वे मानाभावात्' इति ग्रन्थेन पूर्वत्र कृते परमसिद्धमित्यर्थोऽदूष्यत । तथापि भावबोधिन्यां 'ननु त्रिपाद्यामन्तरङ्गपरिभाषा नेति त्वयाऽङ्गीकृतम् । तत्र च पूर्वं प्रति परासिद्धत्वमेव बीजम् । यदि कर्तव्य इत्युच्यते तदेतन्न घटते । .... .... एवं च बहिरङ्गलक्षणत्वाद्वेति दूषयता त्वयापि पूर्वशास्त्रविषय इत्येवार्थः स्वीकार्य इत्यस्वरसादाह अशास्त्रीयत्वेनेति' इत्युत्तरग्रन्थावतारिकालेखनेन पूर्वत्रेत्यादिग्रन्थोऽरुचिग्रस्ततया नेयः । विषम्यान्तु 'परे तु पूर्वत्र कर्तव्ये परस्यासिद्धत्वेऽपि तत्र कृतेऽसिद्धत्वे मानाभावः । एवमेव हलसन्ध्यन्ते शब्दरत्ने स्पष्टमेवोक्तम् । ततश्चान्तरङ्गपरिभाषा कार्यकालपक्षे परिभाषान्तरवत् त्रिपाद्यां प्रवर्तत एव । तत्र तत्र वचनानि न कार्याणीति महल्लाघवम्' इत्यादिना शेखरोऽखण्ड्यत । नित्यानन्दपन्तपर्वतीयविरचिते टिप्पणे तु अन्तरङ्गपरिभाषया असाध्यानामार्तर्दित्यादिलक्ष्याणां सिद्धये वचनानामवश्यकर्तव्यत्वं त्रिपाद्यामन्तरङ्गपरिभाषाप्रवृत्त्यङ्गीकारे भविष्यतीत्यादिलक्ष्यासिद्धिं च निरूप्य पूर्वदृष्ट्या परमसिद्धमित्यर्थोऽकथ्यत । गुरुप्रसादे तु, शेखरस्थस्य पूर्वं प्रती-

स्यस्य बहिरङ्गशास्त्रं प्रतीत्यर्थमभिप्रेत्य सदाशिवभट्टीये यत् कृतेऽ-सिद्धत्वे प्रमाणोपन्यसनं अष्टानामित्यत्रत्यग्रन्थस्यारुचिग्रस्तत्वेन नेत-व्यत्वाभिधानञ्च तत्सर्वं विफलम्, पूर्वं प्रतीत्यस्य सापादिकपरि-भाषाशास्त्रं प्रतीतिव्याख्यानेनैव प्रकृतग्रन्थनिर्वाहादिति वाक्या-र्थचन्द्रिकामनुसृत्याख्यायत । (अनुवर्ति)

# रामस्य प्रेष्ठः सुहृत् कः ॥

(वैद्यरत्न पण्डित यम् दुरैस्वामि अय्यङ्गार्, ए. के. ए. लि.
आयुर्वेदभूषण आयुर्वेदाचार्य)

[मद्रपुरसंस्कृतपरिषन्निर्वर्तितवाल्मीकिमहर्षिमहोत्सवावसरे
तदुत्सवमुद्दिश्य विरचय्य पठितोऽयं निबन्धः ।]

पीठिका ।

रामो नाम जनैः श्रुतो नियतधीर्वीराग्रणीः सत्यवाक्

धामाशेषगुणव्रजस्य धृतिमांश्चारित्रतोऽन्यादृशः ।

सामान्येतररूपवानिति जना आ ब्रह्मवित्कौशिकात्

आसामान्यनिषादमस्य सुहृदोऽभूवन्नुदारात्मनः ॥

श्रीरामभद्रस्य अपहसिताहङ्कारकान्ता पेशलता, वयसा विद्यया वैरण्यगुणैश्च वरीयस्सु स्पृहणीयः प्रश्रयः, अभिजनाभिनन्दिता स्मितपूर्वा-भिभाषित्वप्रकृतिः, सुप्रसन्नावदाता सुजनानन्ददायिनी मुखश्रीः, अशेषेषु चाश्रितजनेषु अकारणाविष्कृता वत्सलता, प्रनिहतदोषलेशा प्रकृतिमधुरा व्यवहृतिः, प्रसन्नगम्भीरा प्रव्यक्तसत्त्वगुणसम्पन्ना मूर्तिरपि च जगति कं वा जनं तस्य प्रीतिपरवशं न कारयेयुः । अद्य,

गीर्वाणसाहित्यसमानियोगमाहृत्य जन्माहनि राघवस्य ।

आलोच्य वाल्मीकिमहर्षिकाव्यं प्रेष्ठः सुहृद् शरेथर्विचेयः ॥

## प्रधानसुहृदः षट् ।

प्रेष्ठः सुहृत् को नाम रामस्येति प्रवृत्तमात्र एव प्रश्ने विमर्शनपराणां विदुषां तदितरेषां च हृदि नामान्यमीषां सपदि पदमादध्युः । ते हि नाम—'निषादानां पतिः पक्षिराजो गुरुजटायुषौ । हनूमज्जाम्बवन्तौ च विभीषणकपीश्वरौ ॥ एते सुप्रथिता आप्ता रामस्येति जना विदुः । तेषु प्रेष्ठः सुहृत्तस्य कः स्यादिति विमृश्यते ॥" रामस्य चैतेषु एकैकेन सह कीदृशः कियान् वा प्रणयः समभूदिति सम्यग् विमर्शनानन्तरमेव विषयनिर्णयं कर्तुं प्रभवामः । अतः श्लोकयोः मयाऽभिहितपूर्वयोर्निर्दिष्टं क्रममनुरुद्ध्य प्रतिमित्रं काकुत्स्थः कीदृशीं मैत्रीं अध्यवहदिति परिशीलयामः ।

### १ गुहः ।

तेष्वादौ गुहमिह गृह्णीमः । असावेव, रामस्य अयोध्यातो वनवासाय प्रस्थानानन्तरं, तेन सह समागममधिगतः प्रथमः सुहृत् । सत्यपि निषादाधिपस्य कुलेन सुतरां अवरत्वे, तं आत्मसमकक्ष्यायां आरोप्य रामस्तं प्रियमित्रत्वेनैव पुरस्कुरुते स्म । 'तत्र राजा गुहो नाम रामस्यात्मसमः सखा । निषादजात्यो बलवान् स्थपतिश्चेति विश्रुतः' । इति । 'भुजाभ्यां साधुवृत्ताभ्यां तं स्पृशन् वाक्यमब्रवीत् । दिष्ट्या त्वां गुह पश्यामि नीरोगं सह बान्धवैः ॥' इति च (रा. २. ६०) वचने निकृष्टजातिसम्भवमपि निषादराजं स्वात्मनः समुचितं प्रियमित्रमित्येव सुव्यक्तमभिधाय राघवक्रोडोपगूहनादिना तयोः सौहार्दं हार्दमिति च नूनमवष्टम्भयतः । 'महतां साधुवृत्तानां न नीचोच्चत्वभावना । मैत्रीप्रवाहो मित्रेषु तद्वैषम्यमपोहति' ॥ किञ्च 'न हि रामात् प्रियतरो ममास्ति भुवि कश्चन ।' इति, 'सोऽहं प्रियसखं रामं शयानम्' इति, 'नरेन्द्रपुत्रे गुरुसौहृदाद्गुहो मुमोच बाष्पम्' इति च (रा२. ५१) गुहस्य रामविषये विद्यमानं सख्यस्यवैशिष्ट्यमपि वाल्मीकिर्विशिनष्टि । निषादाधिपे रामेण निक्षिप्ताया निरति-

शयमैभ्याः प्रमाणमपि, मुरारिः 'तीर्त्वा भूतेशमौलिस्रजममरनदीं आत्मनासौ तृतीयस्तस्मै सौमित्रिमैत्रीमयमुपहृतवान् आतरं नाविकाय' (५-२) इति लक्ष्मणे भ्रातरि यावती प्रीतिराहिता तावतीं नाविकाय गुहायाप्युपहृत्य तामेव समुचितमातराख्यं पण्यमुपाकलयदिति च वर्णनवैखर्या निपुणं निर्दिदेश । अतः श्रीरामभद्रस्य प्रधानमित्रेषु अन्यतमोऽसौ गुह इति व्यवहारयोग्यं भाग्यं गुहः स्वयमध्यगच्छत् । (अनुवर्ती)

# प्रकीर्णकम् ॥

---

## B. A. TEXT.

उपाख्यानमालायां २२६ पुटे

सोमवारिनभोहुताशनसोमपालितस्वाकृतिम्

इति पठित्वा

and whose body is gaurded by the moon
and by water. Fire, Wind and Sky—

इति विवरणमपि कृतमुपलभ्यते । अत्र चिरात् पूर्वमस्माभिः श्रुतः पाठः

सोमवारिनभूहुताशनसोमपानिलखात्मकम्

इत्येवंरूपः । अत्र वृत्तभङ्गस्य वा अनुपपत्त्यन्तरस्य वा नास्ति प्रसङ्गः ।

सोमः चन्द्रः । वाः वारि । इनः सूर्यः । भूः भूमिः । हुताशनः अग्निः । सोमपः यजमानः । अनिलः वायुः । खम् आकाशः । एते आत्मानः शरीराणि यस्य तम् । अष्टमूर्तिधरमित्यर्थः । एतदनुसारि भाषान्तरविवरणम्

and Whose forms are the Moon, Water,
the Sun, the Earth, Fire, Sacrificer, Wind
and Ether.

इत्येवं भवितुमर्हति ।

---

## INTERMEDIATE TEXT.

श्रुत्वा तथाविधं मृत्युं कैकयीतनयः पितुः ।
मातुर्न केवलं स्वस्याः श्रियोऽप्यासीत् पराङ्मुखः ॥ १३ ॥
ससैन्यश्चान्वगाद्रामं दर्शितानाश्रमालयैः ।
तस्य पश्यन् ससौमित्रेरुदश्रुर्वसतिद्रुमान् ॥ १४ ॥
चित्रकूटवनस्थं च कथितस्वर्गतिर्गुरोः ।
लक्ष्म्या निमन्त्रयांचक्रे तमनुच्छिष्टसम्पदा ॥ १५ ॥

इतीमे रघौ द्वादशे स्थिताः श्लोकाः एकवाक्यतया योजनीयाः । कैकेयीतनय इति प्रथमश्लोके उपात्तस्य कर्तुःउत्तरत्र तच्छब्दादिना परामर्शविरहात् । उत्तरश्लोकद्वये चकारेण समुच्चयप्रकाशनाच्च । एकवाक्यतया च भरतस्य पितृमृत्युश्रवणानन्तरं राज्यात् पराङ्मुखीभवने श्रीरामसकाशगमने तस्य लक्ष्म्या निमन्त्रणे च त्वरातिशयः विलम्बाभावः प्रत्याय्यते ।

---

कश्चित्—(पार्श्ववर्तिना बालेन सह स्थितां काञ्चित् प्रति) कस्तवायं बालः ।

सा—अस्य पिता यस्य श्वशुरः तस्य पिता मम श्वशुरः ।

---

स्थूलः—किमरे गर्दभवत् आगत्य ममोपरि पतसि ।

अन्यः—न महन् । जीर्णकुड्यमत्या पतितोऽस्मि ।

(विकटः)

# पुस्तकपरामर्शः ॥

केनोपनिषद्भाष्यम् । श्रीरङ्गरामानुजविरचितम् ।

श्री K. C. वरदाचार्य D. T. ताताचार्याभ्यां भाषान्तरानुवादेन विपुलया संस्कृतटिप्पण्या च सम्पादितम् । तिरुपति श्री वेङ्कटेश्वर ओरियण्टल् सीरीस्—अत्र अन्तर्गतम् । रूप्यद्वयमूल्यम् ।

अत्र इदम्प्रथमं विशिष्टाद्वैतावलम्बिनोऽस्य भाष्यस्य भाषान्तरे परिवर्तनं कृतम् । टिप्पणी विदुषां परीक्षणमर्हति ।

KENDRIYA SANSKRIT VIDYAPEETHA TIRUPATI.

Registered No. M 2300.



Book XIX ॥ श्रीः ॥ Nos. 7 & 8

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥


| | | | | |
|---|---|---|---|---|
| पु. १९ ] | कलि- ५०४६ ५०४७ | पार्थिव व्यय | मीन—साधारण | सं ४ |
| | | | मेष- शास्त्रानुबन्धः | सं ४ |
| | | | आहत्य | ,, ८ |


# The UDYANA PATRIKA.

A

SANSKRIT MONTHLY

March April } 1946

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari*
*Panditaraja* **D. T. Tatacharya Siromani M. O. L.,**
Lecturer, Sri Venkateswara College,
TIRUPATI.

SANSKRIT VIDYA PEETHA
TIRUPATI.
LIBRARY.

## विषयाः ॥

शास्त्रानुबन्धः—

कुवलयानन्दः । [बुधरञ्जनीसमेतः] १६५—१७२

1 मेनका ।
2 सुभाषितनीवी ।
3 पूर्वाभ्यधिकः ।
4 पूर्वत्रासिद्धम् ।
5 योगः कर्मसु कौशलम् ।
6 रामस्य प्रेष्ठः सुहृत् कः ।
7 पाठसंशयः ।

इत्येतद्विस्मृत्य सा स्वस्मिन् वर्तत इति पश्यन् तां प्रति अयोग्यत्वाभिप्रायमाकलयत्। यथेयं इदानीं तथा स्वापत्नी मेनका पूर्वं यानुपचारान् अकरोत् ते सर्वे तस्य स्मृतिमागच्छन्। "सर्वा एव। स्त्रियस्सर्वाः प्रकृत्या कापटिका अवताराः" इति स मेने। अनुपदं तामालोक्य "अहं इतःपरं न वमिष्यामि। चतुष्पद्यां भवती उपविशतु। मया ते कियान् श्रमः" इत्यब्रवीत्। तदाकर्ण्य कन्या सद्य एव उत्थाय चतुष्पद्यां उपविष्टा बभूव। क्षणात्पूर्वं पीतेन औषधेन वराहस्वामी कामपि श्रान्तिं कमपि मोहं च प्राप्य निमीलितनेत्रः अर्धनाडीकालं सुप्तः पूर्वाधिकप्रसादेन बुबुधे। तां कन्यां भित्तावर्पितां प्रतिमामिव चलनं विना स्वस्मिन्नेव दत्तदृष्टिः उपविष्टामपश्यत्। तस्य चिन्ता स्वश्वशुरविषयेष्वगच्छत्। तान् प्रति तस्याः धात्र्याः अपरमपि किमपि सविशेषं विदितं स्यादिति मन्यमानः 'किन्नाम श्वशुरं प्रति ततः परं कापि वार्ता न श्रुता' इत्यवोचत् वराहस्वामी।

श्वेता— न किमपि ज्ञायते।

वराहस्वामी— साधु। यथा तथा यातु। असाधून् यथाकथञ्चित् दण्डयेदेव भगवान्।

तदाकर्णितवती श्वेतकन्या "नैतद्युक्तं यद् भवन्त एवं भाषन्ते। भवच्छ्वशुरस्य आपतिता विपद् आकर्ण्य अन्ये वयमपि हि न सहामहे। अस्मद्रिपोरपि एतादृशे कष्टे आपतिते वयं शोचेम। तथा सति भवन्तु यं कमप्यपराधमकृतवतः श्वशुरस्य विषये यद् भवन्तो नानुकम्पां कुर्वन्ति प्रत्युत हृष्यन्ति न स धर्मः" इत्यब्रवीत्।

वराहस्वामी— यत् त्वं वदसि तत् तथ्यमेव। साधारणो धर्मोऽपि स एव। त्वमनुकम्पाभरितमना इति सम्यग् ज्ञायते। परन्तु तेषां गूढचरितानि चेत् त्वं जानीयाः न तान् प्रति इयती अनुकम्पा ते भवेत्। तानि रहस्यानि सर्वाणि प्रकाशयितुं न मे सम्प्रति मनः। सामान्यतः मनुष्यं अन्यं वा जीवमापन्नं पश्यतां मनसि नूनमनुकम्पया भाव्यम्। अथापि यदि अपराधिनो जनान् न्यायाधिपतयो दण्डयन्ति, स दण्ड उचित इत्येव हि सर्वे मन्य-

न्ते। सर्पवृश्चिकादीन् विषजन्तून् हि निर्दयं प्रहृत्य तमन्त कुर्व-न्ति। तेषु म्रियमाणेषु यद्यप्यस्मदीयं मनः खिद्यते तथापि ते वध्यं स्यादेव इत्येव हि वयं मन्यामहे। तद्वत् ते तदीया कन्या च कीदृशा इति मम ज्ञातत्वात् मदीयं मनस्तां अमंस्त। मनस्साक्षी किमुपेक्षितुं शक्यः।

तदाकर्णितवती सा श्वेतमुग्धा कमपि क्लेशमाप। अन्यस्त्री सती स्वयं सर्वथा स्वात्मनः सम्बन्धरहितान् तदीयकुटुम्बविषयान् प्रति अधिकं यद् भाषते तेन तस्य किमपायापो भवेदिति मन्यमानेव सा कामपि लज्जां कातरतां चाभजत। तस्मिन् विषये सर्वथा चिन्तारहितेव लोकस्य सामान्यन्यायं वदन्तीव चाभिनयं कुर्वती "लोके श्वशुरं श्वश्रूं च प्रति असन्तुष्टिमुद्वेगं चाभजन्तो जामातरो नैव सन्ति। युष्मद्गृहिणो गृहजनान् प्रति यो युष्माकमभिप्रायः तदनुरूपा बह्व्य आपदः तेषामापतिताः। तावता ते दुष्टा इति अतस्ते दण्डिता इति च कथनं काकतालीयन्यायमात्रानुसारि। लोके निरपराधानां मनुष्याणामापदः किं न भवन्ति। तथा क्लेशभाजो युक्तमेव शिक्षिता भवन्तीति व्यवहरणं किं धर्मः। अद्य हि यूयं मोटारशकटे लग्नाः जीवितसंशयवत्यां दशायां स्थित्वा जीविनवन्तः। युष्माभिः कृतस्य कस्यचित् पापस्यायं दण्ड इति मत्वा किमन्ये जनाः तूष्णीममुञ्चन्। एवं चेत् कर्तव्यं, लोके दुःखभाक् यःकोऽपि परेण नैव रक्षितव्यः। दरिद्रेभ्यो न भिक्षा देया। कुत इति चेत् यतस्ते स्वकृतस्य पापस्य कृते दण्डमनुभवन्ति ततस्तेषामुपकारकरणं ईश्वरसङ्कल्पविरुद्धं भवति। यूयं महान्तो घागाजीवा इति वदन्ति। शासनानि न्यायांश्च सम्यक् शिक्षितवन्तो भवेत। न युष्मासु अधिकं मया वक्तव्यम्। भिषक्-हूण्याः सकाशे श्यामायं इत्यं युष्मत्सविधास्थितलेखानुबन्धिनो विषयान् विवृण्वन् आसीत्। लेखकारणात् यूयमातुरीभूय आत्महत्यायां प्रवृत्ताः मोटारे पतिता अभवतेति सोऽब्रवीत्। इमान् विषयान् श्रुतवन्तः सर्वे, किं ते विषयाः सत्याः उत मिथ्येत्यपर्यालोच्य यदात्मवधे यूयं प्रावर्तध्वं तत् प्रति युष्मास्वेव दोषमवोचन्" इत्यब्रवीत्।

जनित्वा, स्थितानामिति शेषः । यथा सर्वधर्मान् परित्यज्येत्यत्र स्थित इत्यध्याहारस्तद्वत् । भूलोकजननात् परमेव ग्रहाणां फलदानाधिकारादिति भावः अंशे निम्नगाः, द्वादशांशादिविभजने नीचत्वमाश्रिताः । राशिचक्रे उच्चस्वस्थानादिगता अप्यंशे नीचीभूता इति यावत् । वक्रचेष्टिताः । केचित् शुभस्थानगता अपि वक्रातिचारादिना अशुभस्थाश्च भूत्वा ग्रहा इति गम्यते । समेषु विषमेषु च स्थानेषु वैपरीत्यं वितन्वन्ति । अंशे नैच्यात् शुभग्रहाणामशुभप्रदत्वं अशुभग्रहाणामशुभप्रदानशक्तिभङ्गश्च भवति । एवं समस्थानस्थानां वक्रातिचारादिना विषमस्थानगमने तद्राशिफलं विषमस्थानां समस्थानगमने च तथेति वैपरीत्यं ध्येयम् । "अतिचारे च वक्रे च तत्तद्राशिगतं फलम्" इत्युक्तेः ।

एवं महेन्द्रचापपरतयापि वाक्यार्थः । तथा हि । इन्द्रधनुस्तावत् दधीचिनामकमहर्षेः पृष्ठास्थिना निर्मितमिति प्रसिद्धं भारतादौ । तत्र च वंशशब्दः पृष्ठमध्यास्थिपरः । "वंशस्तु पृष्ठमध्यास्थिमूलभागोस्य तु त्रिक"-मिति वैजयन्ती कोशात् । तथाचेन्द्रचापः(पाः) दधीचिमहर्षेर्महति स्थूलभूते पृष्ठमध्यास्थिन जनित्वापि तद्विकारो(रा) भूत्वापि निम्नगाः निम्नं बाणसन्धानार्थं मध्ये रन्ध्रं गच्छन्तीति तथोक्ताः । यद्वा निम्नं भूलोकं गता वा रावणयुद्धकाले देवलोकात् भूलोकेऽवतरणादिति भावः । उक्तं हि श्रीमति रामायणे—सहस्राक्षेण काकुत्स्थ रथोयं विजयाय ते । दत्तस्तव महासत्त्व श्रीमन् शत्रुनिबर्हण ॥ इदमैन्द्रं महच्चापं कवचं चाग्निसन्निभम् । शराश्चादित्यसंकाशाः शक्तिश्च विमला शिता ॥ इति । वक्रचेष्टिताः— बाणमोक्षणकाले ज्याकर्षणेन कुटिलीभूताः । समेषु विषमेषु समाः स्वसदृशाः स्वाभिमुखस्थिता वा इषवो येषां ते समेषवः तादृशा ये विषमाः विषमहृदयाः शत्रवः तेषु स्वसदृशबाणवत्सु स्वाभिमुखेषु शत्रुषु विषय इत्यर्थः । उक्तं हि तत्रैव तुल्यास्त्रत्वम्—स गान्धर्वेण गान्धर्वं दैवं दैवेन राघवः । अस्त्रं राक्षसराजस्य

जघान परमास्त्रवित् ॥ इति । वैपरीत्यं मरणपर्यन्तविपरीताचरणम् । विभि पक्षिभिर्गृध्रादिभिः परीतत्वं वा वितन्वन्ति । उच्यते हि—अथ ते मच्छरैश्छिन्नं शिरो ज्वलितकुण्डलम् । क्रव्यादा व्यपकर्षन्तु विकीर्णं रणपांसुषु ॥ निपत्योरसि गृध्रास्ते क्षितौ क्षिप्तस्य रावण । पिबन्तु रुधिरं तर्षात् शरशल्यान्तरोत्थितम् ॥ अथ मद्बाणभिन्नस्य गतासोः पतितस्य ते । कर्षन्त्वान्त्राणि पतगा गरुत्मन्त इवोरगान् ॥ इति । हृदयस्य वैषम्यञ्च सदा अयुक्तचिन्तनमेव । अत एव तद्भेद इत्युक्तमनर्घराघवे—"सीतास्तनस्तबककुङ्कुमपङ्कलेपसङ्कल्पपातकिनि वक्षसि रावणस्य । न्यस्तश्शरो विबुधकुञ्जरदन्तघातरूढव्रणार्बुदचतुष्टयमध्यवर्ती" ॥ इति ।

एवं शत्रुजितमहाराजपरोऽपि । ते हि महाराजवंशे जनित्वापि राजभोगान् हित्वा वनं प्रति पलायिताः । क्वचित् निम्नगाः शात्रवानुद्रवणभयात् निम्नस्थलेषु निलीनाः । क्वचित् वक्रमार्गाश्च भूत्वा समेषु विषमेषु च स्थलेषु पाषाणशर्करादिजटिलेषु वैपरीत्यं तत्पर्यन्तानुभूतराजभोगविपरीतं पद्भ्यामनुधावनादिकं वितन्वन्ति प्राप्नुवन्तीति ।

एवं मुक्ताहारपरतयाऽपि । महावंशे पुण्ड्रेक्षुनामकस्थूलतरेक्षुमध्ये 'इक्षुभेदास्तु कान्तारवंशपुण्ड्रादयो न री'ति वैजयन्ती पुण्ड्रेक्षूणां पुळिनाविशदैर्गद्गदा मौक्तिकौघैरिति हंससन्देशे । तत्र जनित्वापि निम्नगाः मध्ये रन्ध्रगाः । स्त्रीणां कण्ठधारणकाले केचिदधोमुखीभूता वा । केचित् कुटिलाकृतयश्च । हाराणां कण्ठे धृतानां भुग्नाकृतित्वात् । समेषु हृदयोदरादिसमप्रदेशेषु विषमेषु स्तनतटादितुङ्गस्थलेषु च वैपरीत्यं वितन्वन्ति । मसृणतरोदरादिप्रदेशेषु मुक्ताहारपरिलुठने मासृण्यमपगच्छति । वैषम्यं च जायते । स्तनतटादिषु च हाराणामवस्थितिदौर्घट्यात् पूर्वावस्थावस्थितिरूपं समत्वं निर्बाधमित्यर्थः । वक्ष्यते हि 'मुक्ताहारनिषेविता अपि न तद्वृत्यै दिशन्त्यन्तर' मिति । ॥ ४ ॥

॥ श्रीः ॥

# उद्यानपत्रिका॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्षोशद्धेध:खेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. १९] कालि ५०४६ पार्थिव { मीन साधारण } सं ४
५०४७ व्यय { मेष शास्त्रानुबन्ध } सं ४

## पूर्वाभ्यधिकः (2) ॥

> दिलीपानन्तरं, राज्ये, प्रतिष्ठितमवस्थितम्, तं रघुम्, निशम्य आकर्ण्य, पूर्वं दिलीपकाले, राज्ञां हृदये, प्रकर्षेण धूमोऽस्य सञ्जातः प्रधूमितः, अग्निः सन्तापाग्निः, उत्थित इव प्रज्वलित इव । पूर्वाभ्यधिकः संतापोऽभूदित्यर्थः ।"

इति माल्लिनाथस्य व्याख्यानग्रन्थः । अत्र 'प्रज्वलित इव' इत्येवमन्तेन श्लोकस्थानां पदानामन्वयः केषाञ्चित् पदानामभिधेयार्थश्च दर्शितः । पुनरपि विवक्षितार्थस्फुटीकरणाय 'पूर्वाभ्यधिकः सन्तापोऽभूदित्यर्थः' इत्युक्तम् । 'अग्निः' इति मूलम् । इयं रूपकातिशयोक्तिः । कटाक्षार्थे 'निस्सरन्ति शिताः शराः' इतिवत् । एतद्विवरणं रूपकविन्यासेन कृतं 'सन्तापाग्निः' इति । अग्निः सन्तापरूपोऽत्र विवक्षित इति भावः । रूपकमपि परित्यज्य साक्षात् प्रस्तुतार्थकथनं अन्तिमवाक्ये 'सन्तापः' इति । 'पूर्वं प्रधूमितः (तं प्रतिष्ठितं निशम्य) उत्थितः प्रज्वलितः' इत्यत्र वक्रोक्तिपरिहारेण विवक्षितार्थकथनं 'पूर्वाभ्यधिकः' इति । प्रधूमितत्वावस्थापेक्षया प्रज्वलितत्वावस्थायामग्नेराधिक्यं भवति । तादृशमाधिक्यमिह दिलीपकालापेक्षया रघुकाले राज्ञां सन्तापस्य विवक्षितमिति भावः ।

एवं अग्निः प्रधूमितः उत्थितः (प्रज्वलितः) इत्येतेषां अलङ्कारसम्प-

सये वक्रोक्तिरूपतया प्रयुक्तानां पदानां अनलङ्कृतशुद्धप्रकृतार्थप्रतिपादनमात्रे व्याख्यातुस्तात्पर्यमिति असन्देहगन्धं प्रतीयते । तेन एतद्व्यतिरिक्तो यः कोप्यर्थ इहोच्यमानः अप्रामाणिक इति सुस्पष्टमेतत् ।

अथ पूर्वाभ्यधिक इत्यत्र कोऽर्थ इत्यत्र पूर्वात् कालात् दिलीपकालापेक्षया अभ्यधिक इत्यर्थ इत्यवोचाम । 'अतीतवत्सरात् अस्मिन् वत्सरे वृष्टिराधिका' इत्यत्र न किञ्चिद्स्वारस्यम् । प्रत्युत 'अतीतवत्सरवृष्टेराधिका वृष्टिरस्मिन् वत्सरे' इत्यत्र या अप्रौढिः यत् अगाम्भीर्यं तदभावेन सौन्दर्यमभ्यधिकम् । चैत्रान्मैत्रो बुद्धिमत्तर इत्यत्र चैत्रादतिशायितबुद्धिमान् मैत्र इत्यर्थ उच्यते । चैत्रबुद्धेर्मैत्रो बुद्धिमत्तर इत्यसमञ्जसम् । काव्यप्रकाशे तद्गुणालङ्कारप्रकरणे 'विभिन्नवर्णाः' इति माघश्लोकमुदाहृत्य "अत्र रवितुरगापेक्षया गरुडाग्रजस्य तदपेक्षया च हारिन्मणीनां प्रगुणवर्णता" इत्युक्तम् । न तु रवितुरगवर्णापेक्षयेति । प्रतापरुद्रीयव्याख्याने रत्नापणे 'भूले कस्य स्वर्गातिशायि वैभवम्' इति 'तादृङ्मध्यमलोकमाग्य' इति श्लोकविवरणे उक्तम् । न तु स्वर्गवैभवातिशायि वैभवमिति । 'नायको यदि वर्ण्येत लोकोत्तरगुणोत्तरः' इत्यालङ्कारिकाणां 'लोकोत्तरप्रज्ञेन' इति न्यायकुसुमाञ्जलौ उदयनस्य च व्यवहारः प्रसिद्धः । 'स कालातिबलः क्रूरः' इति यादवाभ्युदये श्रीदेशिकः । कालात् अतिबल इति तत्र व्याख्यानम् । 'सर्वातिरिक्तसारेण' इति कालिदासः । तत्र 'सर्वेभ्यो भूतेभ्योऽधिक बलेन' इति साक्षान्मल्लिनाथस्यैव व्याख्यानम् । न चेह 'स कालबलातिबलः' 'सर्वसारातिरिक्तसारेण' इत्येव स्वरसः प्रयोग इति केनचित् शङ्कितुमपि शक्यम् । साक्षात् वैपरीत्येन तत्त्वस्य स्थितत्वात् । अपुष्टार्थतया काव्यशोभा हि तदानीं हीयेत । तस्मादुक्तेऽर्थे न किञ्चिदवद्यम् ।

'पूर्वाभ्यधिकः' इत्यस्मिन् वार्त्तिके पाठे कोशविशेषे 'पूर्वाप्यधिकः' इत्येवंरूपे जाते पश्चात् कैश्चित् दकारप्रक्षेपेण 'पूर्वादप्यधिकः'

इति पठितम् । अथ वा विग्रहप्रदर्शनाय कैश्चित् पत्रपार्श्वे 'पूर्वादभ्यधिकः' इति लिखितं पश्चात् 'पूर्वादप्यधिकः' इति पठितम् । इत्यस्य पाठान्तरस्य दर्शने कारणं सुग्रहम् । अर्थस्तु पूर्वकालादित्येव । अधिकपदवत् अभ्यधिकपदमपि समञ्जसमित्यजानद्भिर्वा 'पूर्वभ्यधिकः' इति विकललिखितं परिष्कर्तुं प्रवृत्तैर्वा 'पूर्वेभ्योऽधिकः' इति पाठः कल्पित इत्यस्मिन्नपि पाठे कारणं सुग्रहमेव । अर्थस्तु अत्र नोपपद्यत इति विशेषः । तथा हि

1) 'सन्तापानेकत्वेऽत्र न किञ्चित् प्रमाणं' । पूर्वेभ्यः सन्तापेभ्यः इदानीन्तनोऽधिक इति ह्यर्थ उच्यते । एवं सन्तापानेकत्वमत्र विवक्षितमित्यत्र किं प्रमाणम् । यदुच्यते 'कति कति सन्तापा लोके न सन्ति' इति न तदत्र उत्तरम् । काव्यार्थविमर्शो हि संप्रति क्रियते । न लौकिकार्थविमर्शः । किमनयोर्वैलक्षण्यमस्तीति चेत् बाढम् । सुमहदस्ति । तदास्तां नाम । श्लोके वा व्याख्यानपूर्वभागे वा सन्तापानेकत्वप्रत्यायकं न किञ्चिदस्ति । तथा सति प्रधूमितत्वाद्युक्तितात्पर्यवर्णनपरेऽस्मिन् चरमे व्याख्यानवाक्ये अकाण्डे बहुत्वेन सन्तापानुवादस्य कः प्रसङ्गः । एतेन "पूर्वेभ्यः पूर्वकालेभ्यः' इत्येव गृह्यतां कामम्" इत्येतदपि समाहितम् । 'पूर्वं दिलीपकाले' इति पूर्वं व्याख्यातवता अनुपदं बहुत्वेन कालानुवादायोगात् ।

2) "यः पूर्वं प्रधूमितः त इदानीं प्रज्वलित इति एकत्वप्रतीतिः तदनेकत्वे बाधकं प्रमाणम्" । अत्र यदुच्यते "पितुरेकत्वं पुत्रानेकत्वबाधकमित्युक्तिसहोदरं ह्येतत्" इत्यादि बहुविस्तृतं तत्र साञ्जलिबन्धं च सप्रश्रयं च सभयं च सानुक्रोशं च सानुनयं च सादरं च सबहुमानं च ससत्वं च विज्ञापयामः— न पितुः पुत्रस्य च यः सम्बन्धः स इह अग्नेःसन्तापस्य च विवक्षितः । अपि त्वभेदः । 'अग्निः संतापाग्निः' इति व्याख्यानेनेदं स्पष्टम् । 'संताप एवाग्निः' इति हि तत्र विग्रहः । न तु सन्तापानामनेकोऽग्निरिति । अत एव "संतापस्य अग्नेश्च पर्यायतां नु मन्यतेऽसौ ।

नैतल्लोकविदः शास्त्रविदो वा सम्मन्येरन्" । इति न युक्तम् । काव्येषु काव्यविदामेव सम्मतेरपेक्षितत्वात् । तैश्च मुखचन्द्रादिवद्भेदस्येष्टत्वात् । चत्वारि च त्रीणि च सप्तेति वादस्य षडष्टत्वादिभिः खण्डनं चैतत् । एतदेव च व्यधिकरणमनीषाविभवस्य लक्षणम् । तस्मिन् अतत्त्वग्रहण-शीलत्वं हि तत् ।

सूर्ये सूर्यत्ववादी व्यधिकरणमतिः कोऽपि नेष्टो जगत्यां
सूर्ये लोष्टत्ववादी व्यधिकरणमतिः सर्व इष्टो जगत्याम् ।

तथा च अग्निरित्युपमाने एकत्वं श्रूयमाणं तत्र निगीर्णस्योपमेयस्य सन्तापस्य एकत्वं गमयतीति न तद्विरुद्धं बहुत्वं मल्लिनाथोक्तं भवितुमर्हतीति सिद्धम् ।

"वस्तुतः किमन्तः प्रधूमितत्वं प्रज्वलितत्वं वा अस्ति । न हि न हि" इति धर्मविषये प्रश्नप्रतिवचने क्रियेते । धर्मिणि अग्नौ को निर्णयः । नूनं बहिर्वर्तीत्येव । अथ अग्निरिति को विवक्षितः । ननु ज्वलन एव । किमि-दानीं हृदयेऽग्निरिति वदन् कविरुन्मत्त एव । उन्मत्तकल्पितस्य च हृद-याग्नेरन्तरेव प्रधूमितत्वप्रज्वलितत्वे स्तां नाम । कथङ्कारं अमुमलीकिसलय-मतिविलसितैः 'न हि न हि' इति वीप्सया तत्प्रतिषेधः क्रियते । नमोऽस्मै-व्युत्पत्तये नमोऽस्मै विमर्शाय कुर्महे ।

सर्वथा दुर्गृहीतोऽयमग्निरूष्मलतां भृशम् ।
तन्वन्नमीषु हन्ताभूद् दुर्धरानल्पजल्पकृत् ॥

देहदाहाद्युपन्यासकौशलं बहुपेशलम् ।
कं न कुर्याद् रसाम्भोधौ सज्जनं कृतमज्जनम् ॥

वाचामतीत्य विभवं यत वर्तमानं
दौरस्थ्यं यथावदवगन्तुमिह क्षमाश्चेत् ।

प्राज्ञावधीरणविकत्थनविप्रलम्भ-
व्यामोहनादिकुतुकं सपदि व्यपेयात् ॥
गम्भीरवृत्तिगृध्नुत्वान्नेदानीं विस्तृणीमहे ।
निर्बद्धास्तु करिष्यामो विस्तरं समयान्तरे ॥

यदुक्तं "शत्रुरक्षोमयं तोयमुपशोषं नयिष्यति" इति श्रीरामायणश्लोके तोयस्यैकत्वेन रक्षसोऽप्येकत्वमेवेति कथयेयुरिवैते' इति तत्र एकत्वं विना अनेकत्वं कथं वक्तुं शक्यमिति वक्तव्यम् । रूपकं ह्येतत् "तस्मै सौमित्रिमैत्रीमयमुपकृतवानातरं नाविकाय" इति परिणामवदभेदप्रधानम् । रक्षोरूपं तोयमित्यर्थः । तत्र एकमेव रक्षो रावणात्मकं ग्राह्यमिति का प्रसक्तिरनेकत्वस्य । नायं मयट् प्राचुर्यार्थे । विषमश्चायं दृष्टान्तः । रूपकस्थलत्वात् । प्रकृतस्य अतिशयोक्तिस्थलत्वात् ।

न परं दिलीपकालसन्तापानेकत्वं वयं प्रतिषेधामः । अपि तु दिलीपकाले अन्यः सन्तापः रघुकालेऽन्य इत्येवंविधमप्यनेकत्वं प्रतिषेधामः । तदिदं 'यः पूर्वं प्रधूमितः स इदानीं प्रज्वलितः' इति यत्तच्छब्दघटनेन स्पष्टम् । तेन "अथ पूर्वकालिकः सन्ताप एक एव नानेक इति वादोऽवशिष्यते प्रतिवादिनः" इति नायं यथावदनुवाद इति ज्ञेयम् । पूर्वकालिकपदं परित्याज्यम् ।

3) "पूर्वमिति कालवाचि क्रियाविशेषणं तद्व्याख्याने सन्तापरूपार्थान्तरवाचकत्वे बाधकं प्रमाणं" । अत्राहुः 'शब्दार्थोऽत्र नेदानीमुच्यते । स तावदुक्तचरः । इदानीं तु निर्गलिततात्पर्यार्थवर्णनमेव क्रियते व्याख्यात्रा' इति । सत्यमत्र तात्पर्यार्थ उच्यते । स तु तात्पर्यार्थः येषां पदानां तानि प्राङ् निर्दिष्टानि । न पूर्वपदस्य तात्पर्यार्थः कश्चिदुच्यते । तस्य स्वार्थत्वे सम्भवति किमित्यर्थान्तरपरत्वं वक्तव्यम् । पूर्वं प्रधूमित इति पूर्वपदार्थः प्रधूमितत्वावस्थायामन्वितः । एतत्स्पष्टीकरणाय पूर्वं यावत्त्वं सन्तापस्य ततो-

ऽधिकत्वमिदानीमिति कामं वक्तुमुचितम् । न तु पूर्वो यस्सन्तापः ततोऽधिकः सन्ताप इति । अवस्थापूर्वत्वस्य श्रुतस्यात्यन्तपरित्यागात् धर्मिपूर्वत्वस्य अत्यन्ताश्रुतस्य परिकल्पनात् । एतेन "पूर्वस्मिन् काले यावान् ततोऽधिकः सन्ताप इति पर्यवस्यति' इति प्रतिवादिना पर्यवसितार्थत्वेन निरूपितोऽर्थ एव साक्षादक्षरनिर्गलितो वेदितव्यः" इति यदुक्तं तन्नेति वेदितव्यम् । 'यावान् ततोऽधिकः' इति ह्यस्माभिरुच्यते । तत्र 'यस्ततोऽधिकः' इत्येतत्समानार्थत्वग्रहणं न युज्यते । यदुच्यते– 'पूर्वकालिकविद्याधिकविद्यावानधुना चैत्र इति भावः' इत्येतादृशार्थविवक्षया "पूर्वाधिकविद्यावानिति भावः" इति कोऽपि यदि लिखति तर्हि किमत्र चोद्यमवतरेत्— इति अत्र ब्रूमः । पूर्वाधिकविद्यावान् अधुना इति ह्यत्र विवक्षा । तत्र अधुना अस्मिन् काले इत्यर्थः । एतदनुसारेण पूर्वाधिकेत्यत्र पूर्वकालमात्रमेव पूर्वपदं प्रत्याययितुमर्हति । पूर्वात् पूर्वकालापेक्षया अधुना अस्मिन् काले अधिकविद्यावानिति हि समञ्जसं भवति । पूर्वायाः पूर्वविद्यायाः अधुना अस्मिन् काले अधिकविद्यावानिति तु न समञ्जसम् । पूर्वकालिकविद्याधिकविद्यावानधुनेत्यत्र प्रत्ययार्थोपसर्जनतयाऽपि पूर्वकालस्य स्पष्टं श्रवणात् असामञ्जस्यं न तथा स्फुटं प्रकाशते ।

एतेन प्रकृते 'पूर्वाभ्यधिकः सन्तापोऽभूत्' इत्यत्र निशम्य निशमनोत्तरकालं इति कालवाचिन एव पदस्यान्वयादपि पूर्वपदस्य कालवाचित्वमेव वाच्यम्, नार्थान्तरपरत्वमिति ज्ञापितम् । एतेनैव "पूर्वाधिकः सन्तापः' इत्यादौ पूर्वकालिकात् सन्तापात् अधिकः सन्ताप इदानीन्तन इत्यसावेवार्थः शाब्द इत्यप्रधृष्यमेतत्" इत्येतन्नेति चोक्तप्रायम् । 'पूर्वाधिकः सन्ताप इदानीन्तनः' इति यद्यश्रोष्यत नूनं पूर्वात् पूर्वकालिकात् सन्तापात् अधिकः अद्यतनः इत्ययमर्थोऽवश्यं वक्तव्योऽभविष्यत् । पूर्वाधिकः सन्ताप इदानीमिति तु स्थिते पूर्वकालादधिक इत्येवेति सुसूक्ष्मा दृष्टिः कर्तव्या ।

4) "पितुः पट्टाभिषेककाले उत्पन्नः सन्ताप एक एवाविच्छिन्नश्चिरादन्ववर्तत । ....ततः रघुं राज्ये प्रतिष्ठितं श्रुतवतां राज्ञां स सन्तापः न परं न शशाम प्रत्युत ववृध इति राज्ञां उत्तरोत्तराभिवृद्धनिरन्तराचिन्तासन्तानदायितया महापराक्रमशालित्वं रघुकुलस्याभिव्यञ्जयादिदं सन्तापस्यैकत्वमत्यर्थं प्रयोजनवत् । रसपरिपोषकारि । एतद्विपरीतं बहुत्वम् । तथा च रसविरोधोऽपि सन्तापानेकत्वे बाधकं प्रमाणम्" । इति चतुर्थो हेतुरस्माभिरुक्तः । अत्र वदन्ति— राज्ञामेकमेव सन्तापं रघवो ददुरिति कथनेन तेषां विक्रमोत्कर्षप्रतीतिप्रतिरोधे पटीयांस एते स्वयं परत्र एतदारोपयन्ति—इति । स्वातन्त्र्येणास्माभिः किमपि काव्यं प्रणीतं चेत् तत्र एवं किमपि वक्तुमवसरः स्यादपि । कालिदासकृतिस्तु अद्य परिशील्यते । स च 'हृदयेऽग्निरुत्थितः' इत्येकमेव सन्तापमाह । न 'हृदयेऽग्नय उत्थिताः' इति बहून् । स किं रघूणां महिमानं महयन् इत्थमाह उत लघयन् । जात्येकत्वपरतया नेयमिति चेत् काव्यविमर्शोऽयमिति पुनरपि स्मारयामः । एकत्वमिह श्रूयमाणं रसे उपयुज्यते न वा । आद्ये तद्विरुद्धत्वाद् बहुत्वमनुपपन्नमिति सिद्धम् । अन्त्ये कविरसमर्थ इति स्यात् । न हि समर्थेन कविना रसानुपयुक्तं किमपि निबध्येत ।

बिम्बोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत ।
अधुना हृदयेऽप्येष मृगशावाक्षि लक्ष्यते ॥

इति पर्यायालङ्कारोदाहरणं दत्वा काव्यप्रकाशकार आह—

रागस्य वस्तुनो भेदेऽपि एकतयाऽध्यवसितत्वादेकत्वमविरुद्धम् ।

इति । आरुण्यवर्णात्मकस्य रागस्य प्रीतिरूपस्य च रागस्य एकत्वमध्यवसाय काव्येषु रसमयो व्यवहारः प्रवर्तत इति स्पष्टमत्र पश्यामः । तथा सति चित्तवृत्तिविशेषरूपतया सजातीयानां सन्तापानामेकत्वं कृत्वा क्रियमाणे कालिदासीये रसनिबन्धे ज्वालाभेदानुमानाद्यवष्टम्भेनानेकत्वस्थापनवैयग्र्यं प्रदर्श्य प्रत्यवतिष्ठमानान् प्रति किं वक्तव्यमिति न वयं जानीमः । अथवा अग्नि-

पदर्थाग्रहणान्यथाग्रहणविभवविलसितमिदमखिलमिति कृतमत्युपमर्देन ।

पदार्थो न गृहीतौ यैस्तेषां वाक्यार्थधीः कुतः ।
तदभावे च तद्गम्ये तात्पर्ये धीः कुतस्तराम् ॥

'राजानो निश्चिन्ता निस्सन्तापाः कञ्चन कालमासन्निति को ब्रवीति' इति यत् पृच्छयते तत्र सन्तापबहुत्वसमर्थनपरा एव अहृदयमपि तथा ब्रुवन्तीत्युत्तरम् । कारणभेदेनैव बहुत्वमुपपादनीयं न कालभेदेनेति व्यवस्थाया दुर्लभत्वात् । अवर्जनीयश्च वस्तुवृत्त्या कालभेदः । यौगपद्यासम्भवात् । दुःखानामात्मविशेषगुणानां स्वोत्तरोत्पन्नविशेषगुणनाश्यत्वात् । मनस्यन्यद्वच-स्यन्यदिति इह सङ्गतम् । न मुद्रणाशुद्धिस्थले ।

तदेवमेकत्वं सन्तापस्याविच्छेदप्रत्यायनद्वारा रघुकुलस्य विक्रमातिशय-व्यञ्जनेन वीररसपरिपोषाय कल्पत इति स्थितम् । अथेदमेकत्वं राज्ञामिति बहुत्वेन सह चिन्त्यमाने 'राज्ञां परस्परं महत्यप्यन्तरे सति 'को मज्जतोरणु-कुलाचलयोर्विशेषः' इत्यनेन न्यायेन रघुदिलीपपराक्रमाधीननिकर्षवत्त्वे अवि-शेष एवे'ति महदर्थान्तरमपि व्यञ्जयति । बहुत्वमेतत्प्रतिकूलमित्यपि ज्ञेयम् ।

इदं चात्र अन्ते सञ्चिन्तनीयम् । रघुरिदानीं स्तुत्यः । कथं तदर्थं दिलीपकालसन्तापानां बहुत्वं वदन् कश्चित् रघुकालसन्तापमेकं ब्रूयात् । प्रत्युत पूर्वसन्तापैकत्वं उत्तरसन्तापबहुत्वं च हि वाच्यम् । कथंचिदुभयत्रापि वा बहुत्वम् । तदयं सर्वथाऽपपाठ इति ।

परस्य निन्दासु भजन्ति निष्ठां ये ते स्फुटं तान्हि निवेदयन्ति ।
स्वपक्षशैथिल्यधियाऽतिमात्रं यदार्तिमन्तः सततं भवन्ति ॥

प्रामाणिकीमजहतां सरणिं कदापि
क्लेशो न कश्चिदनुभाव्यदशां प्रयाति ।
दूरे मतिं जयपराजययोर्विहाय
तत्त्वस्थितिं विमृशतां न च सम्भ्रमोऽस्ति ॥

"स नो देवः शुभया स्मृत्या संयुनक्तु"

---

# पूर्वत्रासिद्धम् ॥

(V. R. Srinivasa Tatacharya Siromani

(अनुवृत्तम्)

गुरुप्रसादात्प्राचीने विश्वनाथभट्टीयेऽपि पूर्वं प्रतीत्यादिलघुश-
ब्देन्दुशेखरवाक्यसरूपपरिभाषेन्दुशेखरवाक्यघटकस्य पूर्वं प्रती-
त्यस्य वाक्यार्थश्चन्द्रिकावत् सापादिकपरिभाषाशास्त्रं प्रतीत्यर्थमु-
पवर्ण्य तदनुरोधेन तद्वाक्यं समयोज्यत। तथा च पूर्वत्र कर्तव्ये
परमसिद्धमित्यर्थमात्रवर्णनेऽपि पूर्वभूतकर्तव्यान्तरङ्गपरिभाषादृ-
ष्ट्या परभूतान्तरङ्गशास्त्रासिद्धत्वसम्भवेन त्रिपादीस्थेऽन्तरङ्गेऽन्त-
रङ्गपरिभाषायाः पक्षद्वयेऽप्यप्रवृत्तिरिति सिद्धान्त उपपद्यत एवेति
पूर्वत्र कृते इत्यर्थवर्णनं निष्फलम्। किञ्च दध्यत्रेत्यादाविव सर्वत्र
बहिरङ्गशास्त्रप्रवृत्त्यनन्तरमेव त्रैपादिकान्तरङ्गस्य प्रवृत्तिरिति यदि
नियमो भवति तदा तत्र परिभाषाया अप्रवृत्तये कृते इत्यर्थवर्णन-
मुपयुज्येतापि। न हि तथा नियमोऽस्ति, निगाल्यत इत्यत्र बहिरङ्ग-
णिलोपात्पूर्वमन्तरङ्गस्यैकलिपकलत्वसम्भवात्कर्तव्य इत्यर्थवर्णनेनापि
कर्तव्यपूर्वभूत 'णेरनिटी'ति सूत्रान्तरङ्गपरिभाषान्यतरदृष्ट्यैवाचि-
विभाषेत्यस्यासिद्धत्वेनाचीत्यत्र परिभाषाया अप्रवृत्तेर्वक्तव्यत्वात्।
एवमभ्युपगमे अष्टानामित्यत्रत्यशेखरोऽरुचिग्रस्ततया नेतव्यो न
भवति। कृते असिद्धत्वे मानाभावावेदकाशशब्दरत्नतद्व्याख्यानभा-
वप्रकाशविषमीग्रन्थाश्च सञ्जाघटाति। भट्टोजिदीक्षितादिग्रन्थेषु
क्वचिदपि कृते असिद्धमित्यर्थो वर्णितो न लक्ष्यते। दीक्षितादिमते
कर्तव्य इत्यर्थसत्त्वेऽपि कार्यकालपक्षे परिभाषान्तरवाद्विधिरेशगमना-
ङ्गीकारेणान्तरङ्गपरिभाषान्तरङ्गशास्त्रयोः पौर्वापर्याभावेन पूर्वत्रासि-
द्धमित्यस्य प्रवृत्तिरेव नास्ति। ततश्च कार्यकालपक्षे त्रैपादिकान्त-
रङ्गेषु तद्ग्रन्थोदिता अन्तरङ्गपरिभाषायाः प्रवृत्तिस्सङ्गच्छत एव।
प्रार्छतीत्यादिसिद्धये कार्यकालपक्षः राज्ञ इत्यादिसिद्धये यथोद्देश-
पक्षश्चान्तरङ्गपरिभाषाविषये मनोरमादावाश्रीयत। परिभाषेन्दु-
शेखरखण्डनपरे परिभाषाभास्करे अन्तरङ्गपरिभाषाव्याख्याने का-
र्यकालपक्षे त्रिपाद्यामन्तरङ्गपरिभाषाप्रवृत्तौ केचन हेतव आख्या-
यन्त। ते चेमे (1) दध्यत्रेत्यादौ त्रिपादीस्थेऽन्तरङ्गे संयोगान्त-

लोपे भाष्यवार्तिकयोरस्याः परिभाषायासञ्चारितत्वम् । (2) खर-वसानयोरिति सूत्रे वार्तिककृता संचारितत्वम् । (3) विसर्जनीय-सूत्रभाष्यस्य पूर्वत्रासिद्धमित्यनेन परस्यान्तरङ्गस्याप्यसिद्धत्वेन बहि-रङ्गलक्षणत्वादिति परिहारस्यायुक्ततां प्रतिपादयतश्चोद्यान्तत्वेन कैयटोक्तिः (4) वचनेनैव तत्र तत्र समाधाने गौरवम् । (5) इत्युत्त-रस्य, कर्णाष्वनव्ययस्य इत्यादिनिर्देशात् आनुमानिकयाप्यन्तरङ्ग-परिभाषया प्रत्यक्षसिद्धस्याऽपि पूर्वत्रासिद्धमित्यस्य बाध इति ज्ञापनसम्भव इति । तत्रैव वस्तुतस्तु पूर्वोक्तनिर्देशा एवान्तर-ङ्गपरिभाषां निपाद्यामस्याः प्रवृत्तिं च ज्ञापयन्तीति न्यगमयत च । यद्यपि दीक्षितादिमते पूर्वोक्तरीत्या पूर्वत्रासिद्धमित्यस्य प्रवृत्तिरेव नास्तीति आनुमानिकयाप्यन्तरङ्गपरिभाषया प्रत्यक्षसिद्धस्यापि पूर्वत्रेत्यस्य बाधकथनमनादरणीयमिति नागेशेन तन्मतस्य दूषणं परिभाषाभास्करे तद्बाधसमर्थनाय इत्युत्तरस्येत्यादिज्ञापकोपन्यसनं च न घटते । तथापि नागेशेन परिभाषाणां त्रिपादीस्थत्वस्यान-भ्युपगमात् पूर्वत्रासिद्धमिति सूत्रमन्तरङ्गपरिभाषां प्रति त्रैपादिका-न्तरङ्गस्यासिद्धत्वं प्रतिपादयत्येव । ततश्च स्वमतसिद्धां पूर्वत्रेत्यस्य प्रवृत्तिं प्राचीनाङ्गीकार्यामाकलय्य तत्सम्मतां पूर्वत्रेत्यस्याप्रवृत्तिं अन्तरङ्गपरिभाषायाः प्रवृत्तिं च मनसिकृत्य तदप्रवृत्तेः परिभाषा-बाधत्वेनाभिधानं प्राचीनमते क्रमाभावात्पूर्वत्रेत्यस्य या अप्रावृत्ति-स्तस्या एव बाधत्वेनाभिधानं वा वेदितव्यम् । (अनुवर्ति)

# योगः कर्मसु कौशलम् ॥

(K. S. Krishnan)

'कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः । एवं त्वयि नान्यथे-तोऽस्ति न कर्म लिप्यते नरे' । इति कर्मणः नरं प्रति दीर्घायुर्योगफलप्र-दत्वं सूचयन् आचार्यः कर्मणा विना इह नास्य आनन्दावहं न किञ्चिद-स्तीति अन्तेवासिनं अनुशास्ति ईशावास्योपनिषदि ।

TIRUPATI

गीताचार्यश्च हास्यगुम्भितेन वचसा पार्थम्, 'शरीरयात्रापि च ते न प्रसिध्येत् अकर्मणः' इति स्मारयन्, स्वस्य अवाप्तसमस्तकामस्यापि कर्मवर्तित्वं उदाहरति । यदि पुरुषोत्तमोऽपि लोकसंग्रहाय कर्माणि कुरुते, किं पुनरितरे । ?

क्षणमपि मनुष्यो न वर्तते कर्मणो विरतः । अर्भकः जाग्रदवस्थायां हसति, रोदिति, विषीदति, गात्राणि चालयति । बालः पठति, क्रीडति, धावति, वयस्यैस्सह वादं करोति । यौवने उत्साहादिगुणैर्युक्तो मनुष्यः स्वाभिमतं कर्म कुर्वन् देशान्तरं द्वीपान्तरमपि गत्वा खिद्यन् श्रियं कीर्तिं च लभते । गीयते हि 'क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा । किं बहुना 'न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्' ।

कर्म च दिव्यं, मानुषं, आसुरमिति त्रिविधम् । दिव्यं कर्म भास्करस्य प्रभेव कुसुमानामामोद इव लोकसुखावहम् । आसुरं अनिष्टावहम् । मानुषं तु प्रायः मिश्रं च वर्तते ।

यदि मनुजोऽभ्यासेन पुण्यमेव कर्म कर्तुं सदा यतते, तस्य सन्मार्गगामिनः कर्म दिव्यं भवति । किमिदं नाम पुण्यं कर्म इति चेत्, यत्र केवलं आत्मनः अपि तु सर्वेषां शोभनं सुखावहं च तदेव । यदि मनुष्यस्तथाविधं कर्म कर्तुं सर्वथा यतते स एव योगी इत्युच्यते ।

अरिषड्वर्गं त्यक्त्वा, द्वन्द्वातीतो भूत्वा, लोकसङ्ग्रहं चिकीर्षु यदि कश्चित् कर्म कुरुते सश्रेयान् भवति । स एव विद्वान् अविद्वांसस्तु फलाभिकाङ्क्षिणः कर्म कुर्वन्तः, विफले च कर्मणि शिथिलितहृदयाः, गतोत्साहाः, मुग्धाश्च भवन्ति । निष्कामकर्मनिरतास्तु 'कार्यं कर्म' इति बुध्या कुर्वन्ति । यदि न तत्र सिध्यन्ति ते धैर्यं न मुञ्चन्ति । पुनः पुनः कर्म कुर्वाणाः वर्तन्ते । सिद्धिर्नाम कर्मैव, न तु कर्मणः फलं इति तेषां अध्यवसायः ।

सीतान्वेषणतत्परो हनुमान् 'कर्मसु कौशलं योगः' इति सिद्धान्तस्य निदर्शको वर्तते । इतैररशक्यं कर्म करोति न तु स्वार्थलाभाय परं तु रामहिताय । मध्ये सम्भावितान् विघ्नान् उत्साहेन, साम्ना, नयेन, पौरुषेण च परिहरति । रावणमन्दिरालोडने अतीव जागरूको भूत्वा ललनाशतदर्शनेऽपि न चित्तविकारमाप्नोति । अशोकवनिकायां सीतारावणयोस्संवादं सोत्कण्ठं शृणुते । सीतया सह संभाषणे स्वस्य निरतिशयञ्च नैश्चर्यं दर्शयति । रावणस्य व्यलीकं कर्तुकामः प्रमदावनं विनाशयति । अक्षकुमार जम्बुमालिप्रमुखान् वीरान् ससैन्यान् हत्वा रावणस्य मनसि भीतिमुत्पादयति । स्वयमप्रतिहतपराक्रमोऽपि रावणेन सह संभाषितुमनाः इन्द्रजिता बद्धो भवति । वदति च हनुमान्, 'न ह्येकस्साधको हेतुः स्वल्पस्यापीह कर्मणः, यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने' । राक्षसवरैः पीडितोऽपि, रथ्यासु नीतोऽपि, पुच्छे दीपितोऽपि, द्वन्द्वातीतः अत एव युक्तः, सुग्रीवसचिवः, निजकर्मणि कौशलेन सर्वं सहते । रावणपुरीदहनं च न प्रतीकारबुध्या परं तु रामकार्यार्थसिद्धये, अग्निसन्तर्पणाय च करोति । स्वार्थलाभाय न किंचित् कुरुते । मानावमानयोस्समो भूत्वा विमत्सरस्सन् रामकैङ्कर्यमिति सर्वं करोति सर्वस्वभूतं रामपरिष्वङ्गममृतत्वं चाप्नोति । योगः खलु कर्मसु कौशलम् ।

योगो नाम फलमनाश्रित्य कर्मणः सेवा । अस्त्येव 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति वचनम् । तथाऽपि न कश्चित् उद्यमं जहाति सुदूरात् लक्ष्यस्य । परं तु उत्साहं द्विगुणीकृत्य हृदयदौर्बल्यं परित्यज्य सर्वदा कर्म करोति । स्वस्य कर्मणः सर्वानपि सूक्ष्मान् विषयान् अभ्यासेन जानाति । कर्मणि निरतः फलमपि विस्मरति । लक्ष्यं तु दूरेऽपि तदाह्वयति । स च कर्मणः ज्ञानं लभते । पुनः प्रवर्तते लक्ष्यं प्रति । तच्च मेरुशिखरमिव दुरापम् । तथाऽपि तल्लक्ष्यं कर्मसु नरमुत्साहयति ।

कर्म विफलं इति न । तस्य फलं न प्रत्यक्षमपि कालेन भवति । कर्मणो हि ज्ञानं जायते । गीयते च 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' इति । ज्ञानमेव फलम् । पुनः कर्म करणे तत् ज्ञानं उपकुरुते । ज्ञानोपेतं कर्म कुर्वन् मनुष्यो दुर्गतिं नैव गच्छति । स हि कल्याणकृत् ।

कर्मणः आनन्द एव नरान् सोद्यमान् करोति । कृषीवलान् पश्यत । कृषिं सर्वदा कुर्वन्ति । अतिवृष्ट्या अनावृष्ट्या वा यदि सस्यानि विफलानि भवन्ति, नायं कृषीवलानां दोषः । फलं दैवायत्तम् । कृषिकर्मण्येव कर्षकाणामधिकारः । कृषिं विना फलं न लभ्यते । कियत् फलमिति दैवमेव जानाति । विफलत्वभीत्या कर्मणः विरमन्ति किं कर्षकाः ? नैव ।

भौतिकशास्त्रप्रवीणाः धर्मप्रभाविद्युन्नादादीनां शक्तीनां तत्वं परिशीलयन्तोऽनवरतं कर्मैव कुर्वन्ति । यथाभिलषितं फलं लभन्ते वा न वा परिशीलनकर्म न त्यजन्ति । प्रकृतेस्सीमा दुरवापा । प्रकृतिश्च अतीव सूक्ष्मा अगाधा च वर्तते । स्वात्मनः स्वरूपं सुलभं न विवृणुते । अणोरन्तस्तत्वं अपरिच्छेद्यम् । अथापि, शास्त्रज्ञाः तदुपलम्भे सर्वदा सोद्यमा वर्तन्ते । केवलं मनोरथैः कार्याणि न सिध्यन्ति ।

तथैव रसायनप्राणिशास्त्रादिकुशलाश्च सर्वदा परिशीलनपरास्सन्ति । विचित्रचिदचिद्विशिष्टप्रपञ्चस्य अन्तो नास्ति । तत्परिशीलनकर्मणश्च न विरामः । शास्त्रपरिशीलनरताः सर्वानपि इतरान् व्यापारान् त्यक्त्वा एकमेव तत्वान्वेषणकर्म कुर्वन्तो वर्तन्ते । 'सर्वं कर्म ज्ञाने परिसमाप्यते' इति पूर्वोक्तरीत्या ज्ञानमेव फलं भवति । कदाचित् शास्त्रज्ञानां परिशीलनद्वारा नवनवान्यद्भुतानि च फलन्ति । एतेषु फलेषु बहूनि न तेषां सङ्कल्पप्रभवानि । परं तु अतर्कितोपनीतानि कर्मैव कार्यमिति कुर्वन्तः शास्त्रविदः ज्ञानं लभन्ते । ते खलु कर्मयोगिन एव ।

कविकोकिलकालिदासप्रभृतयो दैवज्ञाः फलमुद्दिश्य किमकुर्वत

रामायणशाकुन्तलादीनि अमृतानि काव्यानि ? । आत्मनः अपरिमितान-न्दप्रभावेनैव चक्रुः ।

सङ्गीतशास्त्रप्रवर्तकाः शुकब्रह्मतुलसीदासजयदेवपुरन्दरदासत्याग-राजदीक्षितादयः किं फलमुद्दिश्य अमृतकल्पानि गीतानि सर्वलोकाह्ला-दकानि चक्रुः ? । अनिर्वचनीयेन आनन्देनैव अकुर्वत ।

भारतदेशस्थितानि देवायतनानि पश्यत । तत्रत्यानि विचित्राणि शिल्पकर्माणि फलमुद्दिश्य कृतानि किम् ? । अनर्घं हि शिल्पकर्म । ते शिल्पकाराः स्वात्मानमपि विस्मृत्य दिव्यं कर्म चक्रुः । न खलु केवलं शरीरयात्रार्थे कृतं कर्म लोकाह्लादकरं भवेत् ।

एतेषु कर्मसु फलाभिसन्धिराहित्यं दृश्यत एव । अपरं च सुभगो जलदः किं प्रयोजनमपेक्ष्य वर्षति ? । सुगन्धीनि कुसुमानि किमर्थं इन्द्रि-याह्लादकराणि ? । तथैव विद्वानपि लोकसङ्ग्रहाय दिव्यं कर्म करोति । फलाय कृतं कर्म न सुकृतं सात्विकं वा भवति । कथमिति चेत्, फलमेव कामयमानो यदि कश्चित्कर्म कुरुते स फलेन बद्धः कर्मसु च अयुक्तो भवति । तेन कर्मसु कौशलं नैव लभते ।

---

# रामस्य प्रेष्ठः सुहृत् कः ॥

## २ जटायुः ।

अथ द्वितीयं सुहृदं रामस्य साहाय्यकर्तृषु अद्वितीयम्, अनुभूत-दीर्घायुषमपि दाशरथेरर्थे तृणीकृतजीवितमन्ततस्सविक्रमं नियुद्धं कृत्वा निर-स्तायुषं जटायुषमिह विचारयामः । निषादराज इव पक्षिराजश्चैष दशरथ-पक्षपाती । दाशरथावपि आत्मनो बान्धवप्रीतिं प्रणयप्रकर्षं च सीतायाः

परित्राणोद्यमेन पक्षिराजः स परं पर्यपोषयत् । 'जटायुरिति मां विद्धि श्येनीपुत्रमरिन्दम । सोऽहं वाससहायो वो भविष्यामि यदीच्छसि ॥ सीतां च तात रक्षिष्ये त्वयि याते सलक्ष्मणे । (रा. ३. १४)' इति राघवयोः पञ्चवट्यां प्रथमदर्शनावसरे जटायुषि रामसाहाय्यविषये स्वमुद्देशं स्वीयां कथामपि सति कथयति, गुरुमिव गृध्राधिपमेनं स्वपित्रा पुरस्कृतमवगत्य, स्वयं तं सप्रेमबहुमानं रामः परिष्वज्य तद्विषयकं प्रणयप्रकर्षमाविष्करोति स्म ।

'जटायुषं तं प्रतिपूज्य राघवो मुदा परिष्वज्य च संनतोऽभवत् ।
पितुर्हि शुश्राव सखित्वमात्मवान् जटायुषा संकथितं पुनः पुनः ॥'
(रा. ३. १४)

इति खलु रामजटायुषोः सौहार्दसंघटनव्यतिकरं विशदयति वाल्मीकिः । अतिपरिणतेऽपि वयसि अपक्रान्तोपमा विक्रान्तिः, प्राणपरित्यागेनापि प्रणयिजनपरित्राणप्रियता, परिमितेतरः स्वपितरि पङ्क्तिरथे परिवर्धितः स्नेहबन्धः, स्वात्मनि सीतायां च निहितं निरतिशयं निर्हेतुकं वात्सल्यं अन्यांश्च साधुजनमाननीयान् गुणानवेक्ष्य पक्षिराजे, तस्मिन् पितृस्नेहं प्रकटयन्, स्वहस्तेनैव स्वजनकदुरवापामपरक्रियां निर्वर्त्य, जटायुषि परमामात्मनः प्रीतिं पुरस्कृतिं च रामः प्रादर्शयत् । अस्मिन्नेवावसरे ब्रह्मविद्भिः परमर्षिभिः प्राप्यं विष्णुपदाधिगमरूपं भाग्यमपि जटायुषे वितीर्य, स्वस्य परमपुरुषावतारात्मकं रहस्यमपि स्वयमाविरकरोत् दाशरथिः । वस्तुतत्त्वमिदं पद्येनैकेन भोजः स्वचम्पूकाव्येऽभिव्यञ्जयति—

'स्वयमपि शरभङ्गस्वीकृतां भङ्गहीनां
सपदि गतिमवाप्तः संहृतायुर्जटायुः ।
नयनसलिलमिश्रं रामहस्तेन दत्तं
दशरथदुरवापं प्राप नैवापमम्भः ॥' इति ।

गृध्रराजादृते धृतिमता मित्रान्तरेण केनचिदपि रामकार्यार्थं प्राणपरित्यागा-त्मिका प्रणयस्य परा काष्ठा न प्रदर्शिताऽभूत् । स्वार्थे परित्यक्तायुषि जटायुषि रामेणाविष्कृतं महदिदं कार्तज्ञ्यम् 'मत्कृते मरणं यस्मात् त्वया प्राप्तं द्विजोत्तम । तस्मान्मम प्रसादेन विष्णुलोकमवाप्स्यसि' इति नार-सिंहपुराणवचनेन, रामायणे दृश्यमानैः (रा. ३. ६८) वचनैश्च स्पष्टी-कृतमस्ति । प्रमाणैरेवमादिभिः गृध्रराजश्च रामस्य मित्रेष्वेव परिगणनार्हः परमसुकृती बभूवेति ज्ञायते । (अनुवर्तते)

## पाठसंशयः ॥

---

श्रीगीताभाष्ये 'क्षेत्रज्ञं चापि मां विद्धि' इत्येतद्विवरणावसरे

**तथा क्षेत्रं क्षेत्रज्ञं च मद्विशेषणतैकस्वभावतया मदपृथक्सिद्धेः मत्सामानाधिकरण्येनैव निर्देश्यौ विद्धि ।**

इति भाष्यं दृश्यते । अत्र 'निर्देश्यौ' इति पुंस्त्वमनुपपन्नं भाति । क्षेत्रस्य नपुंसकत्वात् 'निर्देश्यं च निर्देश्यश्च' इत्येवं विग्रहं कृत्वा एकशेष-करणे 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' इति नपुंसकस्यैव एकस्य शेषणानुशासनात् । तत्र एकवचनस्य वैकल्पिकत्वेन 'निर्देश्यम्' इति वा 'निर्देश्ये' इति वा पाठस्यैवोचितत्वात् ।

'क्षेत्रं क्षेत्रज्ञं च' इत्येतत्स्थाने 'क्षेत्रक्षेत्रज्ञौ' इति समासो यदि स्यात् तदा 'निर्देश्यौ' इति पुंस्त्वस्य नास्त्यनुपपत्तिः ।

---

स्वर्णम्— केचन पदार्थाः अग्निना भस्मसात् क्रियन्ते । काचिन्न.......

इङ्गालः— रे रे लोहाभास, कस्य मुखे इङ्गालं लिम्पसि । वेषधारिन् हतक लोकं प्रतारयसि । कलहायमानं करोषि । पश्य किं त्वां करोमि कुत्र स्थापयामि इति ।

स्वर्णम्— अरे रे किमिदम्..........

---

... SANSKRIT ... PEETH ... TIRUPATI.

Registered No. M 2300. 38

Book XIX ॥ श्रीः ॥ Nos. 9 & 10

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. १९ ] कलि- ५०४७ } व्यय { वृषभ —साधारण सं ५
मिथुन-शास्त्रानुबन्धः सं ५
आहत्य ,,१०

# The UDYANA PATRIKA.

A

SANSKRIT MONTHLY

May June } 1946

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription     Re. One only.

Do. With Sanskrit Supplement     Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६' प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण सार्कं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari Panditaraja* **D. T. Tatacharya Siromani M. O. L.**,
Lecturer, Sri Venkateswara College,
TIRUPATI.

KENDRIYA SANSKRIT VIDYA PEETHA
TIRUPATI.
LIBRARY

## विषयाः ॥

शास्त्रानुबन्धः—
कुवलयानन्दः । [बुधरञ्जनीसमेतः] १७३—१७६

1 मेनका ।
2 सुभाषितनीवी ।
3 विद्यमानयोः । (२)
4 राजतम्, दारवम् ।
5 पाठसमर्थनम् ।
6 रावणप्रणतिः ।
7 रामस्य प्रेष्ठः सुहृत् कः ।

तदाकर्णितवान् वराहस्वामी विस्मयमवमानं च प्राप्य 'लेख-रहस्यं किं सर्वेभ्यः प्रकाशयामास स मूढः। बुद्धिरेव तस्य नास्ति' इति वदन् स्वकराभ्यां मुखं प्रच्छाद्य पादघटिकां मौनी बभूव। मेनकां प्रति तस्य स्थितः कोप उज्जृम्भमाण आसीत् । तदा जातां मानहानिं ज्ञातवत्यास्तस्याः श्वेतकन्याया मुखं वीक्षितुमनिच्छन् सः क्षणं सङ्कुचितोऽवतस्थे । अवशात् आक्रोशवाचः आस्ये प्रादुरभवन्। 'एते मूढाः किमर्थं रहस्यं विषयं प्रकटीकुर्वन्ति । केवलं मानहीनाः । इतोऽपि केषु केषु उक्तवन्तः, न हि ज्ञायते। अय्यो । इतः परमहं बहिर्गत्वा मनुष्याणां मुखं कथं वीक्षेय। आः वधपात-किनि, चण्डालि 'कदाप्यविनश्वरं खल्ववमानमानीय स्थापितवत्यसि । अयि दुष्टे रण्डे। हतं ते शरीरं किंचिदग्निरग्ध्वं न नश्येत्। त्वं कुतो म्रियसे। दुर्जनानां ह्ययं कालो वर्तते। लोके स्वामी (दैवं) कुतः भूतं कुतः? इमां मानहानिमुत्पादितवत्याः गणिकारण्डाया-स्तव मूर्धानं हि दृषदा एकेन प्रहारेण भिन्नवान् स्याम् । आत्मानं रक्षितवती ह्यसि। जारपुरुषेण सोल्लासमागतां त्वां ईश्वरो रक्षितवा-नभूत। साक्षात् स्वकीयः पुरुषोऽहं शकटे पेषणं प्राप्तम्' इति बहुधा स्वगतमेव प्रलपन्नातुरो लज्जितो दुःखितश्चाश्रूणि विमुच्य पर्यतप्यत। तद्दर्शिनी कर्मकरी अनुकम्पाविह्वला स्वासनादुत्थायोपसृत्य 'यद्येवं यूयं व्यसनमनुभवेत स्वस्थं शरीरं पुनरप्यस्वस्थं भवेत्। भिषक् हूणो हूणी च मां शिक्षयन्तौ उद्योगात् निवर्तयेताम्। न मया इमं विषयं युष्मासु ज्ञापितवत्या भवितव्यम् । मदीयं स्खलितं क्षमध्वम् । श्यामार्यः युष्मदीयं रहस्यं बहुषु उक्तवान् भवेदिति सन्दिह्य न युष्मा-भिर्विषण्णैर्भाव्यम् । इमं विषयं न श्यामार्यः प्रथमं हूण्यामुवाच । अन्यथैव कथञ्चिदिमं ज्ञातवत्या हूण्या पृष्टः किल सः परमार्थ एवायमित्यभ्युपजगाम । हूणी अत्यन्तगूढमिदं मयि उक्त्वा अति-जागरूकतया यूयं रक्षितव्या इति मामादिशत्। अयं विषयः आव-योर्द्वयोरेव विदितः । नावां एतं प्रकाशयेव । तत्प्रति युष्माभिर्न मनागपि चिन्ता कार्या । हूण्यामद्य आगतायां मम उद्योगो निव-

तैत ' इत्युक्त्वा सानुरोधं सान्त्वयन्ती वराहस्वामिनो मुखनेत्रा-दिकं प्रीत्या प्रमृज्य किमप्यौषधमादाय तस्य वदने निधाय किंचित् पाययामास । तस्याः प्रीतिं प्रार्थनां उद्योगभ्रंशप्रसङ्गं च विचिन्त्य वराहस्वामी स्वस्य 'आवेशं' कथमपि नियन्त्रयामास ।

सपदि सा सुन्दरी किमपि स्मितं कृत्वा "आकारदर्शने तावत् यूयं एकस्याः पिपीलिकाया अपि क्लेशमजनयन् 'साधुरिव भान्ति । यूयं युष्मत्पत्नीं हन्तुं प्रावर्तध्वमिति श्रृण्वत्या मे विश्वास एव नासीत् । अनधिगतविद्यैर्मूर्खैः कर्तुमर्हं कार्यं किं यूयं कर्तुमधृष्णुत । आश्चर्यमाश्चर्यम् । तां हि हन्तुममन्यध्वम् । वधकारिणः विधातव्यं दण्डनं हि तस्याः विधातुममन्यध्वम् । व्यभिचारदोषस्य कृते वधो यद्यपि अतितीव्रो दण्डः तथापि अवमानप्राप्तिसमये पुरुषा यत् पत्नीं हन्तुमिच्छन्ति सा तेषां प्रकृतिः । तथा हननेऽपि न स दोषः । परं तु सा वस्तुतो व्यभिचारिण्येनत् किं यूयं स्पष्टं ज्ञातवन्तः । अथवा ज्ञातुं यत्नमकुरुत । कौचित् द्वौ लेखौ अलभ्येताम् । ते एव परमे प्रमाणे । तौ वेदवाक्यीकृत्य ननु वधं कर्तुं प्रावर्तध्वम् । यद्यु-ष्मदीयस्य क्रूरस्याध्यवसायस्य निर्वृत्तिमीश्वरो न्यरुणत् तत एव अत्र किमपि छलमस्तीति किं वो नाभात् । लेखौ खल्वपठत । किं तौ वस्तुतस्तस्यै नाटककारेण लिखितौ लेखौ उत नेति किं स्पष्टं निश्चितवन्तः । व्यवहारस्थलेषु हि बहवो वधापराधाः विचारणाय आगच्छन्ति । एवंविधं लेखद्वयमेव प्रमाणीकृत्य न्यायाधिपतयो दण्डनं विदधति स्मेति किमस्ति । वैरिणः केचन एवंविधं मिथ्या-लेखं सज्जीकृत्य विहितवन्तः किं न स्युः" इत्युवाच ।

अप्रतीक्षितास्तदीया वाचः श्रुतवान् वराहस्वामी किंचिन्मौन-माश्रयत् । लेखौ मिथ्यालेखावपि भवेतामिति तस्य मनस्यभात् । अपि तु विद्युदिव झटिति तत् तिरोदधे । "न्याय्यमेव यत् त्वं वदसि । किन्तु तस्या उपरि तथा अत्यन्ताभूतं पापमारोपयितुं क्षमा जना अस्मद्गृहे न हि केचित्सन्ति । मम सोदर्यौ तस्यां भृशं प्रीति-मत्यौ । अपि च तस्याः पेटिकायां इमौ लेखावर्तेताम् । कुञ्चिकां

उत्पथादुन्नताः केचित् बहुभङ्गभ्रमाकुलाः ।
तटस्थानपि निघ्नन्ति तरसा भिन्नसेतवः ॥ ५ ॥

अत्र केचिदमार्गार्जितवित्ताः प्रत्यहमकृत्यशतकारिणः प्रतिक्षिपन्ति लोकव्यवस्थाम् । अधिक्षिपन्ति च महाजनानुदासीनानपि स्वनिग्रहभिया । आरोपयन्ति च दोषानदुष्टेष्वपि स्वसाम्यापादनायेति तान् प्रत्याह(उत्पथादिति) ल्यब्लोपे पञ्चमी । उत्पथं प्राप्येत्यर्थः । उत्क्रान्तः पन्था उत्पथः । लोकशास्त्रोत्तीर्णमार्गादिति यावत् । उन्नताः वित्तादिसंपादनेन परिबृढा अपि बहुभङ्गभ्रमाकुलाः बहुभ्यो भङ्गाः बहवो भङ्गा वा अनुचितकार्यकरणेन सर्वत्र सर्वविधावमाननानि तैः भ्रमः कृत्याकृत्यापरिज्ञानादिजनितबुद्धिविपर्यासः उद्भ्रान्तचित्तता वा तेन आकुलाः व्याकुलमनस्काः । तरसा वेगेन सद्य एवेत्यर्थः । भिन्नसेतवः भिन्नः विभग्नः सेतुः मर्यादा यैस्तथोक्ताः । सकललोकमर्यादामुद्भूलन्वन्तः तटस्थानपि उदासीनानपि केवलसाधुवृत्तीन् निघ्नन्ति वितथदोषारोपणेनाधिक्षिपन्ति । स्वदोषकथनभिया तेष्वसतोऽपि दोषानारोप्य विदूषयन्तीत्यर्थः । स्वयमनार्यकार्यकरणं परदोषारोपणञ्चेति द्विविधदोषदुष्टा अतीव वर्जनीया इत्यर्थः ।

यद्वा "गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथं प्रतिपन्नस्य कार्यं भवति शासन"मिति शास्त्रप्रत्यभिज्ञानात् तदर्थपरोऽपि भवत्ययं श्लोकः । तथा हि । उन्नताः केचिदाचार्यादयः पितृमातुलश्वशुरादयो वा गुरुस्थानीयाः पूज्यतमाः बहुना भङ्गेन मनोव्याधिमुखेन भ्रमाकुलाः उद्भ्रान्तचित्तास्सन्तः उत्पथात् लोकोत्तीर्णमार्गमाविश्य तटस्थानपि निघ्नन्ति । आचार्यत्वादिजनितानन्यशास्यत्वावलेपात् प्रामाणिकानप्युदासीनान् कार्याकार्यमूढतया विजिघांसन्ति । भिन्नसेतवः लोकमर्यादामतिक्रामन्तस्सन्तः । तेऽपि शिक्षणीयाः । उपेक्षणीयाश्च । अन्ततोऽप्यनिवृत्तौ शिष्यादिना वर्जनीयाश्चेति भावः । खलकोटिप्रविष्टा एवैतेऽपीत्याशयः ।

सुरापायिसमाधिरप्यनेन द्योत्यते । उन्नताः केचित् धनादिबहुलाः अधिकारिपुरुषा वा उत्पथात् सुरामद्यादिमदकरद्रव्यपानात् मत्ताः बहवो भङ्गाः मार्गपतनात् करपादादिभङ्गाः .... भ्रमः पुनश्चोत्थाने शिरोभ्रमणादिकं तेन आकुलाः तरसा मदवेगेन भिन्नसेतवः उच्चावचवचनरचनादिभिरतिक्रान्तव्यवस्थाः तटस्थानपि मध्येमार्गं यदृच्छयागताननपराधानपि जनान् विनिघ्नन्ति । स्वीयमदविकारेणाधिक्षिपन्ति तर्जयन्ति ताडयन्ति चेति न केवलं धनमदादिमात्रेणापरांस्तर्जयन्त्यधिक्षिपन्ति च । अपि तु तज्जनितसुरामदादिभिरप्यबुद्धिपूर्वमिति भावः ।

एवमत्र नदीप्रवाहपरतयापि बोधः । उत्पथात् गिरिशिखराद्युन्नतप्रदेशात् उन्नताः जलैर्बिन्ध्यादूर्ध्वमुखतया निर्गच्छन्तः । बहवो भङ्गाः तरङ्गाः भ्रमाः आवर्ताश्च तैराकुलाः कलुषितजलाः । तरसा वेगेन भिन्नसेतवः वृक्षसैकतादिसेतुबन्धानपि नि(वि?)घ्नन्वानाः केचित् नदीप्रवाहाः तटस्थानपि तीरस्थवृक्षानपि निघ्नन्ति समूलमुत्पाटयन्ति । स्वपरिमाणाभ्यधिकजलागमात् ऊर्ध्वमुत्थितास्तीरेऽभिव्याप्य तत्रस्थानपि द्रुमानुन्मूलयन्तीत्यर्थः ।

एवं दुर्वादिपरतयाप्यर्थः । उन्नताः शास्त्रारिश्रमादिभिः पण्डितोत्तमा अपि केचित् उत्पथात् समयविशेषे स्वोक्तस्थापनार्थं वितण्डादिदुर्वादमाश्रिताः अत एव बहवो भङ्गाः स्ववाक्यव्याघातागमबाधादयः, भ्रमाः अन्यथाप्रतिपत्तयश्च दुरभिनिवेशकृताः, तैराकुलाः क्लान्तचित्ताः । उच्यते हि 'अभिनिवेशवशीकृतचेतसां बहुविदामपि संभवति भ्रम' इति । तरसा तत्क्षणमत्र भिन्नसेतवः समयस(ब)न्धादिव्यवस्थामपि लङ्घयन्तः तटस्थानपि मध्यस्थभावमाश्रितान् विशेषज्ञानपि निघ्नन्ति स्वविरुद्धभाषणे तानप्यधिक्षिपन्ति । पक्षपातमारोपयन्ति च । उक्तं हि 'पण्डितो यदि तत्रैव पक्षपातोऽधिरोप्यता'मिति ।

अन्योऽपि सुग्रीवादिपरोऽर्थः । केचित् समुद्रतीरे निबद्धगोष्ठीकाः

॥ श्रीः ॥

# उद्यानपत्रिका ॥

“अन्या वाचो विमुञ्चथ”

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. १९] कलि ५०४७ व्यय { वृषभ साधारण } सं ५
{ मिथुन शास्त्रानुबन्ध } सं ५

## विद्यमानयोः (2) ॥

इह प्रकाश्यमानस्य सुभाषितनीविव्याख्यानस्य मातृका साक्षात् तद्व्याख्यानकाराणां कीर्तिशेषाणां श्रीपट्टप्पाताताचार्याणां गृहात् तत्कुमार-हस्तादधिगता । तत्र तत्र कृताक्षरशोधना च । एतदधिगमात्प्रभृति ‘इयमेका मातृका विद्यमाना । नैकमपि आदर्शान्तरमस्ति’ इत्यस्माकं दृढं ग्रहणम् । तेन अनुपपत्तिप्रतिभानस्थलेषु शोधने वयमतिजागरूका भवामः । 1

प्रकृते “त्वरितमेव स स्वपितृसमीपमागम्यापुत्रतया हतपुत्रतया च विद्यमानयोः पित्रोः स्वात्मानं प्रकाश्य सर्वमपि वृत्तान्तमाचख्यौ” इत्यस्मिन् व्याख्यानवाक्ये विद्यमानयोरित्यत्र ‘वि’ स्थाने ‘खि’ना भाव्यमिति झटिति प्रतिभातमपि अभिज्ञानां सूक्तिषु सहसाऽन्यथाकरणभीरुतयोपेक्ष्य ‘खि’ पाठे अर्थे क्लेशं ‘वि’ पाठे तदभावं च पर्यालोच्य सुव्युत्पन्नाः शब्देषु चार्थेषु चातिसूक्ष्मदृष्टय इमे व्याख्याकृतः एवं पण्डितहृद्यं विलक्षणमेव प्रयोगं कृतवन्तः स्युरिति सम्भाव्य यथास्थितममुद्रयाम । 2

वस्तुतस्तयोर्जीवत्पुत्रत्वात् अपुत्रत्वहतपुत्रत्वरूपौ हेतू न स्त इत्यर्थेऽनुपपत्तिमवोचाम । अत्रानुयुज्यते— पुत्रस्ते जात इति पत्रा तं मृतेति देशान्तरात् मिथ्यातन्त्री-श्राविणां मायारामशिरोदर्शिन्याः सीतायाश्च असन्नेवार्थः किं न सुखदुःखहेतुरिति । तदिदं यच्छीलं परेषां, स्थितं न गृह्यते

अन्यत् किमपि कृत्वा आधिकं प्रसज्यत इति तस्य एकसहस्रतममुदाहरणम् । शास्त्रान्तरवदेव महति गहने चालङ्कारशास्त्रे कविर्वा वक्ता कविनिबद्धो वेति वक्तृविभागः क्रियते । स इह विभाव्यः । यदि कवि(प्रकृते व्यास्यात्)निबद्धयोः पित्रोर्भ्रान्तयोर्वचनमिह भवेत् 'अपुत्रतया हतपुत्रतया च आवां खिद्यावहे' इति केनात्र अनुपपत्तिरुद्भाव्येत । अभ्रान्तः कविः पुनरत्र वक्ता 'अपुत्रतया हतपुत्रतया च खिद्यमानयोः पित्रोः' इति । तत्र कथमविद्यमानस्यार्थस्य खेदहेतुतया निर्देशो घटताम् । इत्यलमद्य । 3

अन्यच्चावोचाम— "....अष्टादशवर्षानन्तरं खेदवर्तमानताकथनस्यानतिप्रयोजनत्वाच्च" इति । अत्र 'कथनस्य' इत्येतदनवदधानैः कैश्चित् रभसैः खेद एव नास्तीत्युच्यत इति भ्रान्त्या गृह्येतेति तत्परिहारायैव अन्तो अयोजयाम— "ननु वर्षगणेऽप्यतीते पित्रोः पुत्रखेदः किं न स्यात् । क आह नेति । एवमर्थशक्त्या ध्वनिरस्तु खेदस्य । कण्ठोक्तिः किमर्था" इति । तदिह खेदाभाव उच्यत इति कृत्वा यदुच्यते 'दुःखितत्वविरहवादो विरोधः' इति ; तदस्थाने । 4

अथ खेदस्य कण्ठोक्तावभिनिविष्टैः 'आक्षेपतः प्रासादाभिध निकस्यैव ग्राह्यत्वात्' इति श्रीभाष्यग्रन्थो यत् स्पृश्यते तत्र आत्मानं नियन्त्र्य प्रशान्तगम्भीरमेव ब्रूमः— अन्यत् प्रस्थानं तत्त्वप्रधानस्य शास्त्रस्य अन्यच्च रसप्रधानस्य काव्यस्य— इति ।

'यस्य कण्ठोक्तिरवर्जनीया तस्य कथं ध्वनिः' इति पृच्छद्भिः अत्र कण्ठोक्तेरवर्जनीयत्वमुपपादनीयम् । "कथा खलु लिख्यते । यद्यथा वर्तते तत्तथा कण्ठतः कथनीय"मिति चेत् तर्हि विद्यमानतापि कण्ठतो वक्तव्यैव । तौ हि तदा विद्यमानावभूताम् । खेदास्तित्वेऽभिहिते अविद्यमानयोस्तदयोगात् विद्यमानत्वमर्थात् सिद्ध्यतीति चेत् तर्हि कथायां यद्यथा वर्तत इत्ययं नियमो नास्तीत्यायाति । तथा चापुत्रत्वादिना विद्यमानत्वेऽभिहिते खेदोऽर्थाल्लभ्यत इत्यत्र न किञ्चिदवद्यम् ।

विद्यमानयोः ।



किञ्च तौ पितरौ हस्तपादवन्तौ चक्षुष्मन्तौ वस्त्रधारिणावित्येवमादिबहुप्रकारावास्ताम् । तत् सर्वं कुतो न वक्तव्यम् । अनुपयोगादिति चेत सत्यम् । कोऽत्र खेदकथनस्योपयोग इत्येवास्माकं प्रश्नः । कण्ठोक्तिः किमर्था' इति ह्यस्मदीयानि प्रश्नाक्षराणि । तत्र अयमुपयोगः इति उत्तरं वाच्यम् । तद्विहायोत्पत्तिक्षण एव भङ्गुरस्य कथायां यद्यथावर्तत इति नियमस्य कुतः पाठः । अस्मिन् नियमे च किं प्रमाणम् । शुद्धा स्वच्छन्दकल्पना ह्येषा । इदमेव च मुखमस्तीति भाषणम् । विमर्शदुःस्थो भावशून्यः केवलो वाग्विसर्गो हि तथोच्यते ।

"ध्वनिप्रधानेष्वपि महाकाव्येषु खेदो मोदश्च कण्ठत एव हि कथ्येत" इत्युच्यते । कामं तथा । किं तेन प्रकृतस्य । किं खेदस्य क्वापि कण्ठोक्तिर्नास्ति सर्वथा न युज्यत इति केनचिदुक्तम् । यस्य प्रतिषेधाय एवमुच्यमानं सङ्गतं स्यात् । प्रकृते कण्ठोक्तिरनपेक्षितेति खेदकण्ठोक्तिं विनापि सर्वमुपपद्यत इति वयं ब्रूमः । तत्र महाकाव्येषु कण्ठोक्तिरस्तीत्यभिधानस्य का सङ्गतिः । घ

"रामो मुहूर्तं विमना बभूव" इत्यत्र विमनस्कत्वं सर्वचित्तवृत्तिशून्यत्वमित्यक्षरार्थपर्यालोचने चिन्तायाः तद्द्वारा शोकस्य च व्यञ्जनमेव न तु कस्यचिद् भावस्य कण्ठोक्तिरिति एतदुदाहरणतया अस्य श्लोकस्य ग्रहणमयुक्तमिति सुग्रहम् । ङ

'गोविन्देति यदाक्रन्दत् कृष्णा मां दूरवासिनम्' इत्यत्रापि दुःखानुभावस्य आक्रन्दस्यैव कण्ठोक्तिः न दुःखस्येति नेदमपि खेदकण्ठोक्तिस्थलम् । च

एताः "पौराणिक्यः कथाः" इति । ऐतिहासिक्य इति वाच्यम् । सुसूक्ष्मदर्शित्वं हि घुष्यते । छ

ध्वनिरस्तु खेदस्य । कण्ठोक्तिरनपेक्षितेत्ययं कथमुच्छृङ्खलस्वच्छन्दवादः । केन शास्त्रेणाशङ्किताया: कस्याः शृङ्खलाया उद्गमोऽस्मासु इह

दृश्यते । निपुणं निरूप्योच्यताम् । अर्थशून्या वाचो वृथा विसृज्यन्ते । कदर्थनमेतत् देव्या वाचः “महिमा मोहाञ्जनस्यैष” इति च इहैव सङ्गतम् । नास्मदुक्तिषु क्वचित् । ज 5

अथ ‘अपुत्रतया हतपुत्रतया च विद्यमानयोः’ इत्यत्र वैरस्यं यदुच्यते तदयुक्तम् । ‘वाचां विचित्रमार्गाणाम्’ इत्युक्तरीत्या वचनभङ्गयो लोके अनन्ताः । तत्र यदि केषाञ्चिदपरिचयमात्रेण कस्यचिन्मार्गस्य वैरस्यं भवेत् तर्हि अन्येषामपरिचिततया अन्यस्यापि स्यादिति हि प्रसज्यते । ‘मात्रास्पर्शास्तु कौन्तेय’ इति गीताश्लोकभाष्ये “आगमापायित्वेनापि निवर्तन्त इत्यर्थः” इत्यत्र ‘न वर्तन्ते’ इति तात्त्विकः पाठ इति प्रामाणिकाग्रेसराः प्राज्ञा अवधारयन्ति । घटो घटत्वेन वर्तते न पटत्वेनेति शास्त्रकाराणां प्रसिद्धो व्यवहारः । एवं चोरत्वेन गृहीते स्थाणौ ‘अयमद्यावधि चोरत्वेनावर्तत’ इति व्यवहारे नैव काचिदनुपपत्तिः । “कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति” इति गीताप्रयोग इह विभाव्यः । 6

एवं स्थितस्योपपन्नत्वात् अभिज्ञे व्याख्यातरि प्रयोगविशेषस्य सम्भावनया च न वयं पाठस्यान्यथाभावमकार्ष्म । अथेदानीं साक्षाद्व्याख्यातृहस्ताक्षरमयी अन्या मातृका अस्तीति तत्र खिद्यमानयोरित्येव दृश्यत इति ज्ञापयन्ति । दैवादेवं केनचित् प्रसङ्गेन अस्मदुपयोगार्हमातृकान्तरसत्ता ज्ञातेति प्रहृष्यामः । 7

यत्तु खिद्यमानयोरिति पाठोपलम्भेन अस्माकं काञ्चन हानिं जातां मत्वा नृत्यन्ति तत् नैसर्गिकानिरूपकत्वापाततृप्तत्वदूषणवैयग्र्यप्रकाशनमात्रफलम् । दूषणपरैर्हि अयमिति कश्चन दोषोऽस्मासु वक्तव्यः । स कः । ‘विद्यमानयो’रिति सर्वथा न भवितुमर्हति । ‘खिद्यमानयोरिति भाव्यम् । सुज्ञानमेतदस्माभिर्न ज्ञातम्’ इत्यवदन् । “सुज्ञानमिदं सुज्ञातम् । अथापि सुव्युत्पन्नप्रयोगतया रसवत्तरं स्थितं न विपर्यासयाम” इति वयं प्रत्यब्रूम । विद्यमानयोरिति स्थितं तथैव कृत्वा यमर्थमभिरध्मः स एषामत्यन्तं दुर्ज्ञानः ।

ज्ञापितस्य बुद्धावारोपणमेव दुश्शकं भवति । एवं स्थितोपपादनस्य सर्वथा एषां दुष्करत्वात् 'स्वि'कल्पना एका गतिः । अस्माकं तु स्थितोपपत्ति-प्रतीत्या न तत्र प्रवृत्तिरासीत् । अत्र को दोषः । "प्रथमपठन एव अस्मद्बु-द्धौ भातं इतरेषां बुद्धौ कथं न भायात्" इति यदेते ईषदपि न पर्यालो-चयन्ति तत् "इदं पाण्डित्यम् । एते पण्डिताः । एषां पाण्डित्यमीदृशम्" इति विवेकदारिद्र्यकाष्ठाविजृम्भितम् । काकस्य कार्ष्ण्यं व्रीहीणां तण्डुल-गर्भत्वमित्यादि न ज्ञातमिति वदद्भिरिव 'वि'स्थानेऽत्र 'स्वि'र्भवितुम-र्हतीति न ज्ञातमिति संस्कृते अल्पज्ञस्यापि विषये वदद्भिर्लज्जितव्यम् । निर्लज्जता तु विजयते । अथवा भगवतो निगमान्तमहादेशिकस्य श्रीभाष्या-नभिज्ञत्वं कवितार्किकसिंहस्य तस्य तेन्नालरामसंस्कृतभाषित्वं च लिखन्त्या लेखन्याः इतरपरिवादे का शङ्का का लज्जा । पूर्वस्मिन्नधिकलेखे 'सन्तापा-नेकत्वेऽत्र न किञ्चित् प्रमाणम्' इत्यवोचाम । अत्र प्रकृतस्थले, इति स्पष्ट-मिदम् । अथापि लोक एव सन्तापो नानेक इत्युच्यत इति गृहीत्वा खण्ड-नाडम्बरमकुर्वन् । लोके पुरुषभेदेन कालभेदेन विषयभेदेन सन्तापोऽनेक इति को न जानाति कः प्रतिषेधेत् । इति मनाग् विमर्शे तत्त्वमभास्यत । एव-मेव प्रकृतेऽपि । नूनं विषयाज्ञानादपि परज्ञानाज्ञानं स्वाज्ञानाज्ञानं च पापीयः । 8

अथ "स देशिकात्मा हृदि मे विदीप्तो बुधेन्द्रबुद्धौ स्थितमर्थमाह" इति विद्यमानत्वार्थस्य बुधेन्द्रबुद्धिस्थतया कथनं दोष इति चेत् दत्तोत्तरप्रा-यमेतत् । इयमेका मातृका साक्षाद् व्याख्यातृमुखाद्गृहीतपाठवतीति ग्रहण-दार्ढ्यादेवमुक्तमिति । प्रमाणतया यथावदुपलब्धं तत् तदुचितं तर्कमप्या-वलम्ब्य निर्णयः क्रियते । यदि अचिन्तितप्रबलप्रमाणान्तरवशात् पूर्वग्रह-णस्य बाधो भवति । तत्र प्रमातुः का वाच्यता । अत एव

स देशिकात्मा हृदि मे विदीप्तः स्वतन्त्रमन्यं स्वयमर्थमाह ।

इति पठनीयम् । एवंविधस्य भगवन्नियमनस्य च इदं फलं यत्रोदाहरण-

मादर्तव्यमिति न्यायेन एवंविधा काचन वचनभङ्गी अस्तीति व्युत्पत्तिरहितानां व्युत्पादनम् । 9

अथ खिद्यमानयोरिति स्थिते हेत्वनुपपत्तिर्या दर्शिता सा व्याख्यातुरेव दोषे पर्यवस्यतीति चेत् प्राज्ञा अपि कदाचित् लक्षणादिनिर्वाह्यमस्वरसं सामान्यप्रयोगमाद्रियन्त इति द्रष्टव्यम् । 10

भीतः शिशुः 'मातरि वक्ष्यामि' इति ब्रूयात् । तथा परे ब्रुवन्ति "अधुना विवादास्पदविषयेष्वशेषेष्वपि तत्तद्ग्रन्थकर्तृस्वहस्तलिखितपुस्तकान्येव सम्पाद्य 'मूढा भवानि विपरीतमतिर्भवानि भ्रान्तो भवानि' इत्येषाऽस्मीक्षामाशंसा सिद्धसाधनसनाभिरेवेति प्रतिष्ठापयेम । सत्यं घटिष्यते तादृशः कालः" इति । कामं घटतां तादृशः कालः । मल्लिनाथस्वहस्तलिखितकोशं सम्पाद्य 'पूर्वेभ्योऽधिकः' इति पाठ उपलभ्यताम् । का नु तावताऽस्माकं हानिः । स पण्डित इति मूलविरुद्धं पूर्वोत्तरविरुद्धं न्यायविरुद्धं न किञ्चन वक्ष्यतीति च कृत्वा वयमिदानीं कञ्चन निर्णयं उपलभ्यसर्वप्रमाणन्यायावष्टम्भेन अनभिनिवेशं अथाप्यूर्जितं कुर्मः । अत्र चेत् किमपि परैः प्रतिवक्तुं न शक्यते तर्हि प्रसन्ना तर्कसरणिरिति सन्तुष्यते । कालान्तरे अन्यथाभावे उपलब्धे तदीयपाण्डित्याननुगुणमेव सामान्यजनवदेव तेनापि व्यवहृतमिति स्थास्यति । नास्मदीये तर्के काचिन्न्यूनता स्यात् । 11 क

अभ्युदितेष्टिप्रकरणे 'त्रेधा तण्डुलान् विभजेत्' इत्यत्र पूर्वदेवतापनयो विधीयत इति जैमिनिः । उपरि 'ये मध्यमाः ये स्थविष्ठाः येऽणिष्ठाः' इति श्रवणात् एवमेव त्रेधा विभागोऽभिमत इति यदि साक्षाद् वेदपुरुषवागुपलभ्येत तथापि जैमिनिन्यायवर्त्मनो न काचिदशोभनता ।

'अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि' इत्यत्र 'निवर्तन्ते नितरां वर्तन्ते' इति भगवद्भाष्यकारविवरणम् । 'निवृत्त्यर्थतयैवायं धातुरिह प्रयुक्तः' इति यदि व्यासस्य साक्षात्परमपुरुषस्य वा स्वहस्तलिखितमानीयेत न तेन

भाष्यकृतां काचन हानिः ।

यद्येवं स्वतस्सिद्धत्वविभवं परित्यज्य प्रमाणाभावेऽवरूढश्चेत्

इति श्रीभाष्यं यदिशब्दं किंशब्दार्थे, तथा चेदित्यन्ते तथाशब्दाध्याहारं चाङ्गीकृत्य वाक्यभेदेन अतिक्लिष्टं व्यासार्यैर्व्याख्यातम् । श्रीदेशिकैस्तु 'केषुचित् कोशेषु चेदिति न दृश्यते । तथाचेदेकवाक्यतैव' इति तत्त्वटीकोक्तरीत्या समीचीनं पाठान्तरमुपलब्धम् । न तेन व्यासार्यैर्लाञ्छितैर्भाव्यम् । स्व

यत्र तु "प्रविवेशेव स्वानि गात्राणि लज्जया" इत्यनया दशया सद्यो जातया भाव्यं तत् किञ्चिन्निदर्शयामः ।

"प्रणति विमुख दिङ्मुखोत्त माङ्गदशक मच्छिदः"

इत्यस्मिन् श्रीदेशिकप्रबन्धगाथाखण्डे दिङ्(शा)मुखेति रावणार्थे अवाचकम् । दशमुखेति पाठेन भाव्यमिति अभिज्ञा बहवः पण्डिताः निरधारयन् । अत्र श्रीदेशिकदूषणादिव्यकैङ्कर्यनित्यप्रसितैः परैः "अनुप्राससम्पत्त्या रसवत्तरो दिशामुखेत्ययमेव पाठस्तात्त्विकः । स्वाच्छन्द्यात् देशिकोऽवाचकमपि प्रयुङ्क्ते । कोऽस्य वारयिता" इत्याचक्षाणैः तत्प्रत्याख्याने परमाग्रहः प्रादर्शि । अथेदानीं तालपत्रश्रीकोशेष्वेव तैरभिज्ञैः पण्डितैरुत्प्रेक्षितः पाठ उपलब्धः— दशमुखेति । अत्रैव गाथाखण्डे प्रणतिविमुखेत्यस्य श्रीरामप्रणतिविमुखेति प्राचीनैरर्वाचीनैश्च व्याख्यानमकारि । एतत्प्रत्याख्यानसंरम्भिभिः "संस्कृतद्राविडोभयरामायणे प्राज्ञैः" परैः 'यं कञ्चिदपि प्रति प्रणतिविमुखेति सामान्यतो वाच्यम् । न तु रामप्रणतिविमुखेति विरसं विशेषत, इत्यभिनिविश्योपन्यासि । तत्तु साक्षाद् वाल्मीकिना द्राविडकवीश्वरेण कम्बेन च सीताप्रणामस्य कण्ठत उक्तत्वाद् बाधितमित्यन्यत्र निरूपितवन्तः स्मः । 'वेदान्तगुरुकथितप्रबन्धसारम्' इत्यस्मिन् श्रीदेशिकगाथाखण्डे प्रबन्धेत्ययुक्तम् । द्राविड्यां पदारम्भे संयुक्ताक्षरस्य सर्वथाऽभावात् । इति अगस्त्यावतारमानिभिरघोषि । स नियमः संस्कृतपदविषये नास्तीति तेनेयं केवला भ्रान्तिरिति च

"அழித்தமதிக் கதிர்க்குளிரிட் டருக்கருருப் பவித்தே
விழித்த வெயிற் ப்ரபைக்கனலைப் பனிப்ரபையிட் டவித்தே"
"கோலமுத் தமிழ்ப்ரபந்த மாலருக்குரைத் தனந்தகோடி
யிச்சை செப்பி வம்பில்"

इति श्रीदेशिकात् प्राचामर्वाचां च कवीनां प्रयोगदर्शनाद् विज्ञायते । द्वितीयोद्धारे प्रबन्धपदमेव प्रयुक्तम् । एवं इतरदूषणसंरम्भेण यत्र हठात् कश्चन निर्णयः साग्रहं क्रियते, अथ विसंवादो भवति ; तत्र दूषकैरवश्यं लज्जितैश्च विषण्णैश्च भाव्यम् । न तु यत्र प्रकृत इव ग्रन्थकारेषु बहुमानेन तत्पाण्डित्यविशेषानुगुणः कोऽपि निर्णयः ऋजुना मार्गेण क्रियेत अथ च विसंवादो भवति तत्र तथा निर्णयं कृतवद्भिरल्पोऽपि क्लेशोऽनुभाव्यः । अत एव पारमार्थिकपाण्डित्यापाण्डित्ययोरयमपि कश्चन विशेषः यत् पूर्वत्र क्वचित् विसंवादोऽपि न लाघवाय उत्तरत्र संवादोऽपि न गौरवाय । व्युत्पत्तिविशेषतदभावाधीनत्वात् तत्रत्यविसंवादसंवादयोः । ग

"घटिष्यते स कालः' इति बत सोत्सुकं भविष्यन्तं प्रतीक्षन्ते । स्वविषये चिराद्भूत एव तादृशः काल इति तपस्विनो न बुध्यन्ते । एकमेव विषयमिह उदाहरामः । सदाचार्यसूक्तिरक्षानाम्नि स्वनिबन्धे "उपोद्घातरूपे शास्त्रार्थविचारे"—

"इदमेकं स्मर्यमाणमनुपदमपहासमेव जनयति नः । "गुरोः सदारस्य निपीड्य पादौ" इतीदं रघुवंशश्लोकमेते किमर्थमुदाहरन्ती ? * अत्र पादाविति द्विवचनसद्भावेऽपि सदारस्येति विशेषणबलात् दाराणामपि पादपीडनं कृतमेवेति प्रतिपादनं खलु तात्पर्यमेतेषाम् । तत्र दाराणां पादयोरपि निपीडनं कृतमिति प्रतिपद्यमानाः प्रतिपादयन्तश्चैते सत्यं प्रत्यवयन्ति । तथा हि । .... इति तावदापस्तम्बधर्मसूत्रम् । .... उज्ज्वलाख्या व्याख्या । गौतमवचनं च .... । गुरुदारेषु कण्ठरवेण प्रति-

* अभिनिवेशो दीर्घीभूतः ।

षिद्धं कृत्यं कथमनुतिष्ठेत् धर्ममर्मज्ञो दिलीपः । .... श्रीरामायणश्लोक-रत्ने च .... । तदात्वे अरुन्धती जरठेति को नु प्राह । श्रीरामचन्द्र-प्रसूतिसमये कौसल्या कतिवयस्का .... । अन्ततो गत्वा अरुन्धती-पादौ निपीडयितुमयोग्य एव दिलीप इति सिद्धान्तितं स्यादित्यत्र न कोऽपि विशयः । अथ निपीड्य पादावित्यत्र प्रणाममात्रमभिधीयत इति .... । सुखमस्तीति भाषणं हि तत् । .... अरुन्धत्यास्तदात्वे तारुण्ये निश्चिते .... अकृत्यमेवैतदिति निश्चयोऽथ निरर्गल एव ननु । तदा गुरोः पादावेव केवलं राजा निपीडयामासेति युष्माभिरकामतोऽप्यभ्युपगन्तव्यमेव खलु । एवं च सदारस्येति विशेषणसामर्थ्यं कीदृश-मिति सुगमं वः । ··· ··· यौष्माकीणोदाहरणबलादेवेति दिक् । ··· मल्लिनाथमोहदर्पणाख्यः प्राचीनग्रन्थो भवद्भिः सेवनीय इति च समये स्मारयामः ।

"गुरोः सदारस्य निपीड्य पादा-
विति* दमस्थाननिदर्शनं वः ।
अरुन्धतीपादनिपीडनं च
चक्रे स राजेति वचो विगेयम् ॥"

इत्यस्मदीयश्रीसूक्तिसिद्धाञ्जनसंज्ञग्रन्थनिवेशितं पद्यमत्र स्मारयन्तः सम-यान्तरसप्रतीक्षाः सम्प्रति विरमामः ।

शास्त्रीया विषया अनेककृतितत्त्वामर्शनोपार्जिताः
सारग्राहमिह न्यरूपिषत भोः प्रामाणिकेनाध्वना ।
पूर्वाचार्यविदूषणव्यसनितामात्रेण कैश्चिद्यदि
स्वाच्छन्द्यात् कलुषीक्रियेत सरणिः शास्त्रस्य शोच्या हि ते ॥"

इति प्रलयारभट्या व्यलिखन् । समग्रो रघुवंशो मुद्रितः सुलभः । न तत्र-पत्रकोशान्वेषणं कार्यम् । तत्र स्थलान्तरे क्वापि कालिदासः किमेवं किञ्चित्

---

* गर्वं खर्वयतीव भगवान् ।

कथयतीति सामान्यतः सर्वेषां जिज्ञासा जायेत। नैषामजनि। प्रथम एव सर्गे

**तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी।**
**तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः॥**

इत्याह कालिदासः। धर्ममर्मज्ञेन दिलीपेन अरुन्धतीपादोपसंग्रहरूपाकृत्य-करणं तस्य गुरुदम्पतिभ्यामभ्यनुज्ञानं कालिदासेन तन्निबन्धनं इति सर्व-मिदं एषां धर्मशास्त्रपारदृश्वनामुपदेशालाभाद् वृत्तमिव। पण्डितेषु दक्षिण-भारते स कश्चिन्नासीत् य एषामतिविजृम्भितं जानन् नासिकायां तर्जनीं न निदधौ। न विसिष्मिये। एवं सुबहु। अथवा सर्वम्। एवंविधैः अनु-च्छृङ्खलं अस्वच्छन्दं कृतैः क्रियमाणैश्च निर्णयैर्नूनमनन्यसाध्या अनल्पा लोकस्योपकारपरम्परा। घ

'मूढो भवानि विपरीतमतिर्भवानि भ्रान्तो भवानि' इत्यस्मदीये श्लोके आशंसा प्रतिपाद्यत इत्यपक्लृप्तिं लिखन्ति उपरि कावाचः पल्लवयन्ति च। प्रार्थनाव्यतिरिक्तोऽपि लोडर्थोऽस्तीति बत तपस्विनो न जानन्ति। श्लोके अनन्वयं च। अभ्यनुज्ञा इहार्थः। मूढं विपरीतमतिं भ्रान्तं मां भवन्तो वदन्ति। कामं तत् तथा भवतु। एवमपि शक्त्यनुसारेण भवद्भिः क्रिय-माणं पूर्वश्रीसूक्तिविनाशनं निरोत्स्यामीति श्लोकार्थः। "गुणलोऽसानि यथातथाविधः" इति नूनं श्रुतपूर्वम्। न ह्यत्र आशंसाऽर्थः।

**सामान्यव्यवहारेषु वाचंयं वेदितुमक्षमाः।**
**विद्यास्थानेषु सर्वेषु त्रैलोक्यविजयैषिणः॥** ङ

---

**वाचाटताऽन्या सुलभा जगत्यां**
**वैदुष्यमन्यद् विरलोपलम्भम्।**
**तयोर्विशेषग्रहणासमर्थै-**
**रनात्मनीनः क्रियतेऽट्टहासः॥**

---

# राजतम्, दारवम् ॥

(V. R. Srinivasa Tatacharya Siromani)

'प्राणिरजतादिभ्योऽञ्' इति पाणिनिसूत्रम् । प्राणिवाचिभ्यः प्रातिपदिकेभ्यो रजतादिभ्यश्चाञ्प्रत्ययो भवति विकारावयवयो-रर्थयोरिति तदर्थः । रजतादिगणे रजतदारुशब्दौ पठ्येते । तत्र रजतशब्दोऽनुदात्तादिः दारुशब्द आद्युदात्तः । अत्र रजतशब्दात् 'अनुदात्तादेश्च' इति सूत्रेण दारुशब्दात् 'ओरञ्' इति सूत्रेणाञि सिद्धे पुनरत्राञ्विधानं मयड्बाधनार्थम् । ततश्च रजतस्य दारुणश्च विकार इत्यर्थे राजतं दारवमिति सिध्यति ।

'रीतीर्निर्वर्तयामास काञ्चनाञ्जनराजतीः' इति सुन्दरकाण्ड-प्रथमसर्गे, 'सौवर्णं राजतं ताम्रं पितॄणां पात्रमुच्यते' इति मात्स्य-सप्तदशाध्याये, 'दारवानां च तक्षणं' इति मनुस्मृतौ, 'अभीष्टं पृथिवीगोलं कारयित्वा तु दारवम्' इति सूर्यसिद्धान्तेऽन्यत्र च राज-तदारवशब्दप्रयोगो लक्ष्यते । अतः श्राद्धप्रयोगादिग्रन्थेषु रजतमयं पात्रमित्यादिषु 'त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्' इति काव्यप्रकाशनवमोल्लासार्धपद्ये 'दार्भं दारुमयं वा आसनम्' इति इज्याप्रयोगेऽन्यत्र च प्रयुक्तयोः रजतमयदारुमयशब्दयोर्विकारार्थे साधुत्वं चिन्तनीयम् । 'द्व्यचश्छन्दसि' इति सूत्रेण छन्दसि शरम-यादिपदवद्दारुमयशब्दः सिध्यति । प्रयुज्यते च तैत्तिरीययजुर्ब्राह्मण-प्रथमाष्टकचतुर्थप्रश्नादिषु दारुमयशब्दः । तस्य भाषायां साधुत्वं तु 'वयस्यासु' इति ज्ञापकसिद्धेन छान्दसानामपि भाषायां क्वचि-त्प्रयोग इति वचनेन समर्थनीयम् ।

---

## पूर्वत्रासिद्धम् । (अनुवृत्तम्)

नागेशमतं तु नित्यानन्दपन्तपर्वतीयाविरचितटिप्पण्याद्युक्त-रीत्यानुसन्धेयम् । यत्तु वाक्यार्थचन्द्रिकायां पूर्वत्रासिद्धमित्यत्र पूर्वत्र कृते इत्यर्थमाश्रित्य "आवश्यकं चेदं कृते परस्यासिद्धत्वम् । अन्यथा दुग्धं दोग्धेत्यादौ तकाररूपझल्निमित्तकघत्वप्रवृत्त्युत्तरं स-

न्निपातपरिभाषया 'झषस्तथोः' इति धत्वं प्रति घत्वमनिमित्तं स्यात् । तथा धत्वनिमित्तकं घकारस्य 'झलां जश्' इति जश्त्वमपि न स्यात् । कृतेऽप्यसिद्धत्वे तु घत्वदृष्ट्या धत्वस्य तद्दृष्ट्या जश्त्वस्य चासिद्धत्वेन निमित्तविघातकत्वापरिज्ञानान्न तया परिभाषया धत्वजश्त्वयोः प्रवृत्तौ प्रतिबन्ध" इत्याद्युक्तं तत् सान्निपातपरिभाषाया अनित्यत्वेनापि सुसाधम् । सर्वमङ्गलायां कृते कर्तव्ये इत्यर्थद्वयक्रोडीकरणाय पूर्वत्रेत्यस्य विषयसप्तमीत्वमाश्रित्य पूर्वशास्त्रविषय इत्यर्थमुपवर्ण्य कृते असिद्धत्वे मानं फलं चोपन्यस्य केचित्वित्यादिना आहुरित्यन्तेन ग्रन्थेन यन्निगदितं तत्समञ्जसं भाति । इत्थमसत्यो ग्रन्थः 'केचित्तु पूर्वत्र कर्तव्य एवासिद्धत्वं न तु कृतेऽपि मानाभावात् फलाभावाच्च । न च विसर्जनीयसूत्रस्थभाष्यमेव मानम् । अभ्यासेन हि भूयस्त्वमर्थस्य भवतीति न्यायेन बहुषु सूत्रेषु बहिरङ्गपरिभाषया समाधानपरभाष्येण तत्रैव भाष्यकारस्य तात्पर्यान्नयनेनास्य भाष्यस्य वार्तिकाशयप्रदर्शनमात्रपरत्वेन प्रवृत्ततया एकदेशित्वात् । अन्यथाऽनेकलक्ष्यसिद्धयेऽनेकवचनानामारम्भे महद्गौरवम् । किं च पूर्वशास्त्रे कर्तव्ये इत्यर्थं विहाय पूर्वत्रेत्यस्य विषयसप्तमीत्वेन 'न मुने' इत्यत्रेव कार्यप्रवृत्त्यनन्तरमपि तद्विषयतामभ्युपेत्यासिद्धत्वकल्पने न किञ्चिदिष्टं फलम् । राज्ञ इत्यादिसिद्धिस्तु यथोद्देशपक्षाभिप्रायेण बोध्या । न चैवं कुर्यादित्यादौ दीर्घवारणाय 'नभकुर्छुरां' इत्यत्र कुर्ग्रहणं व्यर्थं कार्यकालपक्षे बहिरङ्गासिद्धत्वेनैव निर्वाहादिति वाच्यम् । तत्र यथोद्देशपक्ष एवाश्रयणीय इत्यर्थस्य तात्पर्यग्राहकत्वेनादोषात् । अत एव चञ्चूर्यत इत्यत्र दीर्घसिद्धिरित्याहुः' इति । एतादृिस्तरशेखरद्वयव्याख्यानेषु दृश्यते ।

अस्य प्रकाशनं तु, सत्सन्तानप्रसूतसदाचारानिष्ठात्मगुणोपेतवेदसर्वशास्त्रज्ञ-श्रीनिवासताताचार्याभिधानाचार्यवर्यनिरवग्रहानुग्रहाधिगतोभयवेदान्तग्रन्थजातार्थज्ञानवैशद्यातिशयैः सत्सन्तानप्रसवसदाचारात्मगुणसंपन्नैः संस्कृतद्राविडाङ्गलभाषाप्रौढप्रबन्धसमूहानवरतपरिश्रमपरिकर्मितप्रतिभाविशेषपरीवाहभूतनिजनिर्मितसरसावश्यकनिर्दुष्टानेककाव्यशास्त्रग्रन्थविस्मयावहपञ्चनदवेङ्कटेश्वरकला·

शालाद्यध्यापन सरससभावाक्यार्थकथन भाषात्रयोपन्यासकौशल-समावर्जितहृदयसहृदयसार्वभौमविपश्चिदपश्चिमगोष्ठीसादरसमर्पितमीमांसार्णव-मीमांसाकेसरि-पण्डितराजाद्यनेकबिरुदभूषकैः असत्यप्यपेक्षितग्राहकोपकारे संस्कृतभाषापक्षपातेन स्वार्जितवित्तव्ययेन नानाविधानवधिकरसवदपूर्वविषयप्रकाशनेन पत्रिकावाचक-पण्डितसमाजमधमर्णं कलयद्भिः न्याय-मीमांसाशिरोमणिभिः प्राच्यविद्येश्वरैरस्मत्सुहृन्मणिभिः श्रीशैलताताचार्यस्वामिचरणैः कथञ्चित् प्रवर्त्यमानायां विंशतिवयस्कायां परिमितावकाशायामस्यां पत्रिकायां कर्तुं न शक्यते ।

---

# पाठसमर्थनम् ॥

(Mathuranthakam T. E. Veeraraghavacharya Siromani)

---

'क्षेत्रज्ञञ्चापि....' इति गीताश्लोकस्य व्याख्याने क्षेत्रं क्षेत्रज्ञं च .... निर्देश्यौ विद्धि, इति भाष्यं दृश्यते । तत्र निर्देश्यौ इत्यस्य स्थाने 'निर्देश्यं' इति वा 'निर्देश्ये' इति वा स्यात्; 'नपुंसकमनपुंसकेन' इति सूत्रानुसारात् अथवा 'क्षेत्रक्षेत्रज्ञौ' इति समस्तः पाठः स्यात् इति त्रिकोटिकः पाठसंशयः कश्चित् पूर्वस्यां सञ्चिकायां प्रकाशितो वर्तते ।

तत्र यथास्थित एव पाठस्सम्यगिति भाति । 'पुंनपुंसकयोर्वप्रं केदारं क्षेत्रमस्य तु' इति कोशेन क्षेत्रान्तानां त्रयाणामपि पदानां द्विलिङ्गत्वमनुशिष्यते । अत एव केदारशब्दः, 'यत्रायं सारसस्य देवदत्तकेदारः' इति श्रीभाष्ये पुंसि प्रयुज्यमानोऽपि युज्यते । तद्वत् क्षेत्रशब्दस्यापि द्विलिङ्गत्वाभिप्रायेणैव पुंनपुंसकयोरिति कोशः इति युक्तम् । 'पुंस्येवान्धुः प्रहिः कूपः' इत्यादौ त्रयाणां पुंस्त्वमिव अत्रापि त्रयाणामेव वैकल्पिकलिङ्गत्वमिति कोशमर्यादया निर्णेतुं शक्यते । अतोऽत्र मूलपाठस्सम्यगेव इति प्रतीयते ।

---

# रावणप्रणतिः ॥

'प्रणति विमुख दशमुखोत्त माङ्गदशक मच्छिदः'

इत्येवमर्था अस्ति काचित् श्रीमद्वेङ्कटनाथीया द्राविडगाथासूक्तिः । भगवानत्र सम्बोध्यः । "हे भगवन् दासरत्य, श्रीराघवत्वेन स्थितस्य तव प्रणामकरणे विमुखः इच्छारहितः यो दशमुखः तस्य शिरांसि दश अच्छिदः" इति प्राञ्चोऽर्वाञ्चश्च अत्र व्याख्यानं कुर्वन्ति । अत्राहुः ।

यस्य कस्यापि प्रणामे विमुख इत्यर्थो वाच्यः । न तु विशिष्य राघवस्य प्रणामे विमुख इति ।

1) 'द्विधा भज्येयमप्येवं न नमेयं तु कस्यचित्' इति तेनैवोक्तत्वात् ।

2) 'ह्रसदुदर पृथुलकुच ललितभुज नीरजदृग् विजयि कान्ता-
प्रणयकृत चिरकलहे प्यविनमति मौळिमणौ दीप्य माने'
इति द्राविडमहाकविना कम्बेन प्रणयकुपितकान्ताप्रसादनेऽपि अकृतप्रणामो रावण इति वर्णितत्वात् ।

3) एवं रमणीये सरसे अर्थे स्थिते प्राचीनजडोक्तविरसार्थान्तरादरणायोगात् । इति ।

वयं तु पश्यामः ।

1 'न नमेयं तु कस्यचित्' इति यद्यपि सामान्येनाह तथाऽपि रामं न नमेयमिति विशेषे पर्यवसानं वाच्यम् । अन्यथा तदुक्तेरसङ्गतत्वात् ।

विष्णुं मन्यामहे रामं मानुषं देहमास्थितम् ।
कुरुष्व नरराजेन सन्धिं रामेण रावण ॥

इति माल्यवद्वचनस्य उत्तरदानप्रकरणं ह्येतत् । श्रीरामनामग्रहणाज्जुगुप्सया तु दुरात्मनो रावणस्य 'न कस्यचि'दिति सामान्येनाभिधानम् । एवं च मूलवचनानुरोधेनापि रामप्रणति विमुखेत्यर्थो वाच्यः ।

अपि च कस्य प्रणाम इति जिज्ञासायां शिरश्छेदकर्तृत्वेन वाक्ये

उपस्थितं भगवन्तं विहाय अनुपस्थितसर्वान्वयकल्पनं वाक्यन्याय-विरुद्धम् ।

2 रावणस्य स्त्रीप्रणामविरहः सीतादर्शनावध्येव । तदनन्तरं तु तत्सौन्दर्यातिशयमोहितः तां स्ववशे कर्तुमिच्छन् तस्याः पादयोः स पपात । इदम्

एतौ पादौ मया स्निग्धौ शिरोभिः परिपीडितौ ।
प्रसादं कुरु मे क्षिप्रं वश्यो दासोऽहमस्मि ते ॥

इति वाल्मीकिना आरण्यकाण्डे

भुवनत्रयशासनोज्ज्वलं दयया स्वीकुरु दासमद्य माम् ।
इति मूर्ध्नि करौ समुद्वहन्निपपातास्तधृतिर्धरातले ॥

इत्येवमर्थगाथागायिना कम्बन सुन्दरकाण्डे निन्दनपटले च कण्ठोक्तम् । तस्मात् यत्र क्वापि अकृतप्रणाम इत्येतद् बाधितमिति ज्ञेयम् ।

3 यं कमप्यप्रणतवानित्यनेन कस्य रसस्य कथं परिपोषः । श्रीराममप्रणतवानित्यनेन कस्य रसस्य का हानिः । न वयं जानीमः । प्रत्युत श्रीरामं प्राणंस्यच्चेत स भगवान् दारापहारघोरापराधमप्येनं नूनमक्षमिष्यत पर्यपालयिष्यत् इति वात्सल्यवीरत्वं करुणावीरत्वं च भगवतः युद्धवीरत्ववत् सुव्यक्तिं भवतीति श्रीरामप्रणामवैमुख्यप्रतिपादनमेव रसवत्तरं भाति ।

इत्थं प्राचीना व्याख्यातारः तदनुसारिणो नवीनाश्च न जडाः अपि तु बुद्धिमतामग्रसरा इति ।

---

माता— (स्वपुत्रमवलोक्य) अरे गर्दभ ! मध्याह्नवेलायामद्य तपनः असह्येन तापेन जीवराशीन् तापयति । त्वं किमर्थमिदानीं कुत्र पर्यटितुं प्रस्थितोऽसि ? ।

पुत्रः— "मलिनवस्त्राण्यादाय रजकाय दातुं तस्य गृहं जिगमिषामि" ।

(रे. शौरिराजः)

# रामस्य प्रेष्ठः सुहृत् कः ॥

(अनुवृत्तम्)

## ३ हनूमान् ।

अथ रामायणमहामालारत्नस्य अनिलात्मजस्य विषयं विचारयामः । रामायणस्य महामालात्वं, अनिलात्मजस्य तन्मध्यनिवेशयोग्यमहार्घरत्नत्वं च यदुत्प्रेक्षितमास्ति तदिदं रघुपुङ्गवस्य हृदयङ्गमत्वेन सविस्रम्भं सप्रेम च महारत्नवत् हृदयधार्यत्वमस्याभिव्यञ्जितम् । वानरयूथस्य यद्यपि सुग्रीव एव सुप्रथितः प्रभुः, अथापि प्रथमतः सागरतरणपूर्वकं सीताया अन्वेषणे रावणि-रावणयोः संहरणे, राघवस्य विशिष्य प्रधानदूतकर्मादिभिः योगक्षेम-निर्वहणे च प्रभञ्जनसुतस्यैव प्रधानां प्रवृत्तिं प्रसमीक्ष्य 'वातात्मजं वानरयूथमुख्यं' इति रामकथायां आञ्जनेयस्यास्ति आधिक्यमायोजितम् । तथा रावणक्षेमकथानिर्वापणस्य प्रधानं उपकरणं प्रभञ्जनतनय इति समालोच्यैव "स तु दशमुखकीर्तिस्तोमसोमस्य पक्षश्चरम इव तनूमान् प्राप रामं हनुमान्" । इति हनूमति प्रथममुपसर्पति रामं भोजश्च तद्विषयतत्वं साधु व्यञ्जयति । रामः शरणमिति तत्सविधमागतं विनीतं विभीषणं शत्रुपक्षीयं मत्वा तन्निरसनमेव समुचितमिति सुग्रीवादिषु कमपि आपाताहितं आशयं आविष्कुर्वत्सु, अन्ततश्च आप्ततमो निरस्तभीतिः निपुणमतिः मारुतिरेव विभीषणसंग्रहस्य आवश्यकतां युक्तायुक्तविचारपूर्वकं सचिवस्थाने स्थित्वा समबोधयद्रामम् । अतो हि नाम रामश्च "अनधीत्य च शास्त्राणि वृद्धाननुपसेव्य च । न शक्यमीदृशं वक्तुं यदुवाच हरीश्वरः" ॥ (युद्ध १७) इति हनूमतो व्यावहारिकीं ज्ञानशक्तिं, 'अथ संस्कारसम्पन्नो हनूमान् सचिवोत्तमः । उवाच वचनं श्लक्ष्णमर्थवन्मधुरं लघु ॥' इति वाल्मीकिश्च तस्य वाग्मित्वं सचिवोत्तमत्वं च प्रत्येकं प्रख्यापयामासतुः । लङ्कापुरीतः साकेतं प्रतिजिगमिषू रामः प्रकृष्टप्रणयिनं विश्वसनीयं दूतश्रेष्ठं च मारुतिमाकलय्य, 'ततो रामो हनूमन्तमुक्तवान् सुहृदुत्तमम् । अयोध्यां श्वः प्रयातासि सखे भरतपालिताम् ॥ गाधितासि नभो भूयः स्फुटन् मेघघटावलिम् ।

गन्तारः परमां प्रीतिं पौराः श्रुत्वा वचस्तव ॥' इति आञ्जनेयमादिदेशेति मारुतिविषयकमप्रतिमं रामसौहृदं स्वकाव्ये (स. २२) भट्टिर्व्यञ्जयति । हेतुभिरमीभिरपरैश्च हनूमान् रामस्य न केवलं दूतपदमवहत् । अपि तु विस्रम्भणीयः, सचिवः, स्पृहणीयः सखा च समभवदिति सम्यगवगम्यते । 'दौत्यं सख्यं च साचिव्यं यद्येकस्मिन् गुणाधिके । घटते पुंसि कोऽन्यः स्यात् स्पृहणीयः सतां मतः ॥'

## ४ जाम्बवान् ।

अथ प्रवयसमपि प्रज्ञया बलेन ओजसा च प्रथितप्रभावं जाम्बवन्तमपि रघूद्वहस्याप्ततमेष्वन्यतमं गणयन्ति सन्तः । रावणविजयावसरे रणसीम्नि रामसाहाय्यमेषः सुतरामाचरेदिति सम्यगनुचिन्त्य, सुबहूनां वानरप्रमुखाणां समुत्पत्तेः पूर्वमेव स्वयम्भूः स्वयमेनं जगदेकधीरं जाम्बवन्तमास्यादात्मीयाज्जनयामास । 'पूर्वमेव मया सृष्टो जाम्बवान् ऋक्षपुङ्गवः । जृम्भमाणस्य सहसा मम वक्त्रादजायत ॥' इति (रा. १. ८) चतुर्मुख एवाचचक्षे । अनेन च वानरसेनानीभ्योऽपि जाम्बवतः प्राशस्त्यं, रामप्रियकर्तृत्वेऽस्य वैशिष्ट्यं चोक्तमिति प्रतीयते । अतिवृद्धः पुराविदयं लौकिके चानुभाविके च ज्ञाने निस्समाभ्यधिकः सन् रघुनन्दनस्य निर्व्याजामित्रमभूत् । अभिज्ञानामग्रणीरिति, वृद्धानां मूर्धन्य इति, बलिष्ठानां वरिष्ठ इति, शमप्रधानानां समाभ्यधिकरहित इति, अशेषाणामपि वशिनामग्रेसर इति च मत्वा प्रियमित्रप्रीतिं दाशरथिरस्मिन् पर्यबध्नात् । एष च विषयः नृसिंहपुराणे 'ऋक्षराट् ब्रह्मपुत्रोऽयं महाप्राज्ञः सुदुर्जयः । वृद्धो ज्ञानेन वयसा जाम्बवान् राघवप्रियः ॥' इति वचनेन सूत्ररूपेणास्य सकलगुणव्यञ्जकेन अस्ति निर्दिष्टः । विभीषणस्य ग्राह्यत्वाग्राह्यत्वविवक्षायां समुपनतायां, अस्मिन्नपि सचिवत्वगौरवमाबध्य रामेण पृष्ट, "जाम्बवांस्त्वथ संप्रेक्ष्य शास्त्रबुद्ध्या विचक्षणः । वाक्यं विज्ञापयामास गुणवद्दोषवर्जितम् ॥" इति (रा ६ १७) जाम्बवानपि विचारितनीतिशास्त्रः सारवद्वचनेन राममबोधयदिति स्पष्टमवबुध्येत । जगद्विश्रुतवृद्धं जाम्बवन्तमपि अत एव रामस्याभिमतं सुहृदमाचक्ष्महे ।

## ५ विभीषणः ।

अथ रामस्य सुहृद्गणविभूषणं विभीषणमामनन्ति सन्तः इति च सोपपत्तिकं कमपि विषयमुपहरामः । जात्या राक्षसो रावणभ्राताऽयमिति मत्वा तत्परिग्रहविषये शङ्कासमाकुलेषु सचिवान्तरेषु, "न त्वस्य ब्रुवतो जातु लक्ष्यते दुष्टभावता । प्रसन्नं वदनं चापि तस्मान्मे नास्ति संशयः ॥ अशङ्कितमतिः स्वस्थो न शठः परिसर्पति । न चास्य दुष्टा वाक् चापि तस्मान्नास्तीह संशयः ॥" इति (रा ६. १७) सर्वथा सुहृत्त्वेन परिग्रहयोग्यत्वं विभीषणस्य निपुणमतिर्मारुतिः निरूपयामास । एतदनन्तरं रामश्च "मित्रभावेन संप्राप्तं न त्यजेयं कथंचन ।" (रा ६. १८) इति विभीषणे विसंवादरहितां मैत्रीं अभिनवामाविष्कुर्वन्, अजानसिद्धं आत्मीयं सौजन्यं सौलभ्यं शरणागतवत्सलत्वं च सर्वविदितमकार्षीत् । "विभीषणो महाप्राज्ञः सखित्वं चाभ्युपैतु नः ।" (रा ६. १८) इति तस्य महाप्राज्ञत्वं विश्वसनीयत्वं च सप्रमोदं रामः प्रशंसति । विश्वसनीयस्य विचक्षणस्य विभीषणस्यास्य समयोचितोपायप्रदर्शनेन साहाय्येन च खलु, असङ्ख्येयदुर्धर्षनिशाचरकुलसंकुले समराङ्गणे, स्वयमसहायशूरो मायासमरनिर्वहणनिष्णातः सुत्रामवित्रासको रावणात्मजोपि रामस्यानुजेन समभवत् संहृतः । मित्रत्वेन परिग्रहणानन्तरमेव लङ्काराज्याधिपत्ये रामो विस्रब्धचित्तो विभीषणमभिषिषेच । इदं च कर्म न केवलं रावणवधात् प्रागेव, अपि तु सागरतरणादपि पूर्वं प्रतिज्ञातरावणसंहारेण रामभद्रेण निर्वर्तितमासीत् । "निश्चितस्य सदर्थस्य सद्यो निर्वहणं सताम् । सत्यव्रतानां धीराणां व्रतमन्यादृशं विदुः ॥" मनसा लङ्काराज्यमस्मा उपहृत्य रघुवीरः 'लङ्कां प्रशाधि धर्मेण धर्मज्ञस्त्वं मतो मम' इति उपदिशन् तस्य धर्मज्ञत्वादीन् गुणान् प्रीतिप्रदर्शनपुरस्सरं श्लाघते । एवं हि नाम रामस्य प्रणयकाष्ठायाः परमं भाजनमभूत् विभीषण इति, तयोः पारस्परिकं साहाय्यविधानमपि इतरेतरसौहार्दस्य हार्दत्वं अस्फुटयदिति च नैव न जानन्ति बहवः । सुग्रीवस्य रामेण सौहार्दं अनन्तरं विमृशामः ।

---

(अनुवर्ती)

Registered No. M 2300. 50

Book XIX ॥ श्रीः ॥ Nos. 11 & 12

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तास्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमेयमिच्छति ॥

पु. १९ ] कलि- ५०४७ } व्यय { कर्कट — साधारण सं ६
सिंह — शास्त्रानुबन्धः सं ६
साहत्य ,,१२

# The UDYANA PATRIKA

A SANSKRIT MONTHLY

July } August } 1946

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. **One only.**
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari Panditaraja* **D. T. Tatacharya Siromani M. O. L.,**
Lecturer, Sri Venkateswara College,
TIRUPATI.

TIRUPATI

## विषयाः ॥

शास्त्रानुबन्धः—
कुवलयानन्दः । [बुधरञ्जनीसमेतः] १७६—१८०

1 मेनका ।
2 सुभाषितनीवी ।
3 विकर्ता ।
4 तथ्यम् (२) ।
5 सहयुक्तेऽप्रधाने ।
6 रामस्य प्रेष्ठः सुहृत् कः ।
7 पाठविमर्शः ।
8 विषयसूची ।

माङ्गल्यतन्तावासज्य सैव ररक्ष। पेटिका यथा तया योक्त्रिता तथैव अवर्तत। तां अहमेव साक्षाद् भित्त्वा लेखमाददे। इदमेकमेव परमं प्रमाणमित्यस्माभिः शक्यं ग्रहीतुम्" इत्यब्रवीत्।

श्वेता— (स्मितं कृत्वा) यूयं वागाजीवोद्योगभाजः। युष्माभिः सह वाग्वादकरणं मे अधिकप्रसङ्गिकर्म स्यात्। तथापि मुग्धायाः कस्याश्चिदुपरि अत्यन्ताभूतपापारोपणं पश्यन्ती अबला अहं न तत्सोढुं शक्नोमि। तेन पृच्छामि। न कोपः कर्तव्यः। पेटिका योक्त्रिता आसीदिति हि वदथ। आयस्याः पेटिकायाः खलु योक्त्रमन्तर्वर्ति। योक्त्रं भित्त्वा कश्चित् अन्तर्लेखौ निधाय पश्चादन्यद् योक्त्रं घटयित्वा योक्त्रितवानिति किं न स्यात्। युष्माभिर्भेदनसमये यद् योक्त्रमासीत् तदेव प्राक् स्थितमिति किं यूयं निश्चितं ज्ञातवन्तः।

तदाकर्णितवान् वराहस्वामी आकुलतरीभूतः किंचित् पर्यालोचयत्। "तथा भिन्नं चेत् मम सोदरीभ्यामेव तत् कृतवतीभ्यां भवितव्यम्। ते न जातु तथा कुर्याताम्। तथा कर्तुं तयोर्न च किमपि कारणमस्ति" इत्युवाच।

श्वेता— ते नाकुरुतामित्येव कुर्मः। तस्याः तञ्जापुरादिहागमनात्पूर्वं तत्पितृगृहस्थाः केचिन्मनुष्याः तस्यां द्वेषेण एवं मिथ्यालेखं विलिख्य निदधुरिति हि भवितुमर्हति। पश्चाद् भर्त्रा तत्पठने तस्याः क्लेशो भवत्विति मत्या केचिन्निदधुरिति किल स्यात्। तत्र तस्याः मातुः सोदरः कश्चिदासीदिति, सः परिमोषं प्रति तन्वीं प्राहिणोदिति श्यामार्यौ ह्यवदत्। तस्य तस्याश्च वैरभावात् जातु मिथ्यालेखौ निहितवानिति किं न स्यात्। तस्मात् इमौ लेखावेवाश्रित्य आत्यन्तिकनिष्कर्षकरणं न धर्मः। अहं वदामीति न युष्माभिरायस्तैर्भाव्यम्। अहं केवलं वादार्थं भाषे। युष्मत्सहोदर्योस्तथा कर्तुं किमपि कारणं नास्तीति ह्यवादिष्ट। ते तदीयान्याभरणानि अपहर्तुं वा अभिप्रायान्तरेण वा तां मारितवत्यौ किं न स्याताम्। अथ वा तां पराधीनां कृतवत्यौ किं न स्याताम्।

वराहस्वामी— तामहं समुद्रतीरे दृष्ट्वा हि हन्तुं प्रावर्तिषि । सा अन्यैर्हता स्यादिति शङ्कया कुतो भाव्यम् । तदिच्छाविरुद्धं यदि पराधीनीकृता स्यात् स्वेच्छया मोटारे वातसेवनाय न ह्यागता भवेत् । निर्बन्धादात्मानं विमुच्य मत्समीपमागतया हि भवितव्यम् । तस्मात् न सा हता न च पराधीनीकृतेति खलु ज्ञायत एव ।

श्वेता— समुद्रतीरे युष्माभिर्दृष्टा कन्या सैवेत्यत्र किं प्रमाणम् । तत्तुल्या अपरा लोके किं न भवेत् । युष्मत्सम्भ्रमेण मोटारवेगेन च सा युष्मद्भार्यावद् दृष्टा भवेत् । अथवा यद्यपि सैव सा तथापि परेषां वशादात्मानं मोचयितुमशक्ता निबद्धा भवेत् । अथ वा कथं भर्तृसकाशे पुनर्गन्तव्यमिति भीत्या क्वापि स्थितेति किं न स्यात् ।

वराहस्वामी— त्वया पृच्छयमानाः सर्वे समीचीना एव प्रश्नाः । अथापि मत्पत्न्येव सेत्यत्र न मनागपि सन्देहः । न सेति वक्तुं न युक्तम् । अन्यैरवरुध्य रक्ष्यत इति कामं स्यात् । तथा चेत् कार्यं वृत्तं, नूनं सा इयता कालेन कलङ्किता स्यात् । तथा देहशुद्ध्या विहीनां स्त्रियं कः पुनराददीत । जीवित्वा इतोऽपि परं मम अवमानोत्पादनात् वरं मृतिरेव ।

श्वेता— (सस्मितं) युष्माभिरुच्यमानं कथमस्तीति चेत् कूपे पतित्वा विसंस्थुलानां मनुष्याणां जलस्यान्तः निमज्जनं यथा तथा अस्ति । लोके स्त्रीणामापदधिका । पुमांसस्तु दुष्टाः । सौन्दर्यवतीः कन्याः पश्यन्ति चेत् योग्या अप्ययोग्याः परिणमेरन् । बलात्कारेण वा वञ्चनेन वा यदि युष्मत्पत्नीं तदभिप्रायविरुद्धं अन्ये अपहृतवन्तो भवन्ति तर्हि तस्याः प्रत्यानयनं हि तत्पतीनां युष्माकं धर्मः । अन्यैस्तस्या वञ्चनं किं तस्या अपराधो भवेत् । तस्यास्तथैवोपेक्षणं हि पापम् । अद्यापि सा अस्खलितपातिव्रत्या स्यात् । यूयमागत्य रक्षिष्यथेति अत्युत्सुकं प्रतीक्षमाणा भवेत् । पातिव्रत्यभङ्गे उत्तमाः स्त्रियः नैव जीवितं धारयेयुः । यस्मात् युष्मत्पत्नी जीवति तस्मादद्यापि सा निष्कलङ्का भवतीति निश्चितं ज्ञायते । तस्याः प्रत्यानयनचिन्तां विना तस्या वधे प्रवृत्तिः किं न्याय्या ।

सुग्रीवादयो वानराः उत्पथात् ऊर्ध्वमार्गमालोक्य विभीषणागमसमये ऊर्ध्व-मुखतया स्थिताः उन्नताः तद्ग्रहणार्थमूर्ध्वोत्पतनलोलुपाः कुतः बहूनां वान-राणां भङ्गः भञ्जनं तस्य भ्रमेण वानरान् बहूनिमे निहन्युरिति भ्रान्त्या आकुलाः मनोवैयाकुलीमातिष्ठमानाः तरसा क्रोधवेगेन भिन्नः विधूतः सेतुः सेतुवत् व्यवस्थापकः श्रीरामः तद्वाक्यं वा सूक्ष्ममप्यहितं कर्तुं अङ्गुल्य-ग्रेण तान् हन्यामित्यादिकं यैस्तथोक्ताः । तटस्थानपि समुद्रतीरे जोषमा-सीनानपि तान् विभीषणादीन् निघ्नन्ति । सालानुद्यम्य शैलांश्चेत्युक्तक्रमेण निहन्तुमुद्युञ्जते । श्रीरामप्रभावज्ञा अपि स्नेहातिशयकलुषचित्ताः तद्वाक्यम-प्युल्लङ्घ्य विरुद्धकार्यप्रवृत्ता भवन्तीति ।

एवं श्रीरामपरोऽपि । उन्नताः गुणैर्विरुरुचे रामः क्षमया पृथिवीसमः इत्युक्तनिखिलगुणपौष्कल्यसमृद्धोऽपि केचित् श्रीरामः बहवो भङ्गाः राज्या-द्भ्रंशो वने वासः सीता नष्टा द्विजो हतः इत्यादिमनःक्लेशाः भ्रमाः तज्ज-नितमनोमोहा वा सीतान्वेषणाय इतस्ततः पर्यटनानि वा , तैः आकुलः गृहादिरहितः नित्यपर्यटनेन एकवासस्थानरहितः तरसा शोकवेगजनितक्रोध-वेगेन भिन्नसेतवः कर्ता लोकस्य मर्यादामित्युक्तोऽपि निखिलजगद्व्यवस्थामु-ल्लङ्घ्य 'अमर्यादानिमान् लोकान् करिष्याम्यद्य सायकै'रिति तद्भेदनाय प्रयत-मानः तटस्थानपि निघ्नन्ति । उदासीनान् निरपराधानपि हन्तुमुद्युङ्क्ते । 'सदेवगन्धर्वमनुष्यपन्नगं जगत् सशैलं परिवर्तयाम्यह'मित्युद्घोषणात् क्रोध-स्वभाव ईदृश इति भावः । अत एवोक्तं तात्पर्यचन्द्रिकायां कामात्क्रो-धोऽभिजायते इत्यत्र 'कामे वर्तमाने विषये चासन्निहिते सन्निहितान् पुरुषान् प्रति एभिरस्मदिष्टं विहतमिति क्रोधो भवती'ति भाष्यव्याख्यानावसरे "न केवलं कामप्रतिबन्धकानेव पुरुषान् प्रति क्रोधः । अपि तु कृत्याकृत्याविवे-कान्धतया तस्यां दशायामुपलभ्यमानान् प्रत्यपी'ति द्योतनाय सन्निहितानि-त्युक्तम् । ईश्वरोऽपि क्रोधवेगमभिनयन् कस्मिंश्चिदेव रक्षसि द्रुह्यति सदेवग-

गन्धर्वमनुष्यपन्नगं जगत्सशैलं परिवर्तयाम्यहमित्याहे"ति । अतश्चेदृशक्षमादि-
गुणपुष्कलानामप्युद्धृत्तचर्याप्रवृत्तौ किमुत मितंपचानां खलानामित्युक्तार्थ-
द्वयपर्यवसानं बोध्यम् । उक्तार्थद्वयेऽपि वर्तमानसामीप्ये वर्तमाननिर्देशात्
तदुद्योगपर्यन्तार्थविवक्षा समुचितेति भावः ।

एवं रामबाणपरोऽपि । उत्पथादुन्नताः सागरापराधसमये 'चापमा-
नय सौमित्रे शरांश्चाशीविषोपमा'निति धनुस्सज्जीकरणेन ऊर्ध्वमुखमुत्पति-
ष्णवोऽपि रामबाणाः । के जले चिद्बहुभङ्गभ्रमाकुलाः सागरशोषणे चितां
बहूनां चेतनानां तत्रस्थानां भङ्गः पीडा स्यादिति भ्रमेण मनोऽवस्थाविशेषेण
श्रीरामगतेन आकुलाः एकसागरापराधमात्रात् किमिति वृथानन्तजीवान्
विघातयेयमिति क्रोधवेगनिरोधनेन निर्व्यापारतामाश्रिताः । तरसा भिन्नसेत-
वश्च । रावणवधानन्तरं सेतुपश्चाद्राक्षसागमनभिया तद्बन्धमुद्धून्वानाः । स्वकॢ-
प्तं सेतुबन्धमपि धनुर्बाणैर्बिभेदेति पौराणिकप्रसिद्धेः । तटस्थितानप्यन-
पराधान् सागरशत्रून् कतिपयान् निघ्नन्ति विनाशयन्ति । अपां पत्युश्श-
त्रूनित्युक्त्या तद्वधार्थमारोपितैस्तच्छत्रुवधादिति भावः । संहितानां वैयर्थ्यायो-
गात् अनेकभङ्गाद्वरमल्पभङ्ग इति न्यायेन तच्छत्रुषु प्रयोग इति भावः बहु-
शब्देन विवृतः ।

एवं रावणपरोऽपि । उत्पथात् शास्त्रविरुद्धबलात्काराहरणादिमार्गात्
उन्नताः उत्कृष्टभोगादिशालिनः यद्वा के शिरसि उन्नताः दशत्वसङ्ख्यावन्तः
उत्पथात् उन्मार्गात् चितां चेतनानां बहूनां भङ्गाय यो भ्रमः सकललोक-
पर्यटनं तत्र आकुलाः सदा हिंसैकलोलुपाः तरसाय मांसाय आभिन्नाः ।
सम्यङ्निहताः सेतवः लोकमर्यादास्थापकाः स्मृतिकर्तारो मुनयो यैस्तथा-
भूताः ऋषिमांसानि खादन्तमित्युक्तेः । तटस्थान् मध्यस्थवृत्त्या हितवक्तॄनपि
विभीषणादीन् निघ्नन्ति अधिक्षिप्यावमन्यन्ते । विशेषणमहिम्ना रावण इति
फलितम् ।

॥ श्रीः ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. १९] कलि ५०४७ व्यय { कर्कट साधारण } सं ११
{ सिंह शास्त्रानुबन्ध } सं १२

## विकर्ता ॥

'करणं कारणं कर्ता विकर्ता गहनो गुहः'

इत्यत्र 'कर्ता' इत्यादीनां त्रयाणां नाम्नां श्रीपराशरभट्टार्यभाष्यमेवं दृश्यते—

1 तत्र स्वतन्त्रः— कर्ता । अधिकारी, फली । जीवोऽपि हि स्वयं स्वस्य यथा सुखदुःखाभिमानी, तथा तदतिशयेन वा तदवस्थाभिमानी हि भगवान् । यथा—

व्यसनेषु मनुष्याणां भृशं भवति दुःखितः ।
उत्सवेषु च सर्वेषु पितेव परितुष्यति ॥

बहु स्यां प्रजायेयेति च ।

पृथगभिमानत्वे हि न बहु स्यामिति स्यात् ।

2 अत एव तत्फलभोगेन हर्षशोकादिभिर्विकुर्वाणः—विकर्ता । स्वार्थहर्षशोकाद्यभावेऽपि परार्थतत्प्रसक्तिरदोषः । अन्यथा परदुःखदुःखित्वादयो गुणाः कथमस्य स्युः ।

3 एवं सर्वेषां ज्ञानायतनभोगतदुपकरणस्वरूपेषु तद्भिन्नतन्त्राभिमानात्मके महागुणे अतिभूमितया— गहनः । दुर्विज्ञान इति । —

इति । इदमिदानीं विव्रियते ।

1 'स्वतन्त्रः कर्ता' इति पाणिनिसूत्रानुसारेण प्रसिद्धमर्थमाह—

स्वतन्त्र इति । कर्ता द्विविधः अधिकारी अनधिकारी चेति । तत्र आद्यः यजमानः । अन्त्यः ऋत्विक् । अत्र प्रथमविध एव कर्ता विवक्षित इत्याह अधिकारीति । अधिकारीति च न सामर्थ्यादिमान् विवक्षितः । अपि तु 'अधिकारः फलस्वाम्यम्' इति मीमांसकोक्तरीत्या फलस्वामीत्याह– फलीति। ननु कथं भगवतः फलिरूपकर्तृत्वम् । शास्त्रवश्यस्य ब्राह्मणादेर्यजमानस्य हि तत्। इत्यत्राह– जीवोऽपीति । अयं भावः । यजमानस्यापि कथं फलित्वम् । ऋत्विजः कुतो न भवति । "यजमान एव फलमुत्पद्यते। न ऋत्विजि । यस्मिन्नेव फलमुत्पद्यते स एव फली नेतरः" इति चेत् कामं यजमान एव फलमुत्पद्यताम्। तेनैव ऋत्विगपि फलीति कुतो न भवति । तस्यापि यजमानवत् तत्फलसाधनयागकर्तृत्वात्। अथोच्यते– न साधनानुष्ठानमात्रेण फलस्वामित्वरूपं फलित्वम् । अपि तु 'एतज्जन्यं फलं मम। एतत्फलभोक्ता अहम्' इति यस्य बुद्धिः अभिमानः तस्य फलित्वम् । एवंविधोऽभिमानः यजमानस्यैव न ऋत्विजः । 'अयं यजमानः फलभोक्ता' 'अस्य यजमानस्य फलम्' इत्येव हि ऋत्विक् प्रतिपद्यते । अतो नास्य फलित्वमिति— सत्यमेवमेतत् । किन्तु किं सर्वेश्वरः ऋत्विक्तुल्यः उत अन्यादृश इति विमर्शनीयम्। न हि ऋत्विग्वत् 'अयं यजमानः । अयं फली' इति सर्वेश्वरस्य प्रतिपत्तिः। अपि तु 'अहं यजमानः । अहं फली' इति। एवं च ईदृशप्रतिपत्तिमान् यजमानः यथा कर्ता अधिकारी फली तथा ईश्वरोऽपि । अहमित्यभिमानाविशेषात् । पृथक्, स्वस्मादितर इति प्रतिपत्त्यभावात् । इति

नन्वेवं चेतनानुभाव्यं फलं सर्वेश्वरः स्वकीयं मन्यत इतीदं कुत्र दृष्टमित्यत्र श्रीमद्रामायणं प्रमाणयति यथेति । मनुष्याणां व्यसनेषु दुःखितो भवति । व्यसनप्रयोज्यदुःखवान् भवतीत्यर्थः। व्यसनं विपत् । येषां विपदः तेषामेव हि तज्जन्यं दुःखम् । मनुष्याणां विपत्सु मनुष्या दुःखभाजो

भवन्ति । कथमीश्वरो दुःखितो भवतीत्युच्यते । अनुपपन्नमिवेदम् । अतोऽत्र अयमभिप्रायः । विपन्ना मनुष्या एव साक्षाद् दुःखिताः । तेषां तदेव दुःखं 'मम' इत्यभिमन्यते सर्वेश्वरः । अहं दुःखीति मन्यते । ननु लोके विपन्नान् दुःखितान् पश्यतो मृदुमनसः पुरुषस्य यथा साक्षात् स्वानुभाव्यं दुःखं स्वात्मनि जायते तथा ईश्वरस्यापि । तत एव 'भृशं भवति दुःखित' इत्युच्यते । इति स्वरसतः प्रतीयते । किमिति 'स्वात्मनि दुःखान्तरं नास्ति । परदुःखमेव स्वकीयत्वेनाभिमन्यत' इति क्लिष्टकल्पना क्रियत इति चेत् श्रूयताम् । दुःखं नाम स्वतः प्रतिकूलतया वेदनीयं ज्ञानम् । अपुरुषार्थभूतम् । हेयम् । कथमिदमखिलहेयप्रतिभटे परमात्मनि सम्भवेत् । परदुःखाधीनं दुःखं न हेयमिति चेत् दुःखमपि तन्न स्यात् । दुःखं चेत् हेयमेव । दुःखं च अहेयं चेति वह्निश्च अनुष्णश्चेतिवदसम्भवि । कथं हि प्रतिकूलं किञ्चिदहेयं भवेत् । अथ तन्न प्रतिकूलं तर्हि न दुःखम् । न ह्यश्वत्वाभाववान् कश्चिदश्वो भवेत् । तस्मात् स्थितमेतत् यज्जीवेषु दुःखितेषु तदवस्थाभिमानित्वादेव ईश्वरस्य दुःखित्वम् । न तु स्वात्मनि दुःखान्तरवत्तयेति ।

ननु परकीये स्वकीयत्वाभिमानः सर्वेश्वरस्य भवतीत्यत्र किं प्रमाणमित्यत्राह- बहु स्यामिति । लोकसृष्टिसङ्कल्पो ह्ययम् । यदि भगवतः सृष्टे लोके पृथगभिमानः अयं लोकः सुखी दुःखी इति, तर्हि सृष्टिप्रागभाविना सङ्कल्पेन सूक्ष्मतया एकत्वेन स्थितमिदं चेतनाचेतनात्मकं वस्तु बहु स्यादित्येवंरूपेण भवितव्यम् । न चैवं भवति । अपि तु अहं बहु स्यामिति । तेन सृष्टेऽपि लोके तत्तदवस्थे तत्तद्वस्तुनि अहमित्येव तस्याभिमान इत्यत्र कः सन्देह इति भावः ।

2 एवमधिकारावस्थायां फलानुभवावस्थायां च पृथगभिमानाभावेन

भगवतः कर्तृत्वमुक्तम्। अथ जीवानां फलानुभवेन यो विकारः हर्षे मनसो विकस्वरत्वं शोके अवसन्नतेति, तदवस्थायामपि तादृशाभिमानवत्त्वेन तादृश-विकारवान् भगवानित्यभिप्रायेण नामान्तरपाठ इति योजयन्नाह— अत एवेति। ननु यदि परगतदुःखेऽपि भगवतः स्वकीयत्वाभिमानोऽस्ति तर्हि तस्य दुःखित्वमवर्जनीयम्। एवंविधाभिमाननिबन्धनमेव हि जीवस्यापि दुःखित्वम्। स चेत् भगवतोऽस्ति कथं दुःखित्वान्मोक्षः। अखिलहेयप्रत्य-नीकत्वं च तस्य ब्रवीषि। अत्राह— स्वार्थेति। अखिलहेयप्रत्यनीकत्वं भग-वतः तत्स्वरूपविषयम्। स्वस्वरूपगततया स्वमात्रानुभाव्यं यत् हर्षशोकादि तत् तस्य नास्ति। यत्तु स्वशरीरभूततत्तज्जीवादिगतं तत्तज्जीवानुभाव्यं हर्ष-शोकादि तस्य स्वकीयत्वाभिमानेन भगवतो हर्षशोकादिमत्त्वं यत् प्रसज्यते तदस्माकमिष्टम्। प्रामाणिकत्वात्। अप्रामाणिकाभ्युपगमे हि दोषः स्यात्। किं तर्हि तत्र प्रमाणम्। नन्विदमेव मुनिवचनम्— व्यसनेषु मनुष्याणा-मिति। परव्यसनेषु भगवतो दुःखित्वमत्रोच्यते। न च दयालुजीववत् भग-वतः स्वरूपतो दुःखित्वमुपपद्यते। तत्र यदि अपृथगभिमानमूलतया मनु-ष्यदुःखाभिन्नदुःखवत्त्वमपि नाभ्युपगम्यते तर्हि किमालम्बनमिदं अननृतं मुनिवचनं भवेत्। न चेदं दोषत्वेनैव मुनिना पठितम्। 'बहवो नृपकल्या-णगुणाः पुत्रस्य सन्ति ते' इति गुणत्वकण्ठोक्तेः। इति भावः। परदुःख-दुःखित्वेति। परदुःखेन दुःखित्वम् परदुःखाभिन्नदुःखवत्त्वम्। धान्येन धनवानितिवत्।

3 नन्वेवं कृत्स्नजगद्दुःखदुःखित्वं भगवतः स्यादिति चेत् स्यान्नाम। इष्टमेवैतत्। इत्यभिप्रायेण नामान्तरं योजयन्नाह— एवमिति। तदभिन्न-तन्त्रेति। न तु स्वतन्त्रेति भावः।

तदेवं परदुःखदुःखित्वेति सहस्रनामभाष्योक्तेः परदुःखजन्यदुःखा-न्तरवत्त्वं भगवत इति नार्थ इति स्थितम्।

---

# तथ्यम् (२)॥

मदिरेक्षणा (5)

1) अस्वस्थैः स्वास्थ्यप्रतिलम्भाय श्लाघ्यतमैवैद्यरत्नोपसर्पणं यत् क्रियते तत् काममुचितम् । किन्तु दौर्भाग्यवशात् तदीयोऽपि यत्नः व्यक्तिविशेषे न फलाय कल्पत इति पश्यन्तो दूयामहे ।

यदि प्रामाणिकः कोशोऽस्ति तर्हि पक्ष्यर्थोऽपि भवतु इति सुरार्थवादिनोऽनुमन्यन्त एव । कोशसद्भावे तत्प्रामाण्ये च निश्चिते नाट्यशास्त्रोक्तार्थ एव दृढप्रत्यया वयमपि कथञ्चित् तदभ्युपगमे सज्जा एव । असकृदिदमुक्तपूर्वम् । परं तु न स प्रकृतो विषयः ।

व्याख्यानानुरोधेन सुरार्थमभिहितवत्सु परमऋजुषु समानाधिकरणानल्पवैदुष्यविभ्राजितेषु प्रतिवत्सरं बहूनां विद्यार्थिनां शिरोमणिकक्ष्याप्रवेशयोग्यतासम्पादनप्रख्यापितकौशलेषु भागवतोत्तमेषु अकाण्ड एव बलवदपराद्धवद्भिः परैः तस्मिन्नर्थे न कश्चन दोषो वक्तुमशक्यत । स्वाभिमतार्थस्थापनमप्यत्यन्तमशक्यमासीत् । अस्यां स्थितौ गत्यन्तरविरहात् महतां व्यपदेश एकः शरणीकरणीयो बभूव । तत्र पदेपदे अनृतवादिनो वञ्चनशीलस्य स्वस्य वचनं न कश्चिद्विश्वसिष्यतीति सम्यग्जानन्त इमे अस्माकं प्रत्ययोत्पादनाय साक्षिनिर्देशपुरस्सरं बहु लिखन्ति स्म । वयं तु तेषां लेखेषु अत्र अज्ञानं अत्र दन्धनं अत्र वञ्चना अत्र तत्त्वकथनं इति दर्पण इव प्रस्फुटं पश्यन्तः इहातिदैन्यं व्यञ्जितमवगम्य अस्मिन् विषये तेषां वृथा परिश्रमवारणाय 'तत् तथ्यं गृह्णीमः' इत्यभिधाय, प्रथमत एवेदं परप्रत्ययमात्रशरणत्वं प्रकाश्य बहुमिथ्याकोशनिर्देशव्यसनपराङ्मुखैः कुतो नाभावीत्यावेदयाम । एवमस्मन्मुखादागतं तथ्यपदमाकर्ण्य तन्मात्रावलम्बेन स्वपक्षस्य विजय इति लोकव्यामोहनोपयोगि किमपि इन्द्रजालं कर्तुमारभन्त । तन्निरुन्धन्तो वयं इतः पूर्वस्मिन् तथ्यलेखे अस्य च प्रकृतविषयस्य च न कोऽपि

सम्बन्ध इति विविच्य प्रादर्शयाम । 'एवमेतत्' इति प्रतिपत्तिं, धैर्ये सति एवं वाचाऽभ्युपगमं च विना नान्यत् किमप्युत्तरमत्र भवितुमर्हति ।

एवं सति, अभिज्ञाः केचित् कोशं प्रदर्शयिष्यन्तीति किमर्थमिहोच्यते । अन्यैः कोशप्रदर्शने एषां किं भवति । न च कोशविषयोऽस्मदीयस्तथ्यलेखः । तस्य कथमिदमुत्तरम् । प्रत्यंशमुत्तरमदीयतेति व्यामोहनमात्रोद्देशेन यथाप्रकृति असम्बद्धमेवेदमलिख्यत ॥ पुनरपि वैदिकमनोहरायामन्यल्लिखन्ति —

> मदिरेक्षणार्थविषये यच्च यावच्च* लेखनीयमखिलं बह्वीषु सञ्चिकासु व्यलेखि सुष्ठु । काञ्चीपुराभिजनैः चतुश्शास्त्रविद्भिः तण्डि-पट्टप्पाताताचार्यैः तदनुचरैः वारादि चा(स्वा)मिमिश्रश्रीमहामहोपाध्याय तिरुप्पुट्-कुळिस्वामिपादानां वचसि गौरवभूम्ना कोशविशेषसमीक्षया च प्रोक्तमर्थमेव वयं न्यरूपयामेति ससाक्षिकमुपापीपदाम । तत् तथ्यमिति गृह्णीम इति लिखन्ती उद्यानपत्रिका तावता विरन्तुमर्हति । अथापि† शुष्कवचसां राशिभिरेव स्वावकाशः पूरणीय इति तस्या व्रतावलम्बनं सुप्रसिद्धमेव ।

इति । अत्र ब्रूमः । लेखनार्हं यत् तत् किमपि नालेखि । स्वयं यल्लिखितुं शक्यं तत्तु सर्वमलेखि । तस्य सर्वस्य सौष्ठवमन्यद्वा अस्मदीयं प्रतिलिखितं सह कृत्वा अनुवाचयद्भिः स्वयं-ज्ञास्यते । किमिह तत्प्रतिज्ञानेन । प्रोक्तमर्थमेव न्यरूपयामेत्युच्यते । तैः प्रोक्तस्यार्थस्य समर्थने नूनं ते प्रगल्भाः । तत्त्वेऽन्यथाज्ञाते तदभ्युपगमानुगुणधैर्यप्रदमनःपरिपाकशालिनश्च । एषां तु तन्निरूपणमशक्यमासीत् । न हि स्त्रीलिङ्गशब्दार्थानुमितः पुलिङ्गशब्दकोशः,

---

* '.... ....विषये लेखनीयमखिलम्' इति वा 'यच्च यावच्च लेखनीयं तदखिलम्' इति वा 'लेखनीयं यच्च यावच्च' इति वा युक्ततरम् ।

† अथापीत्यस्य कोऽर्थः कुत्रान्वय इति चिन्तनीयम् ।

वङ्गाक्षरमुद्रितो मिश्रकोशः, म. म. परवस्तुस्वामिकोशश्च तत्र प्रमाणमिति तैरुक्तम् । नापि 'कोशः कोशत्वेन न प्रमाणमिति नव्यं वचः' इति, राजपुरुषादिपदेषु सामानाधिकरण्यं नास्तीति, लक्षणादिकं तत्त्वेन न दुष्यतीति, अलङ्कारशास्त्रे उपमाया एव प्राथम्यं सर्वप्राधान्यं चेति, अमरसिंहादयो न मतविशेषावलम्बिन इति तैरुक्तं श्रूयते । नापि च सुरार्थवाचिनो भागवताः 'कल्पयङ्गार्' इति कथयित्वा अधिक्षेप्तव्या इति तैरुक्तमिति साक्षिसाहाय्येनापि सुनिरूपम् । एष एव हि एषां निरूपणस्य पन्थाः । सुरार्थोऽसङ्गतः पक्ष्यर्थः प्रामाणिक इति तु नैवाद्यावधि निरूपितम् । एवं तत्त्वे स्थिते किमिति अमिश्रं आर्द्रमनृतमुच्यते— तैः प्रोक्तमर्थं न्यरूपयामिति ।

तत् तथ्यमिति गृह्णीम इत्यत्र तच्छब्देन किमुच्यते । 'आप्ततमयोः प्रवचने विस्रम्भमूम्नैव अस्माभिरस्मिन्नर्थे आजगृहे' इति यदुच्यते तत् तथ्यमिति गृह्णीमः" इति हि तत्रास्मदीयं वाक्यम् । 'विस्रम्भभूम्ना आजगृहे' इत्येतत् तच्छब्देनोच्यते । तस्य तथ्यत्वमभिधीयते । तथा सति 'न्यरूपयामिति ससाक्षिकमुपापीपदाम । तत् तथ्यमिति गृह्णीमः ।' इति लिखन्ती" इति स्वनिरूपितार्थतथ्यत्ववादप्रतिपत्तिकरी वचनभङ्गी कथमाद्रियते । केवलं प्रतारणं ह्येतत् ।

अथ कः शुष्कशब्दार्थः । यदि उपपन्नहृदयङ्गमार्थराहित्यं न तस्य उद्यानपत्रिकावचस्सु मनागप्यन्वयः । यदि परोक्तिषु अत्यन्तानुपपत्तिप्रकाशनेन तद्बृंमनस्यावहार्थकत्वं तर्हि इदमत्र प्रत्यक्षं परिसमाप्य वर्तेत इत्यभ्युपगच्छामः ।

---

2) 'शास्त्रप्रमाणकानामस्माकं अर्थानर्थौ शास्त्रावसेयौ' इत्यवोचाम । अत्र इदमुत्तरमिति श्लोकं पठन्ति—

**शब्दप्रमाणकानां वः शब्द एव ह्यनर्थदः ।**
**शब्दतोऽनर्थसम्पत्तिर्जीवितान्तमवेक्ष्यताम् ॥**

इति । अत्र स्वस्य शब्दप्रमाणकत्वं नास्तीति यत् प्रकाशयन्ति तेनस्वस्व-रूपं यथावत् प्रकाशयन्ति । इदमिदानीं निश्चितं ज्ञात्वा चिरात् स्थितं संशयं जहिमः । शब्दतोऽनर्थसम्पत्तिमस्मद्विषये प्रतिजानते । अस्मदीयं 'निन्दासुखं' पठित्वाऽपि यदेवं मन्यन्ते तत् तत्रत्यस्य हार्दस्य भावस्याग्रहणात् ।

तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ।
मानावमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ॥

इति हि भगवदुपदिष्टां निष्ठां वयं शिक्षामहे ।

ग्रामसिंहः पिशाचाग्र्यो विपर्यस्तमतिर्भ्रमी ।

इति नामावलिं कृत्वा प्रतिक्षणमर्चना इदानीं श्रीदेशिकादीनामिवास्माकं जीवितात्परमपि चिरायुर्भिर्भूत्वा क्रियताम् । इयं सर्वा 'तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्' इति न्यायेन भगवन्तमेव प्राप्स्यति । तथा च

अप्यशब्दप्रमाणानां शाब्दः स जगदीश्वरः ।
ध्रुवं शाब्दीं गतिं दाता जीवितान्तः प्रतीक्ष्यताम् ॥

---

3) अमुद्रितस्य दुर्लभस्य कोशस्य निर्देशे सङ्कटान्मोक्षो भविष्यतीति मनोरथं कृत्वा विशाखपट्टण म. म. परवस्तुस्वामिनां कोशं निरदिशन् । वस्तुतत्वं जिज्ञासमाना वयं दैवात् सान्निध्यभाजः तत्पौत्रान् गुणनिधीन् प्रार्थयामहि तदवलोकनेन तत्त्वोपलम्भः कार्य इति । ते तदग्रजान् प्रार्थयन्त । लब्धमुत्तरमस्मभ्यं विलिख्य न्यवेदयंश्च । तद् वयं पत्रिकायामावेदयाम । ततः

எந்த விஷயம் எந்த இடத்தில் எழுதப்பட்டிருக்குமென்பதைக்கூட தெரியமாட்டாதவர்கள் அதைப் பார்த்ததும் பொய். ஏதோ எழுதினதாகத் தெரிவிப்பதும் பொய்.

[को विषयः कुत्र लिखितः स्यादित्यपि ज्ञातुमशक्तैः तद्दर्शनमपि मिथ्या । किमपि लिखितमिति यदावेदयन्ति तदपि मिथ्या ।]

इति परे आलिखन् । किं कचित् कदाचिदस्माभिरनृतमुक्तपूर्वम् । किमिति अकाण्डे एवं घोषणम् । प्रथमं तस्मिन् कोशे सोऽर्थ उक्त इत्यनृतवदनम् । अथ तत्र तदभावे ज्ञापिते तस्य कोशस्य तत्कर्तृपौत्राणां चावज्ञा । एषां तत्र तदभावज्ञापकस्य लेखनस्य मिथ्यात्वाभिधानम् । अस्माकमसत्यवादित्वाभिधानमिति महत्येषा असह्यापराधपरम्परा दीर्घाभ्यासदृषद्भूतचित्ततया निश्शङ्कमाक्रियत । सौजन्यतृष्णापरतन्त्रा वयमत्र किमपि वाचा अवदन्तः केवलं तदीयं लेखं प्राकाशयाम मा कश्चिदस्मान् परेषां वचसि प्रत्ययेन असत्यवादिनो ग्रहीदिति । इमं लेखप्रकाशनोद्देशं ग्रहीतुमशक्ता वा सङ्गतस्य वक्तव्यस्य विरहेण अगतिकाः सन्तो वा असङ्गतमेव पुनः किमपि लिखन्ति —

**तादृशेष्वन्यतमस्य कस्यचित् काकदेन न कोऽपि मुह्येद्विवेकी ।**

इति । लेखनं मिथ्या । अस्माभिरविदितं मिथ्येति यदुक्तं तस्य किमिदानीमासीत् । 'तेषां काकदेन न कोऽपि विवेकी मुह्येत्' । पैरेवमभिधीयमानमनुवाच्य तु सर्वेऽपि विवेकिनः सपदि मुह्येयुः । 'वयमेवानृतवादिनः' इत्यभ्युपगमः कार्यः । तद्गृहं गत्वा कोशमादाय इदमिहायमर्थ उक्त इति तत्स्थलप्रदर्शनं वा कर्तव्यम् । तद्विहायासङ्गतोक्त्याम्रेडनेन किं भविष्यति ।

एवमेव श्रीपट्टाभिरामशास्त्रिणामैतिह्यपाठोऽपि इह असङ्गत एव क्रियते । एवंविधैः अत्यन्तासङ्गतैरत्यन्तासमञ्जसैरपर्यन्तैर्दुर्वादैरुद्विग्ना एव विद्वदग्रेसराः एतैर्निरनुक्रोशं विनाश्यमानानां श्रीसूक्तीनां शास्त्रार्थानां च प्रतिसमाधाने कार्यत्वबुद्ध्या प्रवृत्ता अपि मध्ये विरमन्ति । न तु शास्त्रार्थनिरूपणाशक्त्या । एते तु तावतैव तृप्ता जयं घोषयन्ति । प्रसङ्गादन्यत् किमप्युच्यते । अमरकोशस्यापि कचिदनादरणीयत्वमुपपादयन्तो वयमप्पय्यदीक्षितेर्कि काञ्चित्तदुपयोगिनीमुदाहराम । तत्रैते अपृच्छन्– 'किं यूयं तदुक्तं सर्वं साञ्जलिबन्धं गृह्णीथ' इति । बहवो ग्राम्या न्याया एते-

रुपयुज्यन्ते । तेष्वयमेकः । यस्मात् तदुक्तं सर्वं वयं न गृह्णीमः तस्माद्यत्र क्वापि तदुक्तं प्रमाणतया नोदाहरणीयमिति न्यायः पर्यवस्यति । अयमेव न्यायोऽत्र यद्येतान् प्रत्युपयुज्येत किं बत एभिर्वक्तुं शक्यम् । किं पट्टप्पातातााचार्योक्तं सर्वं भवन्तः साञ्जलिबन्धं गृह्णन्ति । इह परं किमिति तदुपनिषत्कृत्य भागवतोत्तमापचारेषु बद्धकच्छैर्भूयत । श्रीपट्टप्पास्वामिषु या एषां तात्त्विकी प्रतिपत्तिः सा—

> இந்த அய்யா ஸ்வாமி போலவே ஸ்ரீ பட்டப்பா தாதாசாரும் எழுதிவைத்திருக்கிறார். எல்லாம் பெரும் புளுகு.
> **(यथाऽयमय्यास्वामी तथैव श्रीपट्टप्पातातााचार् अपि लिखितवान्। सर्वं महानृतम् ।)**

इत्यनया एषामुक्त्या स्पष्टं ज्ञायते । भवत्प्रयुक्तो बाणो भवन्तमेव प्रहरतीति तत्र तत्र शास्त्रकारा वदन्ति । तदिहानुसन्धेयम् ।

एतावद् विलिख्य उपसञ्जिहीर्षितामस्माकं, भूमिकान्तरपरिग्रहेण एतैरभिहितमन्यत् चक्षुर्गोचरतामेति ।

> मदिरेक्षणार्थविचारे .... .... .... उद्यानपत्रिकाधिपतयश्च यावच्छक्ति संस्पर्ध्य भग्नाः 'कुत्रेति न ज्ञायते' इति स्थितिमधिगतास्तपस्विनः सन्ति ।

इति लिखन्ति । 'इतः परं मदिरेक्षणार्थविवादानुबन्धिनो लेखस्य नावकाशलेशमपि दास्यति मनोहरा' इति तटस्थवद् गम्भीरमलेखि । तावता विरता इत्यमन्यामहि । अद्यापि तु चापलं तान् न जहातीव । चतुर्थे मदिरेक्षणालेखे सङ्क्षेपाय विषयानुक्तवन्तः स्मः । तत्र कस्यांशस्योपरि किमुक्तं येन भङ्गो जातः । विशिष्योच्यताम् । अलं सामान्यकथया । अनृतवादस्यापि अवधिः कश्चिन्नूनमस्ति ।अखण्डकूश्माण्डस्य अन्ने पिधानमशक्यम् । एवमनुश्रूयते । मारीचभक्ताः किल घोषणामकुर्वन्—

हन्तालोकमुदीरयेम सततं लोकत्रयोल्लङ्घन-
प्रौढप्राभवसम्भृताखिलरिपून्माथाय नाथाय नः।
क्षिप्तो येन स राघवो भयभरोत्कम्पी दिनेन्दुद्युति-
र्हीणो दीनमना वनेषु तनुते सोन्मत्तचर्यां चिरम्॥

अन्धकारसुहृदश्च—

सहृदयावान् यदि कश्चिदस्ति कुतुकी संख्यातुमोजास्विनो
नूनं तस्य कनिष्ठिकास्थितिमलावेकोऽन्धकारोऽर्हति।
यस्यानुग्रहतो लसन्ति रजनौ तेजांस्यथ न्यक्कृतो
येनार्कश्चरति ह्रिया परिहरन् तेजोन्तरप्रेक्षणम्॥

मदिरेत्यस्य मदकरार्थमुक्तवतो मल्लिनाथस्य भावं बहुकृत्वो विशद-मभिहितवन्तः सः। तत्सर्वमनाकर्णितवन्त इवाद्य लिखन्ति— "मदिरा सुरा। तद्वन्मादकमीक्षणम्' इति केचित् व्याचक्षत। ईदृशस्यार्थस्य अचा-रुतां प्रतियन्तः इममर्थं विहाय धातु(योग)शक्त्या मदकरमित्यर्थं व्युत्पाद्य व्याचख्युः। मदिरावन्मादकमित्यर्थेऽनुपपत्तिं कण्ठरवेणाविष्कृतवान् मल्लि-नाथसूरिः।"— इति। मल्लिनाथोक्ताऽनुपपत्तिः मदिरलोचना इति दृष्टान्तस्थले असम्भव एव। न तु सुरार्थेऽचारुता। न चान्ये केचिन्मद-करार्थवादिनस्तत्र अचारुतां वदन्तः सन्ति ज्ञायन्ते वा। एवं निपुणमिव लिखद्भिर्या वञ्चना चिकीर्ष्यते साऽस्माभिर्न गृह्यते।

"अथ केचिन्मन्यन्ते निषिद्धाया निहीनायाः सुराया दृष्टान्ततया कथने कथं स्वारस्यम्" इत्याशङ्कामुद्भाव्य 'श्रोत्रियस्तु काममिदं प्रत्या-चष्टाम्। कविवरसरणौ तु न कापि न्यूनता' इति समाहितवता विद्यार्थिना स्वबुद्धेः ऋजुगामित्वं सुप्रकाशितम्। 'श्रोत्रियाग्रेसरस्य वाल्मीकेर्मते प्रत्या-ख्येयः प्रत्याख्यातश्चैवायं मद्यार्थ इति स्वेनैव ननु प्रतिष्ठापितमासीत्' इति तन्निरसनप्रसितैः प्रौढमानिभिस्तु वक्रं गम्यते। श्रोत्रिय इति हि अरसिको विवक्षितः। कविवरेत्यस्य प्रतिनिर्देशरूपत्वात्। न च तादृशश्रोत्रियाग्रेसरो वाल्मीकिः। कविवरप्रतिकोटिश्रोत्रियगोष्ठ्यां वाल्मीकेरन्तर्भावं कुर्वद्भिः समी-

चीना तावत् सम्भावना तस्य कृता भवति । कथं च सुरा निहीना । कविभिः पानगोष्ठीवर्णनात् । वाल्मीकिरेव हि भगवान् भरद्वाजातिथ्ये "अग्निशालां प्रविश्याथ पीत्वाऽपः परिमृज्य च । आतिथ्यस्य क्रियाहेतोर्विश्वकर्माणमाह्वयत् ॥" इत्युपक्रम्य "विचित्राणि च माल्यानि पादपप्रच्युतानि च । सुरादीनि च पेयानि मांसानि विविधानि च ॥" इत्याह । 'सुराघटसहस्रेण .... .... यक्ष्ये त्वां प्रयता देवि' इति गङ्गातरणे 'यक्ष्ये त्वां गोसहस्रेण सुराघटशतेन च' इति कालिन्दीतरणे च सीतादेव्या उक्तिरादिकविना निबद्धा । सौत्रामणीनाम्नि क्रतौ सुराग्रहा गृह्यन्ते । तत्र होम्यं द्रव्यं सुरा । 'अनाविद्धं रत्नं मधु नवमनास्वादितरसम्' इति कालिदास एव शकुन्तलाविषयतयैव दुष्यन्तमुखादव उपमानत्वेनैव रत्नवदेव सुरामुपादत्ते । इहाखण्डं रूपमुपमेयमिति तु विशेषः । 'अनासवाख्यं करणं मदस्य' इत्यासवशब्दवाच्यायाः सुराया मदकरणत्वं च स्फुटमेव कालिदासः प्रकाशयति । एवमपि यदि सुरा निहीना पक्षी कथं अभवत् । सोऽपि हि ब्राह्मणैर्भोजने वर्जनीयः ।

आपादचूडमयथार्थविरुद्धशुष्क-
ग्राम्योक्तिदुर्भगवचःप्रचुरं विलिख्य ।
दिक्सौधबद्धविजयध्वजवस्त्रधूति-
वीक्षोत्सुका ददाति हन्त दृशं समन्तात् ॥

प्रमाणन्यायाभ्यां विषयमुपपाद्यातिविशदं
चिरन्तुं नः कामो न तु विमतभङ्गं प्रथयितुम् ।
हठादाकर्षन्तो मुहुरिह तलातलयवधि नः
स्वयं तु स्वं भङ्गं सकलजनवेद्यं विदधति ॥

---

उदेति सूर्योऽस्तमुपैति चन्द्रः
वातः शनैर्वाति च शीतलोऽयम् ।
उत्तिष्ठ हे वत्स विमुञ्च शय्यां
प्रक्षाल्य वक्त्रं पठ साधु पाठान् ॥

# सहयुक्तेऽप्रधाने ॥

(V. R. Srinivasa Tatacharya Siromani)

अत्र महाभाष्ये उदाहरणनिरूपणावसरे 'इदं तर्हि पुत्रेण सहागतो देवदत्त इति । अप्रधाने कर्तरि तृतीया यथा स्यात् । एतदपि नास्ति प्रयोजनम् । प्रधाने कर्तरि लादयो भवन्तीति प्रधानकर्ता केनाभिधीयते । यश्चाप्रधानं सिद्धा तत्र कर्तरीत्येव तृतीया' इति भाषित्वा अन्ते 'सहयुक्तेऽप्रधानवचनमनर्थकम् उपपदविभक्तेः कारकविभक्तिबलीयस्त्वादन्यत्रापि' इति वार्तिकमुपन्यस्याप्रधानग्रहणं प्रत्याख्यायत । अत्र अप्रधानशब्दार्थो न न्यरूप्यत । अत्रत्यप्रदीपानुरोधेन उद्योते 'भाष्ये अप्रधाने इत्यस्य प्रतीयमानक्रियाकर्तरीत्यर्थः । प्रधानकर्तरीत्यस्य उच्चारितशब्दबोध्यक्रियाकर्तरीत्यर्थः' इति व्याक्रियत । कौस्तुभमनोरमाशब्दरत्नशेखरव्याख्यानव्युत्पत्तिवादभाट्टरहस्यादिग्रन्थेषु अप्राधान्यं शाब्दगुणाद्यन्वयित्वाभावरूपमेवावर्ण्यत । श्रीभाष्यश्रुतप्रकाशिकाभावप्रकाशिकाधिकरणसारावल्यादिषु अप्राधान्यममुख्यत्वरूपं प्रतिपादितं भाति । 'सोऽश्नुते सर्वान्कामान्सह । ब्रह्मणा विपश्चितेति' इत्यत्र उपनिषद्भाष्ये इमानि वाक्यानि लक्ष्यन्ते—'ब्रह्मापेक्षयापि तद्गुणानां फलदशायां प्राधान्यं प्रतिपादयितुं ब्रह्मणा सह इति निर्देशः । 'सहयुक्तेऽप्रधाने' इति हि पाणिनिस्मृतिः । न च भोग्यतायां गुणापेक्षया ब्रह्मणोऽप्राधान्यं दोषायेति शङ्क्यम् । 'श्रियं त्वत्तोऽप्युच्चैर्वयमिह भणामः श्रृणु नराम्' इतिवत् परमात्मापेक्षयापि तत्कल्याणगुणानां भोग्यतातिशयप्रतिपादनस्य परमात्मातिशयपर्यवसायित्वेन एतादृशाप्राधान्यस्य गुणत्वेन दोषत्वाभावात् । अत एव हि पुत्रेण सह ओदनं भुङ्क्त इतिवत् भोक्तृसाहित्यपरत्वे ब्रह्मणोऽप्राधान्यप्रसङ्गात् तत्परित्यज्य पयसा सह ओदनं भुङ्क्त इतिवत् भोग्यसाहित्यपरत्वमेव । नात्र च पक्षे ब्रह्मणोऽप्राधान्यं दोषायेति भोग्यसाहित्यपक्ष एव भगवता भाष्यकृता समाश्रित' इति । अत्र भोक्तृसाहित्यपरत्वे आपाद्यमानं ब्रह्मणोऽप्राधान्यं न शाब्दगुणाद्यन्वयित्वाभावरूपम् । अश्नुत इति शब्दबोध्यानुभवकर्तृत्वाभावरूपाप्राधान्यस्य ब्रह्मणीष्टत्वेन तस्याप्रसञ्जनीयत्वात् । अपि त्वमुख्यत्वरूपम् । 'अविभागेन दृष्ट-

---

N. B. पूर्वसञ्चिकोपपादितदारवशब्ददूषणपरं 'दारवशब्दो दुष्प्रयुक्तः' इति काव्यालङ्कारसूत्रं तु चिन्तनीयम् ।

त्वात्' इत्यत्रत्यभावप्रकाशिकायां 'भोक्तृसाहित्यपरत्वे तु भोक्तृजीवापेक्षया ब्रह्मणोऽप्राधान्यप्रसङ्गः । ततश्च ब्रह्मणः प्रकारित्वभङ्गप्रसङ्ग इति भावः' इत्यभण्यत । 'भुङ्क्ते स्वभोगमखिलं पतिभोगशेषम्' इति श्रियाधिकारसूक्तिरीत्या उभयविभूतिविशिष्टब्रह्मानुभवे ब्रह्मणः शेषित्वं जीवस्य शेषत्वं च किलोचितम् । 'सोऽश्नुते' इत्यत्र श्रुतिस्वारस्यमनादृत्य ब्रह्मणा सह जीवः कामान् भुङ्क्ते इत्यर्थे वर्ण्यमाने ब्रह्मणः शेषित्वभङ्गप्रसङ्ग इत्येतदभिप्रायः प्रतीयते । सूत्रस्थाप्रधानपदस्यामुख्यार्थपरत्वे वर्ण्यमाने अप्रधानपदार्थानिरूपणान्न महाभाष्यं विरुध्यते । अप्रधानपदस्यामुख्यार्थपरत्वमेव प्रसिद्धम् । यत्त्वत्र मञ्जूषायामुक्तम्—"यत्तु 'प्रधानत्वं मुख्यत्वं अत्रनगरे अयं प्रधानमित्यादिवत् । तदभावरूपं चाप्रधानत्वं तृतीयावाच्यं' इति तन्न । राज्ञा सह सेना गच्छति इत्यादौ तृतीयानापत्तेः उक्तभाष्यविरोधाच्चेत्यन्यत्र विस्तर" इति तत्रोच्यते । राज्ञा सह सेना गच्छतीत्यत्र गत्वा सेनैव योत्स्यत इति युद्धार्थगमने सेनैव प्रधानम् । विषयोऽयं तत्रैव सुबर्थविचारारम्भे 'युद्धकर्तारोऽपि योद्धारो राजनियोगापेक्षणादस्वतन्त्रा अपि नियोगोत्तरं पुनः स्वतन्त्रा एव नियोगादिमात्रात्तु तन्निष्ठजयादिभाग् राजा' इति ग्रन्थेन स्फुटमगद्यत । रक्षणीयश्च सेनया राजा । अत एव रामायणे युवराजस्याङ्गदस्य सेनारक्ष्यत्वाभिप्रायेण तस्मिन् जाम्बवता कलत्रमिति व्यपदेशः । कालभेदेन राज्ञोऽमुख्यत्वं सम्भवत्येव । अत एव ध्वन्यालोके तृतीयोद्योते 'रसादिरूपव्यङ्ग्यस्य गुणीभावे रसवदलङ्कारो दर्शितः । तत्र च तेषामाधिकारिकवाक्यापेक्षया गुणीभावो विवाहप्रवृत्तभृत्यानुयायिराजवत्' इत्यभ्यधीयत । तद्व्याख्यानलोचने 'रसादीति । आदिशब्देन भावादयः रसवच्छब्देन प्रेयस्विप्रभृतयोऽलङ्कारा उपलक्षिताः । नन्वत्यर्थं प्रधानभूतस्य रसादेः कथं गुणीभावः गुणीभावे वा कथमचारुत्वं न स्यादित्याशङ्क्य प्रत्युत सुन्दरता भवतीति प्रसिद्धदृष्टान्तमुखेन दर्शयति तत्र चेति । रसवदाद्यलङ्कारविषये' इति व्याख्यायत । अप्रधानशब्दस्य शाब्दगुणाद्यन्वयित्वाभावपरत्वमाश्रित्य यत्राप्राधान्यं वर्ण्यते तत्रामुख्यत्वरूपाप्राधान्यमपि तत्तद्वाक्यार्थघटकक्रियादिषु वर्णयितुं शक्यत एवेति न कोऽपि विरोधः । अप्रधानग्रहणप्रत्याख्यानाय वार्तिकोपपत्तिस्तु तत्तदर्थवादिनां साधारण्येवेति दिक् ।

# रामस्य प्रेष्ठः सुहृत् कः ॥

(अनुवृत्तम्)

**सौहार्दतारतम्यम्—**

रामसुहृदां अपश्चिमस्य सुग्रीवस्य विषयं यदहं पश्चिमत्वेनात्र उपहरामि तदस्य वैशिष्ट्यमावेदयतीति मन्तव्यम्। विमर्शीय विषये कस्मिंश्चित् परिगृहीते वैधतया अन्तत एव सिद्धान्तविषयः पदमादध्यात्। निषादराजप्रभृतिभिः निर्दिष्टपूर्वं रामस्य निर्व्यलीकं हार्दं सौहार्दं यद्यपि निरन्तरतया निर्वृत्तं, तथापि सुग्रीवविभीषणयोः श्रीरघुनन्दनेन साकं साम्प्रदायिकधर्मानुरोधेन निष्पन्नस्य प्रणयातिरेकस्य स्वरूपं अन्यादृशं अतिप्रशस्तं चेति विदितचरं स्याद्रामकथाविमर्शकानाम्। सुहृदन्तराणां रामेण सह सौहृदस्वरूपं कीदृशमिति अद्य विचारयामः, येन सुग्रीवसख्यस्य वैशिष्ट्यमवगम्यते। गुहजटायुषोः काकुत्स्थकुलेन सह प्रवृत्ता प्रीतिः प्रायो दशरथोपज्ञमासीत्, या च प्रासङ्गिकतया राममन्वबध्नात्। द्वयोरपि तयो रामेण प्रणयानुषङ्गो न दीर्घकालमन्ववर्तत। तयोर्गुहस्य मैत्रीबन्धो गङ्गायास्तरणानन्तरं, जटायुषश्च जनस्थाने राघवकृतनिर्वापाञ्जलिदानस्य चानन्तरं अन्तरित इति सर्वे वयमवेमः। आरूढविमानेन अयोध्यायै प्रत्यागमनावसरे रामेण "शृङ्गिबेरपुरं चैतत् गुहो यत्र समागतः" इति (रा-६-१२६) गुहस्य नाम्नि सूचितेऽपि किष्किन्धायामिव शृङ्गिबेरपुरे विमानस्य अवरोहणाय अयोध्यायै गुहस्य आह्वानाय वा रामेण न कोऽप्युद्यमः कृतः, न वा चिन्तितमिति च स्पष्टं ब्रूमहे। अतो रामेण तयोः सौहार्दसम्बन्धिनी कथा तावतैव पर्यवस्यति। हनूमतस्तु सौहार्दसंपत् रामे निरवधिकभक्तिभरेण समुपचिता तत्सेवावृत्त्या सुतरां च कन्दलिता सती सुदूरं अनुबध्नाति। परं च पवनतनयस्य रामे समुत्पन्नः प्रीत्यतिशयस्तु भक्तिरूपत्वेन सपदि परिणतस्सन् प्रथमं राघवसेवावृत्त्यै अन्ततश्च नैरन्तर्येण भक्तधर्मनिर्वर्तनाय च तमचोदयत्। जाम्बवानपि राघवे सति राज्यमयमयोध्यां च विहाय महाप्रस्थानाय

प्रवृत्ते, हनूमानिव चिरजीवी भूत्वा एकान्ततः श्रीरामे भक्तिमावहत् । तदेकध्यानपरः सानन्दं कंचित् कालं यापयतीति कथयन्ति पुराणविदः । 'एवमुक्तस्तु हनुमान् राघवेण महात्मना । वाक्यं विज्ञापयामास परं हर्षमवाप्य च ॥ यावत् तव कथा लोके विचरिष्यति पावनी । तावत् स्थास्यामि मेदिन्यां तवाज्ञामनुपालयन् ॥ .... .... जाम्बवन्तं तथोवाच रामो वृद्धं महामतिम् ।' इति (रा - ७ - १०८) विनीतयोस्तयोः विधाय नियोगं महाप्रस्थानाय रामः प्रावर्तत । एतावता च विहाय विभीषणसुग्रीवौ सर्वेऽप्यपरे रामस्य भक्तत्वसेवकत्वादिपदमधिगत्य स्वस्वजन्मनश्चारितार्थ्यमध्यगच्छन्निति प्रेष्ठसुहृत्त्वरूपा योग्यता विभीषणसुग्रीवयोः अन्यतरस्मिन्नेव अन्ततः पर्यवस्यतीति च विमर्शका विचिन्तयन्ति ।

### ६ सुग्रीवः ।

रामसुग्रीवौ द्वावपि परस्परं पाणिना पाणिं पीडयित्वा (गृहीत्वा) वह्नेः समक्षं वयस्यत्वं अध्यगच्छताम् । विभीषणश्च "स तु रामस्य धर्मात्मा निपपात विभीषणः । पादयोः शरणान्वेषी चतुर्भिः सह राक्षसैः" इत्येवं रीत्या पुत्रदारादीन् परिहृत्य सर्वलोकशरण्यं राघवं शरणं प्रपद्य तस्य यथान्यायं अकृत्रिमं मित्रं बभूव । सुग्रीवविभीषणावुभावपि सुतरां ज्येष्ठभ्रात्रोः दुष्कर्मणा दूयमानौ ज्यायांसौ तावपहाय रामसाहाय्यं आन्तरप्रीत्या आचकांक्षतुः । हनूमानेव रामसुग्रीवयोः सख्यसंपादनाय साधु साचिव्यमाचरत् । तथा हनुमदभिहितं सूनृतं वचनमादृत्यैव रामो विभीषणमपि सुहृत्त्वेन परिग्रहीतुं अन्ततो निश्चिकाय । विभीषणसुग्रीवौ द्वावपि सीतारक्षणरावणनिग्रहकर्मणोः रामसाहाय्यं कर्तुं च प्रतिजज्ञाते । सुग्रीवविभीषणौ उभावपि किष्किन्धाया लङ्कायाश्च आधिपत्ये तज्ज्येष्ठभ्रात्रोः वालिरावणयोः हननपूर्वकं रामः स्वयमभ्यषिञ्चत् । एते त्रयोऽपि यथाप्रतिज्ञं अरातिनिर्यातनरूपं अतिमहत्कर्म निर्वर्तयामासुः । रामेण सह सुग्रीवविभीषणयोः सौहार्दप्रवृत्तिः एतदवधि प्रमाणतः संदृश्यते समाना ।

(अनुवर्ति)

# पाठविमर्शः ॥

आत्मा संरक्षितः सिंहैर्वृत्तिमाश्रित्य वैतसीम् ।

इति 'भगवाद्विषय'व्याख्यानटिप्पणीविशेषोदाहृते रघुवंशश्लोके रघुवंशानुरोधेन 'सुह्मैः' इति भाव्यमित्यवोचाम । साधु असाधु सर्वत्र किमपि प्रतिवक्तव्यमित्यभिनिविष्टाः परे "रघुवंशपाठ एव 'सिंहैः' इति कुतो न स्यात्" इति धीरमपृच्छन् । सर्वथा प्रतिवचनमिह अशक्यमिति च मत्वा तृप्ता आसन् ।

"यो मध्यन्दिने प्रकाशते स एव चन्द्रः । यो निशीथे स एव सूर्यः । इत्यहं प्रतिजाने । केनात्र किमुत्तरं वक्तुं शक्यम् ।" इति यदि केचित् घोषयेयुः तान् प्रति किमपि वक्तुं आत्मनोऽनुन्मत्ततामिच्छन्तः केऽपि न प्रवर्तेरन् । न च तूष्णीम्भावेन कचित् कस्यचित् कश्चिदनर्थः सम्भविष्यति । उक्तवाक्यश्रवणमात्रेण वक्तरि सूर्यचन्द्रविपर्यासिनि उन्मादस्य सुग्रहत्वेन लोके यस्यकस्यापि तद्वचने प्रत्ययस्य वा तदनुसारेण वस्तुग्रहणस्य वा सर्वथा प्रसक्तिविरहात् । अनेन न्यायेन वयं तूष्णीका एवाभवाम ।

इममभिप्रायं ग्रहीतुमशक्नुवन्तः परे अस्माकं तूष्णीम्भावमात्रेण आत्मनो दुरुक्तस्य प्रामाणिकत्वमभिमन्यमानाः उत्प्लवन्ते । मृदुबुद्धीन् भ्रमयन्ति च । अतो वयमिह तत्त्वस्थितिं ज्ञापयामः ।

अस्मिन् भरतखण्डे कृत्स्ने लब्धप्रचारो रघुवंशः । द्रविडप्रदेशे सांप्रदायिकेषु प्रचारवान् उक्तटिप्पणीग्रन्थः । कस्य किमनुरोधेन निर्णयः कार्यः । नानादिग्भ्यो बहून् (उपत्रिंशान्) मातृकाकोशान् हेमाद्रिप्रभृति उपदश-व्याख्यानान्तराणि च सम्पाद्य समालोच्य बहु परिश्रम्य सर्वपाठान्तरप्रदर्शनेन भाषान्तरपरिवर्तनेन टिप्पणीदानेन उपोद्घातलेखन च संस्कृत्य प्रकाशितो अनर्घो रघुवंशकोश इदानीमुपलभ्यते । तत्र 'सिंहैः' इति पाठः यस्मिन् कस्मिन्नपि कोशे मूले व्याख्याने वा विद्यमानतया न दर्शितः । एवमविसंवादेन सर्वदेशप्रसिद्धे पाठे स्थिते कथं उदाहरणपरप्रादेशिकग्रन्थविशेषस्थं

सम्भवद्भ्रमं पाठान्तरमाद्रियेमहि । सुह्मपदार्थमजानद्भिः सिंह इति पठित-मिति अस्ति सम्भवः । न तु प्रसिद्धे सिंहपदे स्थिते अप्रसिद्धं सुह्मपद-मपठन्निति । अथ वा अलमस्माकमुपपादनेन । यत् स बहुपरिश्रमशाली विमर्शकधौरेयः उक्तरघुवंशकोशसंपादक आह तदेवेह निर्णयकारि । तदेव वयमिह उद्धरामः—

—सुह्मैः, west of Vanga (समतत i.e. Eastern Bengal) was Sumha Desa with its capital ताम्रलिप्त, called also तामलिप्त, दामलिप्त, ताम्रलिप्ती, तमालिनी (c.f. हेमचन्द्र IV. 45). In the time of Mahabharata, Sumha Desa seems to have included western Midnapur only as it is separately mentioned after Tamralipta (Bharata II. 30, 24, 26.), but there can be no doubt that in after times its extent was greater, as Tamralipta is distinctly mentioned by several writers as the capital of Sumha Desa (c.f. D. K. VI). (People with the surname Som are common in Western Bengal.) The commentator in explaining the text of Mahabharata in one place calls the Sumhas Radhas (Bharata II. 30, 16), and we know that Radha is the name of Western Bengal, from which the Radhi Brahmans take their name.

चरित्रे प्रसिद्धः महाभारते कीर्तितः तद्व्याख्यातृभिर्विदितः दशकुमारचरिते निर्दिष्टश्चायं सुह्माख्यो देशः वङ्गपश्चिमभागरूपः । इति स्पष्टमत्र प्रतिपाद्यते । एवं सुप्रसिद्धेऽस्मिन् देशविशेषनामधेये विपर्ययकल्पनमुपहास्यम् ।

यथा लोकयात्रायां तथा ग्रन्थचर्चायामपि गुणवत्ता अपेक्षिता । न लघुना हृदयेन निर्भयं किमपि प्रतिवचनमात्रपरतया वक्तुं युक्तम् ।

---

श्रीः

# उद्यानपत्रिका॥

एकोनविंशवर्ष-

# विषयसूची॥

## UDYANA PATRIKA

(XIX Year)

## CONTENTS.


1 मेनका। 57, 73, 89, 105, 125, 147.

2 सुभाषितनीवी। [पण्डित श्रीनिवासताताचार्यः] 59, 75, 91, 107, 127, 149.

3 वृद्धसेवा। 61.

4 मदिरेक्षणा (4)। 62.

5 मृन्मयम्। [V. R. S. Tatacharya Siromani] 68.

6 दधिभाण्डोपाख्यानम्। (S. N. Sriramadesika Siromani. Tirupati) 69.

7 पाठशुद्धिः। 72, 86.

8 ब्रह्मवर्चसम्। 77.

9 आशयविवरणम्। 78.
[पूर्वाभ्यधिकः (1), विद्यमानयोः (1), तथ्यम् (1), न (प्र), विमुञ्चथ, वैदिकम्।]

10 पूर्वत्रासिद्धम्। [V.R S.T.] 83, 100, 117, 139.

11 महोपकारः। 85.

12 निद्रासुखम् । 87.
13 गुणसागरः । 93
14 सर्वावस्था । 96
15 रामस्य प्रेष्ठः सुहृत् कः । [Duraiswami Iyengar] 101, 122, 144, 165.
16 प्रकीर्णकम् । [V. R. S. T.] 103
17 पुस्तकपरामर्शः । 104
18 पूर्वाभ्यधिकः । (2) 109
19 योगः कर्मसु कौशलम् । [K. S. Krishnan.] 118.
20 पाठसंशयः । 124.
21 विद्यमानयोः । (2) 129
22 राजतं, दारवम् । [V.R.S.T.] 139
23 पाठसमर्थनम् । [T. E. Veeraraghavacharya Siromani] 141.
24 रावणप्रणतिः । 142.
25 विकर्ता । 151.
26 तथ्यम् । (2) 155.
27 सहयुक्तेऽप्रधाने । [V. R. S. T.] 163
28 पाठविमर्शः । 167.
29 विषयसूची । 169.


---

शास्त्रानुबन्धः ।


कुवलयानन्दः । (बुधरञ्जनीसमेतः) [141—180]


---

VERIFIED 1985
VERIFIED-2001
VERIFIED 1989

Acc. No. 985

Call No. 178/19

Author

Title The Udyana Patrika